॥ श्रीगणेशायनमः ॥

* भावकौतुकं प्रारभ्यते *

भवदयिता परिपूर्णा करुणा जनसमु
दये यस्याः । सासर्वेप्सितदात्री
सपदि सुगात्री सती जयति ॥ १ ॥

ध्यायंध्यायं गुरोःपादयुगलं विदुषां मुदे ।
रविनाथःकृती कान्तंकुरुते भावकौतुकम् २

स्थानिवदादेशोऽनल्विधौ

स्थानिनातुल्यं स्थानिवत् तेन तुल्यं क्रिया चेद्वति
रिति वतिः, तस्यार्थः सादृश्य न्तस्मिन् स्थानिप-
दार्थस्य प्रतियोगितयान्वयः सादृश्यस्यादेशे
स्वरूपेणान्वयः, स्थानिप्रतियोगिकसादृश्यवाना-
देशो भवतीत्यर्थः, अलां विधिरल्विधिरत्र ष-
ष्ठ्यर्थवैशिष्ट्यानियामक स्ववृत्तिधर्म्मावच्छिन्नो-
द्देश्यताकत्व सम्बन्धेनाल् पदार्थस्य विधावन्वयः,
अल्चेहस्थान्यवयव एव गृह्यते यद्यप्यत्र सूत्र

पाठक्रमानुरोधाददेशेनैव प्रत्यासत्ति स्तथापि अ
ग्निहोत्रं जुहोति, यवागूं पचतीति विधिद्वया
वा क्रमनिराकरणपूर्वकयवागूपाकहोमविधानाच्छा-
ब्दक्रमादार्थक्रमस्य बलीयस्त्वेनादेशः स्थानिव-
दित्यनुसंहितार्थक्रमे स्थानिन एव प्रत्यासत्ते
र्न्नदोषः, तेन सुद्ध्युपास्य इत्यादावनचिचेति
द्वित्वेकर्त्तव्ये स्थानिवत्त्वनिषेधसिद्धिः, तथा च
स्थान्यवयवाल्वृत्तिधर्म्मावच्छिन्नोद्देश्यताके विधौ
कर्त्तव्ये स्थानिवत्वं नेत्यर्थः स्थानिवदित्येताव-
न्मात्रोक्तौ पितृवत् पण्डित इत्यत्रेवादेशस्य सम्ब-
न्धिशब्दमहिम्नैव लाभ आदेशग्रहणं श्रौतानुमा
निकयोरुभयोरप्यादेशयोः परिग्रहार्थन्तेन देवदत्तः
पचत्वित्यादौ तिङ्ङ तिङ इति निघातस्य सिद्धिः ॥
नन्वत्र प्राग्दीव्यतो ऽणिति सूत्रघटकविकृतिनि
र्द्देशज्ञापितेनैकदेशविकृतन्यायेनैव निर्वाहः किम
स्य प्रयोजनम्, एकदेशविकृतत्वं च प्रकृति विशि-
ष्टत्वम् वैशिष्ट्यं च स्वघटकोद्देश्यकविकारेतरया
वद्घटितत्व स्वघटकोद्देश्यकविकारघटितत्व स्व
विशिष्टाघटितत्व संबन्धैः संबन्धघटक वैशिष्ट्यं

च स्वानवयवत्व स्वघटकमात्रोद्देश्यकविकारेतरत्व संबन्धाभ्यां, निर्ज्जरघटकरेफमात्रस्य जराशब्दत्व वारणायाद्यः, तत्रैव रेफान्तस्य तत्ववारणाय द्वितीयः, निर्ज्जर इति समुदायस्य रामाविति समुदायस्य च तत्ववारणायतृतीयः, रामिति मान्तस्य तत्व सिद्धये संबन्धघटक आद्यः, दीर्घेकार घटिते वीवधशब्दे विभाषा विवधाच्चेति सूत्र विहितयोः छन् ठक् प्रत्यययोः सिद्धये द्वितीयोऽन्यथा स्वानवयवत्व संबन्धेन स्वविशिष्टदीर्घेकारघटितत्वान्न-स्यात्, एवं च पचतु इत्येतद्घटकस्यतोरप्येकदेश विकृतत्वादिति चेन्न, अर्द्धस्यान्यथात्वे जातिव्यञ्जकभूयोऽवयवदर्शनाऽभावेन तन्न्यायाप्रवृतेः, पचतीत्यत्रत्यं तिङन्ततदादित्वं पचतु शब्दे नाति देष्टुं शक्यते यदीयार्द्धस्यान्यथात्वं तदर्द्धवृत्तिधर्म्मघटितधर्म्मस्याप्यनेन न्यायेनानतिदेशात्, न च भूयोवयवदर्शनं न जातिव्यञ्जकमंशुकसंवृतकलेवरतया वैरुप्यंगतस्याननमात्रदृश्यस्य शुनस्तावदवयवमात्रादपि श्वत्वजातेर्व्यञ्जनात्, प्रकृते तेरिकारस्योकारेणाच्छादनात्स-

त्यपि वैरूप्येऽपिवज्जलमित्यादौ संख्याकारकाद्य-
वगमादिकारापगमे तकारमात्रादपि तित्वजातेर्व्य
ञ्जनस्य दृष्टत्वात्तुशब्देऽपि तेनैव तादृशजा-
तिर्व्यज्यत इति वक्तुंशक्यमिति वाच्यम्, तिङ्
संज्ञाया स्तिबादिसूत्रोपात्तपरिच्छिन्नपरिमाण निष्ठ
तया परिच्छिन्नपरिमाणेऽस्य न्यायस्याप्रवृ-
त्तेरनेन निर्वाहाभावात्, परिच्छिन्नपरिमाणत्व
श्चैतन्मते संख्यात्वपरिमाणत्वव्याप्यधर्मावच्छिन्न
प्रकारताकबुद्धिनिष्ठप्रतिबन्ध्यतानिरूपितप्रतिबन्धक
तावच्छेदकविषयताश्रयविशिष्टत्वम् वैशिष्ट्यं च
स्वघटितत्व स्वसमनियतत्वा न्यतरसंबन्धेन, द्व्यच्
कत्वादे रेकत्वादि प्रकारक बुद्धिनिष्ठ प्रतिबन्ध्यता
निरूपितप्रतिबन्धकतावच्छेदकविषयताश्रयीभूतद्वि-
त्वादि घटितत्वाज्जरात्वादेश्च तथाभूतचतुष्ट्वादि सम-
नियतत्वात्तत्त्वमुपपाद्यम् ॥ नचैवं दीव्यति शब्दस्या
प्यनेनातिदेशाभावे प्राग्दीव्यत इति सूत्रस्थ
भाष्या सङ्गतिरिति वाच्यं दीव्यति शब्दनिष्ठबोध
जनकत्वस्यैव दीव्यच्छब्देऽतिदेशेनेष्टसिद्धेः, तस्य
निरुक्तपरिच्छिन्नपरिमाणत्वाभावात्, प्रकृतेतु ति

प्त्वादेः परिच्छिन्नपरिमाणत्वादतिदेशोऽप्राप्तइत्या- नुमानिकोऽसावाश्रणीयः, ननु गुरोः स्थाने याज्य- कुलानि व्रजतामन्तेवासिनामग्रासनप्रभृतिलाभ- दृष्टान्तमूलकेन "तत्स्थानापन्नस्तद्धर्म्मलभतइति" न्यायेन निर्वाहे कृतं स्थानिवत्सूत्रेणेति चेन्न लौ किकस्थान्यादेशभावापेक्षया शास्त्रीयस्थान्यादेश भावस्य भेदात्, योहि यत्कार्य्यार्थं लोके यस्य स्था- ने नियुज्यते, स तस्य तत्कार्य्यमेव कृत्वा निवर्त्तते, नतु तदितरदपि, नहि याजनार्थं नियुक्तः शिष्यो गुरुकर्त्तव्यमुच्छिष्टदानादि सकलं कर्त्तुमीष्टे, शा- स्त्रेऽर्थमवबोधयितु मनुशासनेनानुशिष्टोप्यादेशः स्था- निकर्त्तव्यं कार्य्यकदम्बकं करोतीति वैषम्याद- न्तरेण वचनं न तत्सम्भवति, शास्त्रस्वरूपाश्रित कार्य्यस्यापि दर्शनेनान्तरेण सूत्रं लौकिकन्यायेना- ङोयमहन इत्यात्मनेपदं कृते वधादेशे नस्यादतोऽ पि तत्सूत्रमित्यवगन्तव्यम्, आवधिष्टत्यत्रात्मने पदार्थं माङो यमहनवध इति न्यासे हिंसार्थकाद्वध धातोरप्याङ्पूर्वकादात्मनेपदं स्यात्, हनोवधोहन वध इति समासे वधेरात्मनेपदस्य वारणेपि हन्ते

राहत इत्यादावात्मनेपदं न स्यात्, आङो यमहन हनवध इतिन्यासेऽत्रदोषाभावेऽपि निर्ज्जरादि शब्दे जरसादेशो न स्यात्, एकदेश विकृतन्यायेनतुनात्र निर्वाहः, परिच्छिन्न परिमाणे तन्न्यायानाश्रयणस्य पुरस्तादुप पादितत्वादिति सकलमेव सूत्रं कर्त्तव्यम्॥ अथ युष्मदस्मदोरनादेश इत्यत्रानादेशग्रहण सामर्थ्यादादेशः स्थानिवद्भवतीति कल्पनेऽदोज ज्धिर्ल्यप्ति कितीत्यत्र ल्यब्ग्रहणसामर्थ्यादल्विधौ स्थानिवद्भावोनेति कल्पने च सर्वत्र निर्वाहे कृत्स्नमिदं सूत्रं निरर्थक मेवेति भाष्यउक्तं न चात्रादेश ग्रहणाभावे युष्मभ्यमित्यत्र तत्स्थानापन्न इति लौकिकन्यायेन विभक्तित्वातिदेशे आदेशवारणा यानादेशग्रहणस्य चारितार्थ्येन कथमनादेशग्रहणस्योक्तार्थकल्पकत्वमितिवाच्यम् विभक्तिश्चेति सूत्रे स्वरूपमित्यस्यानुपस्थितावपि स्वौजसमौडितिसूत्रीयस्वादिपदे स्वं रूपमित्यस्योपस्थितौ स्वादिप्रत्ययस्वरूपस्यानेनातिदेशाभावात्, भाष्यासङ्गते र्वक्तुमशक्यत्वात्, अन्येत्वचः परस्मिन्नित्यर्थं स्थानिवदादेशइत्यस्यावश्यकत्वेनानल्विधा

वित्यस्य ज्ञापकसिद्धं न सर्वत्रेति ज्ञापनं द्वारा-
चारितार्थ्यात्, तेनापपरिवहिरिति समासविधा
नज्ञापिता वहिः शद्बयोगिनी पञ्चमी करस्यकर
भोवहि रित्यत्र नेत्याहुः, नन्वसंयोगाल्लिट् किदि
त्यत्रेव विनापि वर्ति वत्यर्थलाभ सम्भवाद्वद्ग्रहरणं
किमर्थं, नच स्थानी आदेशं प्रतिपद्यत इत्येवार्थः
स्यादितिवाच्यं ततदादेशविधायकशास्त्रस्यवै-
यर्थ्यापत्तेः, आदेशः स्थानिरूपं प्रति पद्यत
इत्यर्थोपि वक्तु मशक्यः, आदेशः स्थानी अस्तेर्भूरि
ति वचनद्वयप्रामाण्याद्विकल्पसम्भवेऽपि वालि-
टीति सूत्रारम्भसामर्थ्यात्, नच चक्षिङः ख्याञ् आ
देशः स्थानीति वचनद्वयप्रामाण्यात्सर्वत्र वि-
कल्पापत्तौ लिड्येवेति नियमार्थं तत्स्यादिति वाच्यं
विभाषालुङ्लृङो रित्याद्यप्राप्तविभाषासु वा ग्रह-
णस्य वैयर्थ्यापत्तेः, अस्तिभूभ्यां रूपद्वयसिद्धाव
स्तेर्भूरित्यस्य वैयर्थ्यापत्तेश्चेति चेन्न स्थानी आ-
देशस्य संज्ञेत्यर्थापत्ता वाङोयमहन इत्यात्मनेपदं
वधेरेव स्यान्नतु हन्तेः, स्वंरूपमित्यनेन तु हन्तेर्ग्र-
हणं वक्तुमशक्यमशब्दसंज्ञेति निषेधात्, न चाङो

वधियम इति न्यासेन निर्वाहः, वधहिंसायामिति भौवादिकस्य धातोरपि ग्रहणापत्तेः, न चाङोवधयम इत्युच्यमानेऽकारस्य विवक्षितत्वान्न वधेर्ग्रहणमिति वाच्यं सकलहन्त्यादेशसंग्रहायाङोयमहन इत्यस्यैव वक्तव्यत्वात् अन्यथाऽऽजघ्नइत्यत्र हन्तेर्लिटि प्रतिपदोक्तत्वाल्लिटिधातोरिति द्वित्वेऽभ्यासस्य चुत्वेऽभ्यासात्परस्य घत्वे, वधादेशाभावेनात्मने पदानापत्तेः, आदेशः स्थानिनः संज्ञेत्यर्थेऽप्यस्यतिवक्तीत्यत्र कृत्रिमत्वात्ख्यातेः सार्वधातुकमात्रविषयत्वाच्च चक्षिङोग्रहणे समचक्षिष्टेत्यत्राङापत्तेः, अख्यतेत्यत्र तदनापत्तेश्च, न च चक्षिङ इत्युच्यमानेऽप्यनुबन्धनिर्देशाद्यङ्लुकि वारणे ख्यातिसामर्थ्यान्नोक्तस्थले दोषइति वाच्यं गाङ्कुटादिसूत्रे गाङिङ्गाङोर्ग्रहणापत्तेः, गमेरिडित्यत्रेणिङिकामेव ग्रहणापत्तेश्चातोवद्ग्रहणम्, अथानल्विधावित्यस्योक्तार्थाभ्युपगमे रामायेत्यादौ स्थानिवत्त्वाभावेन सुपिचेति दीर्घानापत्तिः, नापि कष्टायेति निर्देशान्मात्रपदनिवेशेननिर्वाहो दध्यत्रेत्यादाविकारवृत्त्यच्त्वस्य यकारेऽतिदेशाद-

नाचिचेति द्वित्वानापत्तिः, अच्त्वादेरिकारमात्र-
वृत्तित्वाभावेनानल्विधावित्यस्याप्रवृत्तेः, नापि स्व
वृत्त्यल्मात्रवृत्तिधर्म्मावच्छिन्नोद्देश्यताकत्वसंबन्धस्या
भ्युपगमेन निर्वाहः प्रदीव्येत्यादौ त्वावृत्तिवला-
द्यार्द्धधातुकत्वमादेशेऽतिदिश्यार्द्धधातुकस्येतीडाग-
मापत्तेः, ननु स्ववृत्त्यल्मात्रवृत्तिधर्म्मघटितधर्म्मा
वच्छिन्नोद्देश्यताकत्वसंसर्गाभ्युपगमान्न प्रकृते
दोषोऽल्मात्र वृत्तित्वं चाल्वृत्तित्वे सत्यल्तितरावृ
त्तित्वं, न च ल्यासज्यवृत्तिधर्म्मावच्छिन्नानुयो-
गिताकप्रत्येकवृत्तिधर्म्मावच्छिन्नप्रतियोगिताकभेद
स्यानङ्गीकारेण। ल्तितरत्वेन भ्यामादेरग्रहणाद्रामाये
त्यादावल्मात्रवृत्तित्वात्स्थानिवत्त्वाभावेन दीर्घाना-
पत्तिरितिवाच्यम् अल्त्वप्रतियोगिक पर्य्याप्त्य-
नुयोगितावच्छेदकरूपावच्छिन्नानुयोगिताकपर्य्याप्ति
प्रतियोगित्वस्यैव तत्त्वेन सुप्त्वस्य भ्याम्त्वप्रतियो-
गिकपर्य्याप्त्यनुयोगितावच्छेदकसमुदायत्वावच्छि-
न्नानुयोगिताकपर्य्याप्तिप्रतियोगित्वेनादोषात्, न
चैकारादिवृत्त्यल्त्वप्रतियोगिक पर्य्याप्त्यनुयोगिता-
वच्छेदकतद्व्यक्तित्वावच्छिन्नानुयोगिताकपर्य्याप्ति-

प्रतियोगित्वस्यापि सुप्त्वेसत्वेनापत्तिस्तदवस्थेति वाच्यमल्त्वप्रतियोगिकपर्य्याप्त्यनुयोगितानवच्छेदक रूपावच्छिन्नानुयोगिताकपर्य्याप्तिप्रतियोगित्वाभाववत्त्वस्यैव तत्त्वेन सुप्त्वस्याल्त्वप्रतियोगिकपर्य्याप्त्यनुयोगितानवच्छेदक रूपावच्छिन्नानुयोगिताकपर्य्याप्तिप्रतियोगित्वात् अल्मात्रवृत्तित्वं विहायाल्त्वव्याप्यत्वनिवेशेनादोषाच्च न चार्द्धधातुकस्येतीडागमस्याल्त्वव्याप्यधर्म्मघटितवलाद्यार्द्धधातुकत्वधर्म्मावच्छिन्नोद्देश्यताकत्वेनबभूविथेत्यत्र स्थानिवत्त्वनिषेधादिडागमो न भवेदिति वाच्यमुक्तसंबन्धघटकधर्म्म आदेशालवृत्तित्वविशेषणेनादोषात्, उक्तात्यादित्वनिवेशादेव बभूवतु रित्यत्रनिर्वाहात्, न चद्यौः पन्थाइत्यादौ हल्ङ्याब्भ्य इति सुलोपापत्तिरनुमानिकस्थान्यादेशभावेन हलन्तत्वातिदेशात्, दिवित्यस्य द्यावादेशे पथिन्नित्यस्य पन्थादेशे हल्त्वादेरादेशाद्यल्वृत्तित्वेन निषेधाप्रवृत्तेरिति वाच्यमानुमानिकस्थान्यादेशभावकल्पनेऽपि श्रौतस्थान्यादेशभावस्य त्यागाभावेनानल्विधाविति निषेधात्स्थानिवद्भावेन हलन्तत्वस्यातिदेष्टुमशक्य-

त्वादिति चेन्नास्तेः क्विपि भ्वादेशे सौ भूरित्यत्र किमः सौ क इत्यत्र च स्थानिवृत्तिहलन्तत्वातिदेशेन हल्ङ्याब्भ्य इति सुलोपापत्तिः, हल्त्वस्यादेशाद्यल्वृत्तित्वेनानल्विधावित्यस्या प्रवृत्तेः। प्राञ्चस्तु सिद्धान्तिनः स्ववृत्त्यल्त्वव्याप्यधर्म्मघटिताऽतिदिदिक्षित धर्म्मावच्छिन्नोद्देश्यताकत्वमेव सम्बन्धमभ्युपगम्य सकारमकाराद्यल्वृत्यल्त्वव्याप्यहल्त्वधर्म्मघटितहलन्तत्वधर्म्मावच्छिन्नोद्देश्यताके सुलोपविधौ स्थानिवत्त्वस्य निषेधाद्, वभूविथेत्यत्र वलादित्वस्य स्वतः सिद्धत्वेन सिद्धेरिच्छां प्रति प्रतिवन्धकत्वेनातिदेष्टुमशक्यत्वाद्, बभूवतुरित्यादौ वलादित्वस्यातिदिदिक्षितत्वान्नदोष इति वदन्ति॥ केचित्तु स्थानिसम्बन्ध्यल् विशिष्टाल्त्वव्याप्य धर्म्मघटित धर्म्माश्रये विधौनेत्यर्थः, वैशिष्ट्यञ्च स्ववृत्तित्व स्व विशिष्टालवृत्तित्व सम्बन्धाभ्याम्, अत्र वैशिष्ट्यञ्च स्वसजातीयत्व स्वघटितस्थानिकावयवत्व सम्बन्धाभ्याम् साजात्यञ्च प्रथमत्व द्वितीयत्व तृतीयत्वादिना, भूरित्यादौ सकारघटितास्थानिकादेशावयवत्वस्य भकारे सत्त्वेऽपि द्वितीय

त्वधर्म्मेण सकारसजातीयत्वाभावेन स्वविशिष्टाल्
पदेन भकारस्याग्रहणेन हल्त्वस्यतादृशालवृत्तित्व
मस्त्येवेति न दोषः, बभूवतुरित्यत्रातुसस्तकारस्य
प्रथमत्वरूपधर्म्मेण स्थानिसम्बन्ध्यल् तस्यघटकतका
रूपाल् सजातीयत्वाभावाद्धल्त्वस्यस्थानिसम्ब-
न्ध्यल् विशिष्टत्वेनादोषात् वभूविथेत्यत्रतुस्थानि
सम्बन्ध्यल् सिघटकसकार वैशिष्ट्यस्य निरुक्तो-
भयसम्बन्धेन थकारेसत्वेन वल्त्वस्य तद्वृत्तित्वेन
स्थानिवद्भावनिषेधाभावात्, ॥ स्थान्यादेशौ च
श्रौतौ ग्राह्यौ तेन द्यौः, पन्थाः, इत्यादौ हल्त्वस्या
नुमानिकस्था न्यादेशभावमाश्रित्य स्थानिसम्बन्ध्य
ल् दिव्घटक दकाररूपाल्विशिष्टेद्यौ शब्दघटक
दकारे पथिन् शब्दघटक पकारविशिष्टपन्थाघट
क पकारे च सत्वेऽपि न स्थानिवद्भावेन हलन्तत्व
स्यातिदेशइत्याहुस्तन्न यूष्णेत्यादौ स्थानिवत्त्वे
नादन्तत्वमादाय टाङसिङसामितीनादेशापत्ते स्तत्रा
त्वस्य स्थानिसम्बन्ध्यल् यूषशब्दावयवाकार रू-
पाल्विशिष्टत्वाभावात् स्थानिसम्बन्ध्यलवैशिष्ट्य-
स्य यूषन् घटकषकारोत्तराकारे सत्वादिति बोध्यम्

अथ भवति धिन्वन्तीत्यादिषु वलादित्वस्यातिव-
कारादिषु स्वतो विद्यमानत्वादार्द्धधातुकत्वस्या-
ल्मात्रवृत्तित्वाभावादल्त्वव्याप्यत्वाभावाच्च नि-
षेधाप्रवृत्तावार्द्धधातुकस्येतीडागमं न कोऽपि शक्नु
याद्वारयितुम्, अत्रोच्यते स्ववृत्त्यल्त्वव्याप्यध-
र्म्म घटितातिदिदिक्षितधर्म्मावच्छिन्नोदेश्यताकत्व,
स्ववृत्त्यल्त्वव्याप्यधर्म्मावच्छिन्नस्थानितानिरूपि-
तादेशतावद्धार्म्मिकारोप प्रकारीभूतधर्म्मावच्छि-
न्नोद्देश्यताकत्वान्यतर संसर्गेणाल्विशिष्टे विधौ कर्त्त
व्ये स्थानिवद्भावो नेत्यर्थादुक्तयोः स्थलयो रार्द्ध
धातुकस्येति शास्त्रीय स्थानिताया लकारोकारवृ-
त्त्यल्त्वव्याप्य लत्वेकत्वादिधर्म्मावच्छिन्न तिप्तस्
झीत्यादि, इकोयणचीति शास्त्रीय लकारोकार निष्ठ
स्थानितानिरूपिततिवकारनिष्ठादेशतावत्तिवकारध-
र्म्मिक वलाद्यार्द्धधातुकत्ववदारोपप्रकारीभुत
वलाद्यार्द्धधातुकत्वधर्म्मावच्छिन्नोद्देश्यताकत्वान्नेडा
गमशास्त्र प्रवृत्तिः, अतएव भो भगो अघो अपूर्व
स्येति सूत्रे भाष्ये छन्दः स्वित्यादिषु पूर्वत्रासिद्ध-
मित्यनेन यत्वविधायक शास्त्रस्यासिद्धत्वात्क्रिय-

माणस्य विसर्ज्जनीयस्यानल्विधाविति निषेधेन स्थानिवत्त्वस्य वक्तुमशक्यत्वाद्दोषाभावेनाश्ग्रहणस्योत्तरार्थतोक्तिः सङ्गच्छते, न चारेत्यत्र ऋ शब्दस्य द्वित्वेभ्यासस्योरत्त्वे स्थानिवद्भावस्यानल्विधाविति निषेधाद्धलादिः शेषो न स्यादिति वाच्यं पुनरप्यरित्यस्य पूर्वोऽभ्यास इत्यनेनाभ्यासत्वात्, लक्ष्ये लक्षणस्येति न्यायस्यामी इत्यत्र पुनः प्रगृह्य संज्ञाकरण परभाष्य प्रामाण्येन संज्ञा विषये प्रवृत्त्यभावबोधनात्, न च द्वित्वशास्त्रीयोद्देश्यताश्रय द्वित्वशास्त्रीयविधेयताश्रयोभयमात्रारब्ध समुदायघटकस्य द्वित्वशास्त्रीयविधेयताश्रया व्यवहितपूर्वस्याभ्यासत्व विधानादुरत्त्वे द्वित्वशास्त्रीयोद्देश्यताश्रय द्वित्वशास्त्रीयविधेयताश्रयोभयमात्रारब्धसमुदायस्यैवाभावेनाभ्याससंज्ञा नप्राप्नोतीतिवाच्यं स्वीयोद्देश्यताश्रयसमभिव्याहृतवर्णाघटितत्व स्वीयविधेयताश्रयाव्यवहित पूर्वत्व सम्बन्धाभ्यां द्वित्वशास्त्रविशिष्टो भ्याससंज्ञको भवतीत्यर्थकरणेनादोषात्, प्रथमसंसर्ग निवेशादुर्णुनावेत्यादावुर्णुसमुदायस्य नाभ्यासता,

द्वितीयसंसर्गनिवेशाद्द्वित्वशास्त्रीय विधेयताश्रयस्य नाभ्यासता, न च रामोबभूवेत्यादौ बभूवेत्यस्य साधनानन्तरं राम इत्यस्यापि नियतपूर्वपरान्यतरवृत्तित्वरूपस्य समभिव्याहृतत्वस्याभावाद्द्वित्वशास्त्रीयोद्देश्यताश्रयसमभिव्याहृतवर्णाघटितत्वादभ्यासत्वापत्तिरिति वाच्यम् अभ्यासत्वेऽपि हलादिः शेष इति सूत्रस्याङ्गाधिकारीयत्वेन लिङ्गिरूपिताङ्गत्वाभावात्, स्वाश्रयसमभिव्याहृतत्व स्वाश्रयघटकोद्देश्यकविकारेतरत्वोभयसंसर्गेण स्वीयोद्देश्यताविशिष्टवर्णाघटितत्वरूप सम्बन्धप्रक्षेपेणादोषाद्वा। अथैवं स्वीकारे हल्ङ्याबिति सूत्रेऽतिखट्व इत्यादौ सुलोपवारणाय कृतस्य पाणिनिना दीर्घग्रहणस्य स्थानिवत्सूत्रेऽतिखट्वायेत्यत्र स्थानिवत्त्वाभावाय कृतस्य वार्त्तिककृताङ्याब्ग्रहणेऽदीर्घ इति वार्त्तिकस्य तदुभयप्रत्याख्यानाय भाष्यकृता कृतस्य आ आबिति प्रश्लेषस्य चासङ्गतिः, स्ववृत्यल्त्वव्याप्याच्त्वावच्छिन्न स्थानितानिरूपितहृस्वनिष्ठादेशतावद्धर्म्मिकारोप प्रकारीभूत ङीत्वाप्त्वधर्म्मावच्छिन्नोद्देश्यताकेसुलोपादौ कर्त्तव्ये स्थानिवद्भाव

निषेधात् किञ्च कृन्मेजन्त इति सूत्रे, आधये, चि कीर्षवे, कुम्भकारेभ्यो नगरकारेभ्य इत्यादौ गुणैत्व योः स्थानिवत्त्वेन कृत्त्वात् प्राप्ताऽव्ययसंज्ञावारणा य वार्त्तिककृता कृतस्यानन्यप्रकृतेरिति वार्त्तिकस्य तत्प्रत्याख्यायकस्य सन्निपातपरिभाषाश्रयणपरभाष्य-स्यचासङ्गतिः "घेर्ङिति" बहुवचने झली" तिसूत्रयो रलोन्त्यस्येत्यस्योपस्थिते रत्वव्याप्यधर्म्मावच्छि-न्नस्थानितानिरूपितैकारादिनिष्ठादेशतावद्धर्म्मिका-रोपप्रकारीभूतकृत्त्वधर्म्मावच्छिन्नोद्देश्यताक त्वा-त्स्थानिवत्त्वा प्रवृत्तेः, किञ्चाग्रहीदित्यत्र सलो पसाधकस्य विशिष्टंह्येषोऽनलमाश्रयत इटंनामेति भाष्यस्यासंगत्यापत्तिः, ग्रहोलिटीत्यत्राचश्चेति परिभाषोपस्थितेः स्ववृत्यल्त्वव्याप्याच्त्वा वच्छिन्न स्थानितानिरूपितकारनिष्ठादेशतावद्धर्म्मिकारोपप्र-कारीभूतेद्त्वधर्म्मावच्छिन्नोद्देश्यताकत्वेन स्थानि वत्त्वाप्रवृत्तेरितिचेन्मैवम् स्ववृत्यल्त्वव्याप्यधर्म्मा-वच्छिन्नस्थानितानिरूपितादेशतावद्धर्म्मिकारोपप्र-कारीभूतधर्म्मेण साक्षादवच्छिन्नोद्देश्यताकत्वरूप स्य संसर्गस्य द्वितीयसंसर्गपदेऽभ्युपगमात्, हल्-

ङ्यावित्यादि शास्त्रस्या ल्त्वव्याप्याच्त्वावच्छिन्नस्था नितानिरूपितादेशतावद्धर्म्मिकारोपप्रकारीभूतङी- त्वाप्त्वधर्म्मेण साक्षादवच्छिन्नोद्देश्यताकत्वाभावात्, कृन्मेजन्तइत्यस्याल्त्वव्याप्यधर्म्मावच्छिन्नस्थानिता निरूपितादेशतावद्धर्म्मिकारोपप्रकारीभूत कृत्त्वधर्मे- ण साक्षादवच्छिन्नोद्देश्यताकत्वाभावात्, इटईटीत्य- स्याप्यल्त्वव्याप्याच्त्वा वच्छिन्नस्थानितानि- रूपितदीर्घेकारनिष्ठादेशतावद्धर्म्मिकारोप प्रकारीभू- तेद्त्वधर्म्मेण साक्षादवच्छिन्नोद्देश्यताकत्वाभावा- न्नोक्तस्थलेषु स्थानिवत्त्वप्रवृत्तिः, न चात्र साक्षा- त्पदनिवेशेऽपि लोम्नीइमे, साम्नीइमे इत्यादा वी दूदेद्द्विवचनमिति प्रगृह्यत्वसिद्धये द्विवचनत्वाति- देशोनस्यात्, औकारवृत्त्यल्त्वव्याप्यौङ्धर्म्माव- च्छिन्नस्थानितानिरूपितेकारनिष्ठादेश तावद्धर्म्मि- कद्विवचनत्व वदारोप प्रकारीभुताद्विवचनत्वध- र्म्मेण साक्षादवच्छिन्नोद्देश्यताकत्वादिति वाच्य मौङित्यौकारविभक्तेः संज्ञेत्यस्य प्रथमा द्वितीया द्विवचनयोः संज्ञेत्यर्थकत्वे नौङ्त्वस्य युवामित्यादा वप्यपि सत्त्वेनाल्त्वव्याप्यत्वाभावेन नपुंसकाच्चेति

शास्त्रीयस्थानितायाः अल्वव्याप्यधर्म्मावच्छिन्न-
त्वाभावात् न चैवमतियुष्मच्छब्दादौ विभक्तौ पर-
त्वान्ङे प्रथमयोरित्यमादेशे नपुंसकाच्चेति श्या-
देशापत्तिरिति वाच्यम् सकृद्गतिन्यायाश्रयणात्
अम् मान्तएवावशिष्यतइति व्याख्यानाच्च दोषा
भावात्, स्वौजसमौडिति सूत्रआऔइति च्छेदेनौ
ङत्वस्य तद्वृत्तित्वेनाल्वव्याप्यत्वाभावाच्च, औ-
ङित्यौ कारविभक्तेः संज्ञेत्यनेनौकारविभक्ता वौङ-
त्वारोपबोधनेनौङ्त्वस्यौशब्देऽपिसत्त्वेनाल्वव्याप्य-
त्वाभावाच्च, ईदाद्यन्तं यद्द्विवचनमित्याद्यर्थे द्वि-
वचनस्य विशेषणतयैव भानादारोपप्रकारीभूतध
र्म्मेण साक्षादवच्छिन्नोद्देश्यताकत्वाभावाच्च, न
चातोलोपइति सूत्रे ण्यल्लोपावित्यादिवार्त्तिक व्या-
ख्यानावसरेऽततक्षदित्यत्रेयङादेशस्या वकाशमुद्भा-
व्य स्थानिवद्भावाण्णिग्रहणाल्लोपो भविष्यतीत्युक्तं
भाष्ये, णेरनिटीतिशास्त्रस्य स्ववृत्त्यल्वव्याप्येत्वध-
र्म्मावच्छिन्नेकारनिष्ठस्थानितानिरूपितेयङ्निष्ठा द-
देशतावद्धर्म्मिकारोप प्रकारीभूतणित्वधर्म्मेण सा-
क्षादवच्छिन्नोद्देश्यताकत्वात्तदिदानीमसङ्गतंस्यादि-

ति वाच्यं ण्यन्ततदाद्यवयवस्य निर्द्दिश्यमानस्य लोपविधानेन णित्वधर्म्मेण साक्षादवच्छिन्नोद्देश्य ताकत्वाभावात् स्थानिवत्त्व प्राप्तेर्भाष्यासङ्गातित्वस्य वक्तुमशक्यत्वात्, अथेदुदुपधस्येति सूत्रे दीक्षितोक्ते प्रत्ययभिन्नस्य बिसर्गस्य षत्वं भवतीत्यर्थेऽग्निः करोतीत्यादौ भोभगोइतिसूत्रीयभाष्यसङ्गतार्थप्रयासलभ्येनानल्विधावित्यस्य नव्योक्तार्थेन स्थानिवद्भावस्य निषेधात्प्रत्ययसम्बन्धिभिन्नस्य विसर्गस्य षत्वं भवतीत्यर्थमङ्गीकृत्य षत्वं निवारयतां शब्दरत्नकृतां वचनमिदानीं काममसङ्गतंस्यात्, इदुदुपधस्येत्यस्याल्त्वव्याप्यधर्म्मावच्छिन्नरेफनिष्ठ-स्थानितानिरूपितविसर्गनिष्ठादेशतावच्छेदकीभूतर्म्मिकारोपप्रकारिभूतप्रत्ययत्वधर्म्मेण साक्षादवच्छिन्नोद्देश्य ताकत्वाभावादिति वाच्यं स्थानितायामेव साक्षाद वच्छिन्नत्वं निवेशयतां सतांनये दोषाभावात्, तथाहि गोस्त्रियोरिति सूत्रे निर्द्दिश्यमानपरिभाषोपस्थितेरुपसर्ज्जनस्त्रीप्रत्ययान्त तदाद्यन्तप्रातिपदिकावयवनिर्द्दिश्यमानस्य ह्रस्वइत्यर्थेनाल्त्वव्याप्यधर्म्मेण साक्षादवच्छिन्नाया स्थानिताया अभावात्,

न हलङ्याबित्यादि सूत्र वार्त्तिकभाष्यविरोधः, बहुवचने झलीति सूत्रे परिभाषाद्वयोपस्थितेरत्वव्याप्यधर्म्मेण साक्षादवच्छिन्नायाः स्थानिताया अभावात् नक्रुन्मेजन्त इति सूत्रस्थ वार्त्तिकभाष्य विरोधः घेर्ङितीत्यत्र घिसंज्ञका भिन्न निर्दिश्यमाना न्ताङ्गावयवस्यान्त्यस्यालोगुण इत्यर्थेनाल्त्वव्याप्यधर्म्मेण साक्षादवच्छिन्नस्थानिता तु वक्तुमशक्या अन्त्यस्याल इति वक्तव्येऽलोन्त्यस्येत्येवं पाठसामर्थ्येनालः सर्वत्रान्त्यविशेषणताया एवकल्पनेन स्थानिताया अन्त्यत्वेनैव साक्षादवच्छेदात्, ग्रहोऽलिटीत्यत्रानियमाभावान्नाचश्चेति परिभाषोपस्थितिः, उपस्थितौ वा तदुपस्थाप्याचोविशेषणताकल्पनेनेद्त्वेनैव स्थानितायाः साक्षादवच्छेदात्, न ग्रहोऽलिटीति सूत्रस्थभाष्यविरोधः, लोम्नीइमेइत्यादौ न पुंसकाच्चेतिशास्त्रे तस्मादिति परिभाषयाऽव्यवहितोत्तरस्योपस्थितेरौङस्तद्विशेषणतायाएव फलबलेन कल्पनादौङ्त्वेन साक्षादवच्छिन्नायाः स्थानिताया अभावात्, औङ्त्वस्याल्त्वव्याप्यत्वाभावाच्च। केचित्तु अल्रूपबोधकवृत्तिधर्म्मघटिताति

दिदिक्षितधर्म्मावच्छिन्नोद्देश्यताके, अल्रूपबोधक प्रयोज्यस्थानिता निरूपितादेशतावद्धर्म्मिकारोप प्रकारीभूतधर्म्मावच्छिन्नोद्देश्यताके वाविधौकर्त्तव्ये स्थानिवद्भावो नेत्यर्थे रामायेत्यादावल्पबोधकं रूप दंन भविष्यति, तद्वृत्ति, धर्म्मः सुप्त्वं न भविष्यति, एवमल्रूपबोधकप्रयोज्यस्थानिता नास्ति ततः स्थानितानिरूपितादेशतेत्यादिसर्वस्यासम्भवतयाऽनल्विधावित्यस्या प्रवृत्त्याऽलं मात्रादिपदनिवेशेन, भोभगो इति सूत्रस्थ मशग्रहणमुत्तरार्थ मन्यत्राभावादिति भाष्यमपि सुयोज्यमेव भोभगो इतिसूत्रेऽपि रइत्यस्यानुवृत्तौ रेफस्याल्रूपबोधकत्वेन तत्प्रयोज्यरेफत्वावच्छिन्नस्थानितानिरूपितादेशतावद्धर्म्मिकारोपप्रकारीभूतरुत्वधर्म्मावच्छिन्नोद्देश्यताके विधौ स्थानिवत्त्वाभावेन विसर्गे रुत्वबुद्धेः कर्त्तुमशक्यत्वात्, अग्रहीदित्यत्राल्रूपबोधकाच्पदप्रयोज्याच्त्वावच्छिन्नस्थानितायाः सत्वेपीटईटीति शास्त्रस्यारोपप्रकारीभूतेद्त्वधर्म्मेण साक्षादवच्छिन्नोद्देश्यताकत्वाभावेन निषेधाप्रवृत्तौ स्थानिवद्भावेनेद्त्वबुद्ध्या सलोपसिद्धिः, धिन्वन्तीत्यादाविकोय-

णचीत्यादाविकइत्यादेरल एवबोधकत्वेन कका-
रादेद्योतकत्वनाळ्रूपबोधक प्रयोज्यस्थानितायाः
सत्वात्स्थानिवत्त्वाप्रवृत्तेः, नच मात्रादिपदनिवेशाभा
वेऽतिखट्वमयतेऽतिखट्वाअयतेर्विचियलोपे टापिछिद्य
तइत्यनया क्रियया योगेऽतिखट्वाच्छिद्यत इत्यत्रह्रस्व
स्यालूरूपबोधकत्वाभावेन खट्वशब्दोत्तराकारवृत्ति-
ह्रस्वत्वबुद्ध्याछेचेति नित्यतुगागमापत्तिरितिवाच्यं
स्थानिवद्भावेन स्थानिपर्य्या सधर्म्मस्यैवातिदेशेन
स्थान्येकदेशवृत्तिधर्म्मानयने स्थानिवत्त्वाप्रवृत्तेः,
ताद्रूप्यानतिदेशादन्तादिवच्चेत्यनेनापि ह्रस्वत्व-
स्यातिदेष्टुमशक्यत्वात्, नच नञ्यनये श्रियंपाति
यत्कुलमित्यर्थे ह्रस्वोनपुंसकइति ह्रस्वेकृते श्रीपच्छा
येत्यत्र स्थानिवद्भावाद्दीर्घत्व बुद्ध्यापदान्ताद्वेति वै-
कल्पिकतुगागमापत्तिः, इष्यतेच नित्यं छेचेति तु-
गिति वाच्यम् ह्रस्वोनपुंसकइति शास्त्रीयाळ्रूपाच्
पदप्रयोज्यात्त्वावच्छिन्न स्थानितानिरूपितादेश
तावच्छ्रस्वाकारधर्म्मिकारोप प्रकारीभूतदीर्घत्व धर्म्मा
वच्छिन्नोद्देश्यताके तुग्विधौकर्त्तव्ये स्थानिव-
त्त्वस्यनिषेधात्, नित्यतुकएव सौलभ्यात्, न च

तच्छब्दान्मतुपि मकारस्य वकारे तद्वानित्यत्रानु नासिकस्याल्रूपबोधकत्वाभावेन मादुपधायाश्चे- ति सूत्रे मकारस्याल्रूपबोधकत्वेन तत्प्रयोज्यम- त्वावच्छिन्नस्थानितानिरूपितवकारनिष्ठा देशता वद्वकारधर्म्मिकारोपप्रकारीभूतानुनासिकत्वरूपधर्म्मे ण साक्षाद्दवच्छिन्नोद्देश्यताकत्वस्य यरोनुनासि क इत्यनुनासिकविधेरभावेन निषेधाप्रवृत्तौ स्थानिवद्भावेनानुनासिकापत्तिर्दुर्वारेतिवाच्यं स्था नितायां साक्षादवच्छिन्नत्वनि वेशनेनारोपप्र- कारीभूतानुनासिकत्वोद्देश्यताकेऽनुनासिके कर्त्त- व्ये ऽनल्विधावितिनिषेधा त्स्थानिवत्त्वाप्रवृत्त्यात- न्निवेशाभावेऽपि तद्वान् इत्यादौदोषाभावात्, त- सौमत्वर्थइत्यत्र दकारप्रश्लेषेण भत्वेनवाऽदोषात् अग्रहीदित्यत्र ग्रहोऽलिटीति शास्त्रीया निर्द्दिश्यमान त्वावच्छिन्ना स्थानिता साक्षादल्रूपबोधकप्रयोज्या नास्तीति नदोषः, कुम्भकारेभ्य इत्यादौ निर्द्दिश्य- मानत्वावच्छिन्नास्थानिताऽल् रूपबोधकप्रयोज्या नास्तीति नदोषः, साम्नीइमे इत्यादावौङएव स्था- नित्वेन निषेधाप्रवृत्तौ स्थानिवत्त्वेन प्रगृह्यत्वसिद्धि

रित्याहुः ॥ अन्येतु स्ववृत्तिश्रावणप्रत्यक्षविष-
यताबच्छेदकधर्म्मघटितधर्म्मनिमित्तकत्व स्ववृत्ति-
श्रावणप्रत्यक्षविषयताबच्छेदकधर्म्मावच्छिन्नस्थानि-
ता निरूपितादेशतावद्धर्म्मिकारोपप्रकारीभूतध-
र्म्मावच्छिन्नोद्देश्यताकत्वान्यतरसंसर्गेणाल्विशिष्टवि -
धौ स्थानिवत्त्वंनेत्यर्थो रामायेत्यादौ स्थानिसम्ब
न्ध्यलेकारवृत्तिश्रावणप्रत्यक्षविषयताबच्छेदकधर्म्मः
सुप्त्वंनभवतीति निषेधाप्राप्त्या स्थानिवत्त्वेन
सुप्त्वात्सुपिचेतिदीर्घः सिद्धः, तद्धानित्यत्राल् वृत्ति-
श्रावणप्रत्यक्षविषयताबच्छेदकानुनासिकत्व धर्म्म
घटितधर्मो व्यपदेशिवद्भावेना नुनासिकत्वमेव त-
न्निमित्तके यरोऽनुनासिकइति कर्त्तव्ये स्थानिवत्त्व
स्य निषेधात्, श्रीपच्छाये त्यादावल् वृत्तिश्रावण
प्रत्यक्ष विषयताबच्छेदकाच्त्वधर्म्मेण साक्षादवच्छि-
न्नस्थानितायाः सत्त्वाद्दीर्घादे रतिदेष्टुमशक्यत्वाद्दोषा
भावात्, अतिखट्वइत्यादौ निर्द्दिश्यमानत्वादेरल्वृ-
त्तिश्रावणप्रत्यक्षविषयताबच्छेदकत्वाभावादच्त्वस्य-
श्रावणप्रत्यक्षविषयताबच्छेदकत्वेऽपि हल्ङ्या
ब्भ्यइत्यादेरारोपप्रकारीभूताप्त्वधर्म्मेण साक्षादव

च्छिन्नोद्देश्यताकत्वाभावादो आविति प्रश्लेषकरणपरभाष्यं सङ्गतमेव, कुम्भकारेभ्य इत्यादौ निर्दिश्यमानत्वादेरग्रहीदित्यत्रापि तस्याल्वृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकत्वाभावेन निषेधाप्रवृत्तौ स्थानिवद्भावः सुलभः, लोम्नी इमे इत्यादौ स्थानिसंबन्ध्यौकारवृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकौत्वधर्म्माव-च्छिन्नाया स्थानिताया अभावात्, औङ्त्वावच्छिन्नस्थानितायाः सत्त्वे ऽप्यौङ्त्वस्याल्वृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकत्वाभावात्स्थानिवत्त्वेन प्रगृह्यत्वसिद्धिरिति प्राचीननवीननये मात्रादिपदनिवेशप्रयोजनविरहेण तन्निवेशस्यानावश्यकत्वादित्याहुः ॥

प्राचीनास्तु स्वोक्तमेकमेवोपरागमङ्गीकुर्वाणा भवतीत्यादौ लिट्चेति सूत्रारम्भसामर्थ्याल्लकारवृत्त्यार्द्धधातुकत्वं तिबादौ नैवायातीति ज्ञापयन्ति, सार्वधातुकसंज्ञानिवृत्तिप्रयोजनकंलिट्चेति सूत्रमभ्युपगच्छन्तस्तु रुदादिभ्यः सार्वधातुक इति सूत्रारम्भसामर्थ्यादेवोक्तार्थं ज्ञापयन्ति, रोदितिरित्यत्र श्तिप्रत्यये रुदादिभ्य इत्यस्य सार्थक्यमवगच्छन्तं पराजेतुमिच्छन्तो न ह्येकमुदाहरणमित्यादिभाष्याद्रुदादिभ्यः

श्तिप इति न्यस्यन्ति वस्तुतस्त्वर्द्धमात्रालाघवेना-र्द्धधातुकं शेष इत्यत्रार्द्धधातुकमशिदिति वक्तव्ये शेषग्रहणमत्र ज्ञापकम्। पूर्वस्माद्विधिः पूर्वविधिरिति पञ्चम्यन्तेन साकं समासमभ्युपगच्छतां नये धिन्वन्तीत्यादावप्युकारवृत्त्यार्द्धधातुकत्वस्य वकारादावानयने ऽपि प्राप्तस्येडागमस्य न सम्भवः, ननु निष्ठायां सेटीत्यत्र कारितमित्यत्रत्येडागमव्यावृत्त्यभावार्थं क्रियमाणं सेटीति पदं तत्रत्यपञ्चमीसमासाभावबोधकमन्यथा णिलोपस्य स्थानिवत्त्वादेकाच उपदेश इत्यस्याप्रवृत्तौ सेटीति पदं व्यर्थमेवेति चेन्न एकाच उपदेश इत्यत्र विहितविशेषणस्याभ्युपगमेन क्त प्रत्ययस्यैकाचोविहितत्वाभावेन निषेधाप्रवृत्तेः प्रविगणय्येत्यादावप्यल्लोपस्य पञ्चमीसमासे स्थानिवत्त्वात्प्रशमय्येति सिद्ध्यर्थं क्रियमाणस्य ल्यपि लघुपूर्वादित्यस्य प्रवृत्तिर्न्न स्यादित्यपि वक्तुमशक्यं व्यपदेशिवद्भावेन स्थानिवद्भावलब्धाकारस्यैव लघुपूर्वत्वाण्णरयादेशस्य सौलभ्यात् स्थानिभूताच्पूर्वाव्यवहितोत्तरस्यैव क्रियमाणे कार्य्ये स्थानिवत्त्वस्य वक्तुं शक्यतया हेगौरित्यत्रौकारव्यवधानात्सु

लोपाप्रवृत्तेस्तदर्थं पञ्चमीसमासानाश्रयणस्यापि व क्तुमशक्यत्वात् ॥ ननु, वेभिदितेत्यादौ भिदेर्यङ्न्तात्तृचि, इडागमनिषेधके एकाच इत्यत्र विहित विशेषणेन, मथितं पण्यमस्येति विग्रहे माथितिक इत्यत्र सन्निपातपरिभाषया, पचेर्णिचि अपीपचन्नित्यत्र सिजभ्यस्तेति सूत्रे विदिसाहचर्य्यादभ्यस्तादपि लङ एव झेर्जुस् विधानात्, प्रत्यैषिषन्नैनर्त्सन्नित्यादौ पूर्वोत्तरसाहचर्य्येण भावरूपादेशानपहृत विकरणकाभ्यस्तस्यैव ग्रहणाच्च दोषाभावसम्भवे पञ्चमीसमासाङ्गीकारस्यानावश्यकतया धिन्वन्तीत्यादावगतिरस्त्येवेति चेन्नवाहऊडिति सूत्रस्थोड्ग्रहणज्ञापितासिद्धपरिभाषया ऽऽर्द्धधातुकस्येडिति शास्त्रदृष्ट्या यणादेरसिद्धत्वात्तत्र वलादित्वस्य लब्धुमशक्यत्वात् न च भविष्यति गम्यादय इत्यादिनिर्द्देशात् न वृद्ध्यश्चतुर्भ्य इति सूत्रारम्भसामर्थ्याच्चेडागमे कर्त्तव्ये ऽसिद्धपरिभाषायाः प्रवृत्ति विरहबोधनात्कथमत्रेडागमाभाव इति वाच्यमनतिदिष्टप्रत्ययत्वावच्छिन्नोद्देश्यताके कार्य्ये कर्त्तव्ये ऽसिद्धपरिभाषायाः प्रवृत्त्यभावबोधनेनापि निर्द्दे-

शारम्भयोरुपपत्तौ सर्वत्रेडागमे कर्त्तव्ये परिभाषा याः प्रवृत्त्यभावबोधने मानाभावात्, न च नामी- ति सूत्रस्थभाष्यविरोधपरीहाराय परनिमित्तकत्व- रूपान्तरङ्गत्वे पूर्वनिमित्तकत्वाभाववत्त्वे सतीति निवेशे ऽपि चेडूह्रस्वादिति सूत्रस्थो नागेशग्रन्थश्चे नानवकाशत्वस्य सङ्ग्रह इति विरुद्ध एङ्ह्रस्वादि त्यस्यान्तरङ्गत्वाभावात् तद्ग्रन्थसङ्गतिं कुर्वतामपर निमित्तकादेशसम्पादकत्वरूपमन्तरङ्गत्वमङ्गीकुर्वतां- मते आर्द्धधातुकस्येडित्यस्यान्तरङ्गत्वाभावेन कथं वहिरङ्गस्य यणादेरसिद्धतेति वाच्यं धिन्विकृण्वोः शुङितिन्यासेन शित्वात्सार्वधातुकत्वे ङित्वादन्त्य स्यादेशेन धिन्वन्तीत्यादिसिद्धाविडागमरूपदोषस्य तन्मते कथमपि वक्तुमशक्यत्वादित्याहुः ❀ ❀ ❀

अचः परस्मिन्पूर्वविधौ,

नन्वत्र स्थानिवदित्यनुवृत्तेः सत्त्वेन स्थानिवच्छ ब्दमहिम्नैवा देशलाभादादेशतायामचः स्वनिष्ठ- स्थानितानिरूपितत्व सम्बन्धेनान्वयादिष्टार्थलाभ आदेशग्रहणमनुवर्त्तते तदनुरोधादित्यादि नागेशग्र न्थो ऽयुक्तएवेति चेन्न श्रुतानुमितयोरिति न्याये

नाचः परस्मिन्नित्यनेनान्वये ऽन्याशादिति पञ्चम्या ऽऽपत्तेः, आदेशग्रहणानुवृत्तौ तु तदर्थतावच्छेदक ज्ञानोत्थिताकाङ्क्षा निवृत्त्यनुरोधाच्छ्रुतानुमितयो-रिति न्यायम्बाधित्वा ऽच उक्तसम्बन्धेनादेशतायाम-न्वयद्वाराऽच इत्यस्य स्थानषष्ठ्यन्तत्वं सिध्यति, दे-वदत्तस्य पुत्र इत्यादौ देवदत्तस्वामिकान्यदीयपुत्र-प्रतीत्यभावाय निरूपकांशे नित्यसाकाङ्क्षारूपाव-च्छिन्न बोधकपदसमभिव्याहृतषष्ठ्या स्तदनुयोगि-क तत्प्रतियोगिकसम्बन्धविशेष बोधकत्वान्नप्रकृते षष्ठीस्थान इत्यस्य प्रवृत्तिः। केचित्तु सर्वे सेवका राजानं सेवन्ते न तु मिथः सेवां कुर्वन्तीति लौकि कोदाहरणमूलकेन "गुणानां च परार्थत्वादिति" न्यायेन षष्ठीस्थान इत्यस्याप्रवृत्ति मभ्युप यन्ति त-दपि दिग्योगलक्षणपञ्चमीप्रवृत्तेः एलासंस्कृताम्भ-सां परोपकारकत्वदृष्टान्तमूलकेन "गुणः कृतात्मसं-स्कारः प्रधानमनुरुध्यत इति" न्यायेन यस्मात्प्रत्य-यविधिरित्यादौ तस्मिन्नित्यादेः प्रवृत्तेस्तस्यासार्व-त्रिकत्वाच्च हेयम्। मीमांसकास्तु आधानप्रकरणोक्त यज्ञसंयुक्तवारणवैकङ्कतादिपात्राणां पवमानहविषा

मङ्गता ऽखिलस्य क्रतोर्वेति संशये "गुणानां च परार्थत्वादसम्बन्धः समत्वात्स्यादिति" जैमिनिलक्षणेन प्रधानयागाङ्गत्वदर्शनादत्रापि तथेति ब्रुवन्ति। ननु श्रुतानुमितयोरिति न्यायेन परस्मिन्नित्यस्याऽविशेषणत्वे ऽपि वव्रश्चेत्यत्र सूत्रस्य चरितार्थतया तत्त्यागो ऽनुचित इति चेन्न यातिरित्यादै परनिमित्तकस्याचो विरहेण स्थानिवत्त्वाप्रवृत्तौ नपदान्तेति सूत्रे यलोपग्रहणवैयर्थ्यापत्तेः, ननूपपदविभक्तेरिति न्यायेन यस्य च भावेनेति विहितां सप्तमीं बाधित्वौपश्लेषिकाधार एव सप्तम्या युक्तत्वेन निमित्तार्थकथनान्निष्प्रयोजनमिति चेन्न हरिणाकृतमित्यादौ स्थानिवत्त्वेन यणापत्तेः, जुहुत इत्यादौ श्लोः स्थानिवत्त्वेन यणापत्तेश्च,। यत्तु परसप्तम्यभ्युपगमे द्वौ द्वौ पादौ ददातीत्यर्थे द्विपदिकेत्यत्रानेन यस्येतीति वा लोपे रूपे वैलक्षण्यविरहेणात्रत्यलोपग्रहणस्य वैयर्थ्यापत्तिरित्युक्तं तन्न पादमत्तीति पादात् तत आख्यानेऽर्थे णिचि टिलोपे अत्वे च ततः क्विपि द्वौ द्वौ पदौ ददातीत्यर्थे द्विपाकेति सिद्धये लोपविधानस्यावश्यकत्वात् दकार-

स्य लोगे कर्त्तव्ये णिलोपस्य स्थानिवत्त्वे ऽपि वुनि
लोगविरहेण व्यवहिते ऽपि णौ पादशब्दान्तत्वाल्
लोपप्रवृत्तेर्दुर्वारत्वात् न चात्र दकारलोपे ऽपि पुनः
स्थानिवत्त्वेन पदादेशः स्यादिति वाच्यं णिज्नि-
मित्तकभत्वमादाय प्राप्तस्य पदादेशस्य लक्ष्ये लक्ष-
णन्यायेनाप्रवृत्तेः, अके भत्वे कर्त्तव्ये णिलोपस्य
स्थानिवत्त्वेन तन्निमित्तकस्य तस्यैवाप्रवृत्तेः। यदपि
नपदान्तसूत्रे चरां वैयर्थ्यमुपपादितं तदपि न
जक्षतुरित्यत्र सकारे लोपस्य सत्त्वेन स्थानिवत्त्व-
निषेधाय तस्य सार्थक्यात्। ननु राजानमाख्यदर-
राजदित्यत्राज्झल्स्थानिकेप्यादेशे ऽग्लोपित्वव्यव-
हारादत्राप्यज्झल्स्थानिके आदेशे ऽच्त्वव्यवहारा
पत्तावत उपधाया इत्यनेन मारयतीत्यत्र वृद्ध्य-
नापत्तिरिति चेन्नाचोऽत्र सामर्थ्यादेवाज्मात्रपरत्वे-
नादोषात् न चाचो ऽभावे वाल्यपीत्यनुनासिक-
लोपपक्षे आगत्येत्यत्र तस्य स्थानिवत्त्वेन ह्रस्व
स्येति तुगनापत्तिरिति वाच्यं हलादेशो न स्थानि
वदिति कल्पनयैव तत्र स्थानिवत्त्वाप्रवृत्तेः; नन्वत्र
किं मानमिति चेदत्र के चिदतोलोप इत्यत्रोपदेश

ग्रहणमितरथा ऽयतेः पर्यंतेश्च क्विपि लोपोऽन्योरिति यलोपे ह्रस्वस्येति तुकि, अत् पदित्यादावल्लोपे कर्त्तव्ये यलोपस्य स्थानिवत्त्वेन लोपाप्रवृत्ते स्त-द्वैयर्थ्यं स्पष्टमेवेत्याहुस्तन्न रातेः क्ते, रातमेतीत्यर्थे रातोपपदादेतेः क्विपि ह्रस्वस्येति तुकि, रातेच्छ-ब्दादाचक्षाणण्यन्ताल्लुङि च्लेश्चङादेशे ऽग्लोपित्वा-भावान्नाग्लोपीति निषेधाप्रवृत्त्या णौ चङीत्यादि-ना ह्रस्वादिषु कृतेष्वरीरतदित्यादौ क्तप्रत्यये ऽल्लो-पाभावाय तस्य चारितार्थ्यात्, बहिर्भूतणिचङा-दिनिमित्तकोपधाह्रस्वस्य बहिरङ्गत्वेनासिद्धत्वं तु वक्तुमशक्यं नाजानन्तर्य्य इति निषधात् रातेः क्ते रातशब्दादाचक्षाणण्यन्ताल्लुङि अरीरतदिति तु न भवितुमर्हति णिच्यल्लोपे ऽग्लोपित्वान्ना-ग्लोपीति निषेधात् न चातो लोप इति सूत्रे प्र-तिपदोक्तस्यास्य ग्रहणेनात्र निर्वाह आदेच उपदेशे ऽशितीत्यत्रोपदेशग्रहणस्य विधायेति प्रत्युदाहरण-परभाष्यप्रामाण्येन वर्णग्रहणे तस्या अप्रवृत्तेः, ओ-दिति सूत्रस्थभाष्यप्रामाण्येन वर्णग्रहणे ऽपि तस्याः प्रवृत्तौ वृत्रहभ्यामित्यादौ ब्रह्मभ्रूणवृत्रेष्विति क्विपि

न लोपे ऽकारलोपनिवारणायोपदेशग्रहणस्यावश्यक-
त्वात्, न च नलोपः सुबिति सूत्रे कृति तुग्ग्रहणं
व्यर्थमिति वाच्यं जुनादिधातोः क्विपि नलोपे जु-
भ्यामित्यादौ तस्य सावकाशत्वात् नापि नपदान्ते
ति सूत्रे वरेग्रहणं हलादेशो न स्थानिवदित्यत्र ज्ञा-
पकं पिसतेरिगुपधलक्षणे के तत आचारक्विवन्ता
त्कर्त्तरि क्विप्पल्लोपे तत आचारक्विबन्ताद्रुचि लघू
पधगुणे पेस्वर इत्यत्र लघूपधगुणे कर्त्तव्ये परनिमि-
त्तकस्यातोलोपस्य स्थानिवत्त्वाद्गुणो न स्यात् ह्रस्व
नद्याप इति सूत्रे किमिदं सर्वेषामामां ग्रहणमपि
कस्य चिदेवेति प्रश्ने कासूप्रत्ययादिति विहितस्या
मः सानुबन्धकत्वान्न ग्रहणमित्युदितम् न च प्रयो-
जनाभावान्न सानुबन्धकतेति वाच्यमित्संज्ञाऽभाव
प्रयोजनस्य विद्यमानत्वात् न चेत्कार्य्याभावादत्रे
त्संज्ञा न भवेदिति वाच्यं मिदचोन्त्यादित्यनेना-
न्त्याचः परस्य कार्य्यस्य सत्वात् न च प्रत्ययान्ता-
दामो विधानान्नास्ति विशेषो मिदचोन्त्यादिति
परत्वे प्रत्ययः पर इति वा परत्वे इति वाच्यमिजा-
देश्च गुरुमत इत्यनेनोहतेर्लिटि मध्ये आमि यणादे-

शप्रसङ्गः स्यादित्युक्तं हलन्तेभ्य आचारक्विबन्तेभ्य आमो विधाने इत्संज्ञायामनित्संज्ञायां वा फलविशेषदर्शनेन नास्ति विशेष इति भाष्यस्य कुकविकृतकाव्यस्येवोपेक्षा स्यात्तन्निराकरणाय कैयटदर्शितमार्गेण हलन्तेभ्य आचारक्विबभावस्याभ्युपगमेऽत्रापि हलन्तेभ्य आचारक्विबभावे यातेर्यङन्ताद्विचि अकारायकारयोर्लोपे ऽल्लोपस्य स्थानिवत्त्वेनाकारलोपस्तु न यलोपस्य स्थानिवत्त्वात्, ततो नंपुंसकाशब्देन यायः समासे सवर्णदीर्घे क्लीवह्रस्वे, यायशब्दस्य पुनरकारान्तयशब्देन समासे, याययशब्दादाचारक्विबन्ताद्विचि अकारयकारयोर्लोपे यायशब्दादाचारक्विबन्ताद्धरचि अकारयकारयोर्लोपे कर्त्तव्ये प्राप्तस्याचः परस्मिन्निति यकाराकारलोपस्थानिवत्त्वस्य निषेधसम्पादनद्वारा यावर इति प्रयोगसिद्ध्येतस्यावश्यकत्वात् स्थानिभूतादचः पूर्वत्वेन दृष्टत्वाभावात्स्थानिवत्त्वाप्रवृत्तिस्तु वक्तुमशक्या समासीययकारात्पूर्वत्वस्य धातुघटकयकारे सत्वात् वरेलुप्तमित्यस्य वरजव्यवहितपूर्वस्य लुप्तस्य स्थानिवत्त्वं नेत्यर्थाडुक्तस्थले विचि लोपे

ऽपि स्थानिवत्त्वनिषेधसौलभ्यात् नापि विश्व इत्यत्र गुणव्यावृत्तये क्रियमाणं यजयाचेत्यत्र नङो ङित्वकरणं हलादेशो न स्थानिवदित्यत्र ज्ञापकं, विश्वशब्दाचारक्विबन्तादात्मनपदसिद्धये तस्यावश्यकत्वात्, न च ब्राह्मणमाणववाडवाद्यनिति सूत्रस्थं, केदाराद्यञित्यतो यञित्यनुवृत्त्यासिद्धे यन् ग्रहणमन्यतो ऽपि विधानार्थन्तेन पृष्ठादुपसंख्यान मिति नापूर्वमित्यभिप्रायकं भाष्यमलंकुर्वतां यनि यञि च फलभेदं पश्यतां मते उक्तभाष्यबलात्प्रातिपदिकनिष्ठानुबन्धप्रयोज्यमात्मनेपदं न भवतीति कल्पनान्नात्मनेपदमत्र भवितुमर्हतीति वाच्यं ब्राह्मण्यादिप्रकृतिकाचारक्विबन्तात्तदभावकल्पनेनापि भाष्यसाङ्गत्यात्। अन्ये तु पृच्छतेः क्विपि ग्रहिज्येति सम्प्रसारणं बाधित्वा परत्वात्सतुकः शादेशे ततः सम्प्रसारण पूर्वरूपयोस्तत आचारक्विबन्ताद्यजयाचेति नङि गुणनिषेधाय तस्य चारितार्थ्यात्, शादेशोत्तरजायमानस्य सम्प्रसारणस्य स्थानिभूतात्पूर्वत्वेनादृष्टत्वात्स्थानिवत्त्वाप्रवृत्तिः;हलन्तेभ्य आचार क्विपो ऽभावस्य सर्वत्राभ्युपगमे मानाभावादित्याहुः

नापि धिन्विकृण्वोरिति सूत्रेण लोपे विधातव्ये ऽकारविधानं तत्र ज्ञापकं धिन्विकृण्वोरिति विहितवलोपस्य परनिमित्तकत्वाभावेन स्थानिवत्त्वा प्राप्त्या धिनोतीत्यत्राल्लोपस्य स्थानिवत्त्वप्रयुक्तगुणाभावसम्पादनद्वारा तस्य सार्थक्यात् परसत्ताधीनसत्ताकत्वस्य परनिमित्तत्वेनात्र परनिमित्तकत्वे तु पादशतस्येति वुन्सन्नियोगशिष्टस्य लोपस्यापि परनिमित्तकत्वात्स्थानिवत्त्वेन पदादेशानापत्तेः, शब्विषय इत्यनेन तदीयनिमित्तमप्युप्रत्यय एव निमित्तं न तु लोपे, वस्थान उकारादेशे तु धिनु इत्यादावुतश्चेति हेर्लुङ्नस्यात्, नापि यून इत्यादौ पूर्वस्य यणः सम्प्रसारणनिषेधाय कृतं न सम्प्रसारण इति सूत्रमत्र ज्ञापकं भवितुमलम्, अन्त्यबाधे ऽन्त्यसदेशस्येति परिभाषयोदाहरणं संसाध्य भाष्ये तस्यप्रत्याख्यानात्, न च स्वप्रागभावाधिकरणक्षणवृत्तित्व स्वघटितसमुदाय घटकवर्ण प्रागभावाधिकरणक्षणावृत्तित्व सम्बन्धाभ्यामन्त्यविशिष्टत्वस्यैवान्त्यसदेशत्वेन कथमनया निर्वाह इति वाच्यं द्वितीयसम्बन्धं वि हाय स्वप्रा-

गभावराधिकरणक्षणवृत्ति प्रवर्त्तनीयशास्त्रोद्देश्यव-
र्णप्रागभावाधिकरणक्षणावृत्तित्व संसर्गनिक्षेपेण त-
स्य सम्भवात्। न चाज्झल् स्थानिकादेशस्य स्था
निवत्त्वे भवितेत्यादौ डाप्रत्ययनिमित्तक टिलोप-
स्य स्थानिवत्त्वेन लघूपधत्वाभावादेव गुणाप्रवृत्तौ
तन्निषेधाय क्रियमाणेन दिधीवेवीटामित्यत्रत्येड्ग्र-
हणेनाज्झलादेशो न स्थानिवदिति ज्ञापनादज्मा-
त्र स्थानिकादेशस्यैव स्थानिवत्त्वलाभ इति वाच्य-
म्, अततेः किरतेश्च लुङि आतिषमकारिषमित्य-
त्र गुणनिषेधाय तस्य चारितार्थ्यात्, दिधीवेवीटा
मित्यत्रेड्ग्रहणस्य भाष्ये प्रत्याख्यातत्वेन तस्य ज्ञा-
पकताया वक्तुमशक्यत्वाच्च,। नन्वरराजदित्यत्र
राजानमाख्यदित्यर्थे णिचि टिलोपस्य स्थानिवत्त्वे
न णौचङीत्युपधाह्रस्वाप्रवृत्तौ तन्निषेधाय क्रियमा-
णं नाग्लोपीत्यत्राग्ग्रहणं व्यर्थं सदुक्तार्थे ज्ञापकम-
स्तु न चाज्ग्रहणसामर्थ्यादज्मात्रस्थानिकादेशस्य
स्थानिवत्त्वाभावज्ञापनयैवाररामदित्यादौ ह्रस्वव्यावृ
त्त्यर्थमग्ग्रहणं चरितार्थमिति वाच्यं यातेर्यङन्तात्
क्विपि यातिरित्यादौ स्थानिवत्त्वप्राप्त्यभावेन त-

न्निषेधाय क्रियमाणमुत्तरसूत्रे यलोपग्रहणं व्यर्थमे-
मेव स्यात्, न चावीवददित्यादौ ण्यन्ताण्णिचि
स्थानिवत्त्वनिषेधाय चङ्परनिर्ह्रासकुत्वेष्वित्यस्या-
वश्यकतया ऽरराजदित्यादावप्युपधाह्रस्वे स्थानिव-
त्त्वनिषेधाद्ध्रस्वव्यावृत्तये ऽग्ग्रहणं चरितार्थमिति वा-
च्यम् उपधाह्रस्वत्वे णे णिंच्युपसंख्यान मित्यनेना
वीवददित्यादि सिद्धावुक्तवार्त्तिके चङ्परनिर्ह्रासग्रह
णस्य निष्प्रयोजनत्वात्, किञ्च किल्ग्लुपधादिति
णिलोपस्थानिवत्त्वस्यैव निषेधकन्न तु टिलोपस्था
निवत्त्वस्यात एवोक्तवार्त्तिक माश्रित्योपधाह्रस्वत्वे
णेर्णिंच्युपसंख्यानमित्यस्य प्रत्याख्यानमपि सङ्गच्छते
ऽन्यथा रामशब्दै शब्दयोः समासे तत आचक्षाण
ण्यन्ताल्लुङि ह्रस्वतदभावप्रयुक्तफलभेदस्य स्पष्ट-
तया तदसंगतिः स्पष्टैवेति चेन्न तनोतेर्डुः सन्वच्चे
ति निष्पन्न तितउशब्दाण्णिचि वृद्धेर्लोपस्य वली
यस्त्वादुकारलोपे स्थानिवत्त्वेनोपधात्वादतो वृद्धौ
पुकि तितापीति ण्यन्ताल्लुङि, अतितितापदित्या
दावुपधाह्रस्वव्यावृत्तये ऽग्ग्रहणस्य चारितार्थ्यात्
स्थानिवत्त्वेनोपधाह्रस्वव्यावृत्तिस्तु न सम्भवति वृ-

द्धेरुकारलोपोत्तरं जायमानत्वेन स्थानिभूतादचः पू-
र्वत्वेनादृष्टत्वात्, यच्च ठाजादावूर्द्ध्वं द्वितीया दच इति
वार्त्तिकमुक्तविषये प्रमाणमुक्तमितरथा षड़ङ्गुलयो
यस्येति षड़ङ्गुलिस्तेनदत्तः षड़ङ्गुलिदत्त स्ततष्ठचि
ठस्येक इतीकादेशे एकाक्षर पूर्वपदाना मित्यनेनाङ्गु
लिदत्तस्य लोपे ऽङ्गुलिदत्तलोपस्य स्थानिवत्त्वेन
षान्ते भत्वाप्रवृत्त्या स्वादिष्विति पदत्वे कर्त्तव्ये पदा
न्तविधौ स्थानिवत्त्वनिषेधात्षान्ते पदत्वे जश्त्वे षडि
क इति सिद्धौ तद्वैयर्थं स्पष्टमेवेत्युक्तं तन्न उक्तस्थले
ङ्गुलिदत्तस्य लोपेयस्येति चेति लोपे कर्त्तव्ये तस्य
स्थानिवत्त्वात् षडेक इति सिद्धये तस्य सार्थक्यात्
षण्णामुमादत्तः षडुमादत्तस्ततष्ठचि ठाजादावित्य
नेन मादत्तस्य लोपे यस्येति चेति लोपाप्रवृत्त्या
षडुइक इति रूपसम्पत्तये तस्य चारितार्थ्याच्च ओ-
र्गुण इति गुणे षड़विक इति तु न सम्भवति माद
त्तलोपस्य स्थानिवत्त्वात्, षण्णामुः षडुः मया दत्तो
मादत्तः षडुश्चासौ मादत्तश्च षडुमादत्तस्ततष्ठचि ष
डविक इत्येव भवति ओर्म्मादत्तस्य च पदत्वेन न
पदान्तेति निषेधात्, अल्लादेशे कर्त्तव्ये ऽपि न त-

स्य स्थानिवत्त्वं पदान्तविधौ तन्निषेधात्, यदप्येका क्षरपूर्वपदानामिति वार्त्तिकं प्रमाणमुक्तमन्यथा वागाशीर्दत्तो वाचिक इत्यत्राशीर्दत्तस्य शीर्दत्तस्य वा लोपे वागिक इत्यस्यैव सम्भवेन तद्वैयर्थ्यं स्पष्टमेवेति तदपि न वागिक इति सिद्धये तस्य चारितार्थ्यात् ठाजादावित्यनेन तु नैतत्सिद्ध्येत् यस्येति चेति लोपे कर्त्तव्ये शीर्दत्तलोपस्य स्थानिवत्त्वात्, नापि नधात्विति सूत्रस्थं यस्य हल इत्यत्र योगं विभज्यलोलुव इत्यादि प्रयोगं साधयद्भाष्यमुक्तार्थे प्रमाणं भवितुमर्हति, उपायस्योपायान्तरादूषकत्वात्, न धातुलोप इति सूत्रन्तु भाष्ये प्रत्याख्यातमेवातो न तदपि प्रमाणं वक्तुं साम्प्रतमत्रोच्यते पर्य्याप्तिनिवेशस्य सर्वत्रौत्सर्गिकत्वेनाच्त्वप्रतियोगिकपर्य्याप्त्यनुयोगितावच्छेदकीभूतधर्म्मावच्छिन्नानुयोगिताकपर्य्याप्तिप्रतियोगिभूतधर्म्मावच्छिन्नस्थानिताकादेशस्य स्थानिवत्त्वादुभयस्थानिकादेशस्य स्थानिवत्त्वाप्रवृत्तेरेतत्फलित एवायमर्थो ऽच एवादेशो ऽजादेशः, अन्ये तु अब्भक्षो वायुभक्ष इत्यत्रान्तरेणाप्येवकारमप एव भक्षयति वायुमेव भक्षयती-

ति प्रतीतिवदत्राप्यज्मात्रस्थानिकादेशस्य स्थान-
वत्त्वलाभ इत्याहुः, न चाज्मात्रस्थानिकादेशस्यैव
स्थानिवत्त्वे यून इत्यादावुकारद्वयस्थानिकदीर्घस्या
ज्मात्रस्थानिकत्वाभावात्सम्प्रसारण निषेधाप्रवृत्त्या,
न सम्प्रसारण इत्यस्य वैयर्थ्यापत्तिरिति वाच्यम्,
अज्मात्रारम्भकसमुदायस्थानिकादेशस्येत्याद्यर्थकर-
णेनादोषात्, न चैवं पटितीत्यत्र पररूपस्याज्मात्रा
रम्भक समुदायस्थानिकत्वविरहेण स्थानिवत्त्वा प्रवृ
त्त्यैकदेशविकृतन्यायेन पटः पदत्वाज्जश्त्वापत्तिरि
ति वाच्यम् उक्तन्यायेन पदत्वानतिदेशात् तेन घ
टानयनमित्यत्र जश्त्वं नेति केचित्, ॥ ननु सुण्ड
मिश्रेति सूत्रे, हलिकल्योरदन्तत्वनिपातनाद्वृद्धौ
सत्यां टिलोप इति ज्ञापने, नाग्लोपीत्यत्रागिति प्र-
त्याहाराश्रयणस्य वैयर्थ्यमुपपाद्य, वृद्धेर्लोपो बली-
यानिति ज्ञापयतो ऽचीकदित्याद्युदाहरणवशाण्णय-
तिरिक्तस्थानिकवृद्धेरेव बलवत्त्वं बोधयतो ऽपि भा
ष्यकृतो वचनममारादित्यादौ णिजन्तान्मरुच्छन्दा
ल्लुङि प्रत्याहाराश्रयणस्य चारितार्थ्येन विरुद्ध परि
जिहीर्षुणा ऽवश्यमिदुदुपधेभ्यो णिचो ऽनभिधानं

कल्पयितव्यमेवञ्च मारयतीति नागेशोक्तं फलम-
युक्तमेवेति चेन्न तस्य भवन्तमाचष्टे भावयतीत्या-
दे रुपलक्षकत्वात्, ननु युवानमाचष्टे णिचि युवा-
ल्पयोरिति कन्नादेशे कनयति, स्रग्विणमाचष्टे स्र-
जयतीति च भाष्यप्रयोगेण णिच् प्रयोज्यादुपधा
त्ववतो वृद्धिर्न्नेति कल्पनाद्धातुत्वप्रयोजकप्रत्यय
प्रयोज्यादुपधात्ववतो वृद्धिर्न्नेति कल्पनाद्वाभवय-
तीत्यस्यैवेष्टत्वान्नात्रापि फलमिति चेन्न श्रीमतीं
श्रीमन्तं वा ऽऽचष्टे श्राययतीत्यस्योपलक्षकत्वात्,
तत्रेदुदुपधेभ्यो णिचो विरहेण, णिच्प्रयोज्यादुप
धात्ववत्त्वविरहेण, धातुत्वप्रयोजक प्रत्यय प्रयो-
ज्यादुपधात्ववत्ताविरहेण वा कल्प्यत्रयविषयाभावा
त्, उक्तभाष्यबलेन प्रत्ययप्रयोज्यादुपधात्ववतो
वृद्धिर्न्नेति कल्पयितुमशक्यं रञ्जतेर्घञि नलोपे राग
इत्यत्र भञ्जेश्चिणीति नलोपे ऽभाजीत्यत्रचवृद्ध्यना-
पत्तेः, के चित्तु प्रीयतेरिगुपधलक्षणे के प्रियशब्द
यशब्दयोः समासे तत आचारक्विबन्तात्कर्त्तरि क्वि
पि, अल्लोपयलोपयो र्ह्रस्वस्येति तुकि कर्त्तव्ये
स्थानिवत्त्वस्य न पदान्तेति निषेधात्तुकि, प्रिय-

च्छन्दाणिणिचि टिलोपे ततः क्विपि णिलोपयलोपयोस्त त आचारक्विबन्तात्लडादौ णिलोपस्य स्थानिवत्त्वे न लघूपधगुणे प्रयतीत्यत्र टिलोपस्य स्थानिवत्त्वेन गुणो न स्यात्, णिलोपस्य स्थानिवत्त्वेनाचो ञ्णितीति वृद्धिस्तु न अन्तर्भूतणिनिमित्तकवृद्ध्यपेक्षया बहिर्भूतक्विब् निमित्तकयलोपस्य बहिरङ्गतया ऽसिद्धत्वात्, नाजानन्तर्य्यइत्यस्य तु न प्रवृत्तिः ञ्णितोऽङ्ग विशेषणत्वात्, गुणे कर्त्तव्ये यलोपस्य न बहिरङ्गासिद्धत्वम् अन्तर्भूतक्विब् निमित्तक यलोपापेक्षया बहिर्भूत शम्निमित्तकत्वेन गुणस्यैव बहिरङ्गत्वात् लघूपधगुणे कर्त्तव्ये ऽल्लोपस्य स्थानिवत्त्वं तु न अल्लोपस्य परपदस्थाजादेशत्वेन न पदान्तेति निषेधात् यद्वा प्रियमततीति प्रियात् तत आचक्षाणण्यन्तात्क्विप्याचारक्विबन्तात्तिबादौ प्रयतीत्यत्र टिलोपस्य स्थानिवत्त्वेन गुणो न स्यादित्याहुः; अन्ये तु मृऋतमाचष्टे मारयतीत्यत्र कृऋतमाचष्टे कारयतीत्यत्र च वृद्ध्यनापत्तिः इगुपधेभ्यो णिचो ऽनभिधाने मायाविनमाचष्टे मायापयतीति न स्यात्तस्यापीगुपधत्वात् ततो नाग्लो-

पीति सूत्रविषय एव णिचो ऽनभिधानतया वक्त-व्यत्वादित्याहुः, वस्तुतस्तु लुङ्यवेदुदुपधेभ्यो णिचो ऽनभिधानेन मारयतीति फलमपि सम्यगेव ॥ नचावीवददित्यादौ ण्यन्ताण्णिचि णेर्लोपे स्थानिवत्त्वाप्रवृत्त्या वार्त्तिके चङ्परनिर्ह्रासग्रहणं मुधैवेति वाच्यं प्रायोगिकाच्स्थानिकादेशग्रहणेनादोषात् न च जुहुत इति प्रतीकमुपादाय श्लोः परनिमित्तत्वाभावेन शप्त्वेन स्थानितया ऽजादेशत्वाभावेन च शप्त्वमाश्रित्य न गुण इति नागेशग्रन्थो विरुद्धो भवेदिति वाच्यं द्वितीयहेतावरुचिबोधनायैव चं-स्योपादानमिति केचित्। अन्ये तु तत्रान्तरङ्गावपी त्संज्ञालोपौ बाधित्वा ऽन्तरङ्गानपीति न्यायेन श्लो-रेव प्रवृत्तेः न चात्र लुको ऽभावात्कथं तन्न्यायप्र-वृत्तिरिति वाच्यं तत्र लुको लुगिवाचरतीत्यर्थकत्वा-दित्याहुः, वस्तुतस्तु लुकि न स्थानिवदिति वार्त्ति-कवलादित्संज्ञालोपयोस्तदप्रवृत्तेरावश्यकतया द्विती यहेतुकथनमयुक्तमेव। नन्वत्राज्ग्रहणं किमर्थं न च घूत्वेत्यादौ यणि कर्त्तव्ये ऊठः स्थानिवत्त्वं स्यादिति वाच्यं यणिवधावचो निमित्तत्वेनादेशत्वाभावात्स-

मुदायस्यैवादेशत्वात्, आदेशावयवस्यादेशपदेनग्रह णन्तु वक्तुमशक्यं मुख्यग्रहणसम्भवे गौणग्रहण स्यायुक्तत्वात् न च ख्याञादीनामनुबन्धवियु-क्तानांधातुसंज्ञान स्यादितिवाच्यं घस्लादेशेस्य-लृदित्वाद्धातुप्रयुक्तकार्य्यकल्पनात् नापि विश्न इत्यादौ तुगव्यावृत्त्यर्थन्तदन्तरङ्गत्वात्तुगागमे ततः शादेशे सतुकश्छस्य स्थानिवत्त्वेन पुनस्तु गा-गमाप्रवृत्तेः, नाप्याक्राष्टामित्यादौ स्थानिवत्त्वेन षढोः कः सीत्यस्यप्रवृत्तिः पूर्वत्रासिद्धे नेति निषेधादिति चेन्नागत्येत्यादौ मलोपस्य स्थानिव-त्त्वेन ह्रस्वस्येति तुग्नस्यात् ॥ ननु परस्मिन्ग्रहणं किमर्थम्, कथयतीत्यादिषु तदभावे ऽपि स्थानिव-त्त्वादकारस्य वृद्धेर्वारयितुं शक्यत्वादिति चेन्न युवतिर्जाया यस्येति बहुव्रीहौ जायाया निङिति जायाशब्दाकारस्य निङादेशे लोपो व्योरिति यलो-पे युवजानिरित्यत्रापरनिमित्तकाकारस्थानिकनि-ङादेशस्य स्थानिवत्त्वाद्वलपरत्वाभावेन लोपो व्यो-रिति लोपानापत्तेः, न च नपदान्तेति सूत्रेण य लोपे कर्त्तव्ये स्थानिवत्त्वस्यनिषेधः स्वरदीर्घयलोपेषु

लोपाजादेश एव न स्थानिवदिति भाष्योक्तेः, न च निङादेशस्य स्थानिवत्त्वेन स्थानिभूताकारवृत्त्यच्त्वारोपे ऽपि निङादेशघटकनकारे वत्त्वस्य स्वतः सिद्धतया यलोपो दुर्वार एवेति वाच्यम् आदेशो न जातः स्थानी न निवृत्त इत्येतत्सम्भावनायां यत्प्राप्नोति तद् भवतीत्यर्थस्यैव सिद्धान्तितत्वात्, यत्तु जायाया निङित्यत्र जायाया जानिरिति न्यासे जायाशब्दस्य जान्यादेशे युवजानिरित्यादिसिद्धौ नागेशोक्तं तत्फलमयुक्तमिति तदसत् जायाशब्दादाचक्षाणण्यन्तात्क्विपि युवतिर्ज्जा यस्येति बहुव्रीहौ युवजाशब्दस्यानुमानिकस्थान्यादेशभावेन जायान्तबहुव्रीहित्वस्य सत्त्वेन जाघटकाकारस्य निङादेशे युवज्निरिति प्रयोगस्यासिद्ध्यापत्तेः, जायाया जानिरिति न्यासेतु युवजानिरित्यस्यैव साधुत्वसम्भवात्, यदि चोक्तयुवज्निरिति प्रयोगे राद्धान्ते ऽपि निङादेशो न सम्भवति णिलोपस्याचः परस्मिन्निति स्थानिवद्भावेन जायान्तबहुव्रीहेरभावादित्युच्यते तदा पूर्वोक्तजाशब्दस्याऽऽशब्देन समासे दीर्घे ततो बहुव्रीहौ युवज्निरित्यत्र

युवजानिरित्यापत्तेः, अत्र निङादेशे कर्त्तव्ये स्थानिवद्भावो वक्तुमशक्यः कृतदीर्घस्य जाशब्दस्य स्थानिभूतादचः पूर्वत्वेन दृष्टत्वाभावात्, कृतदीर्घे जाशब्दे जाशब्दत्वमन्तवद्भावेन, ननु जायाया निङित्यत्र जायाया निङ्लोपश्चेति न्यासेन जायान्तस्यबहुव्रीहेर्निङागमो भवति अन्त्यस्य लोपश्चेत्यर्थकेन युवजानिरिति युवज्निरितिचाचक्षाणण्यन्तादौ सिद्धौ व्यर्थमेवेदं परस्मिन्निति चेदत्रोच्यते वैयाघ्रपद्य इत्यादौ व्याघ्रस्येव पादावस्येति बहुव्रीहौ पादस्य लोपो ऽहस्त्यादिभ्य इति लोपे व्याघ्रपादोऽपत्यमित्यर्थे ष्यञि न य्वाभ्यामित्यैजागमे पादः पदिति पदादेशे कर्त्तव्ये ऽल्लोपस्य स्थानिवद्भावात्पदादेशो न स्यात्, न च पादः पदिति सूत्रारम्भसामर्थ्यादेवाकारलोपस्य स्थानिवद्भावो न भवेदिति वाच्यम् पादमततीति पादात् तमाचष्टे णिचि पदयतीत्यादि प्रयोगसम्पत्तये तस्य चारितार्थ्यात्, अत्राज्मात्रस्थानिकादेशत्वाभावेन स्थानिवत्त्वाप्रवृत्तेः, न च पादस्य लोप इत्यत्र पादस्य पादहस्त्यादिभ्य इति न्यासेन वैयाघ्रपद्य इत्यादौ न दोष इति

वाच्यम् पादमतति पादात् तस्मादाचक्षाणण्यन्तात्क्विपि व्याघ्रस्येव पादावस्येति बहुव्रीहौ पादस्य लोप इत्यन्तस्य लोपे व्याघ्रपा इति प्रयोगसम्पत्तये तस्य चारितार्थ्यात्, पादस्य पादादेशकरणे दकारान्तप्रयोगापत्तेः, न च णिलोपस्य स्थानिवद्भावादेव तत्र लोपो न स्यादिति वाच्यं पादः पदिति सूत्रे प्रतिपदोक्तस्यैव पादो ग्रहणापत्तौ द्विपदिकेत्यादौ पदादेशानापत्तेः, लोपविधाने तु प्रतिपदोक्तस्य पादो ऽभावाल्लाक्षणिकानामेव ग्रहणम्, द्विपदिकेत्यादौ भाष्योक्ते परस्मिन्नित्यस्याभावे पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्चेति विहितलोपस्य स्थानिवत्त्वं तु वक्तुमशक्यं लोपविधानसामर्थ्यात् द्विपादिकेति प्रयोगस्तु यस्येति चेति लोपेनापि सेत्स्यति, न च पादमतति पादात् ततआ चक्षाणण्यन्तात्क्विपि द्वौ द्वौ पादौ ददातीत्यर्थे ऽनेन वुनि लोपे च द्विपाकेति रूपसम्पत्तये लोपविधानं चरितार्थमिति वाच्यं पुनर्ल्लोपवचनसामर्थ्यात्स्थानिवद्भावो न भविष्यतीति भाष्यप्रामाण्येन तस्यानभिधानात् भाष्यप्रामाण्यादविकृतादेव पादादनेन

वासुन्विधानात् ननु पादस्य दस्य दृशहस्त्यादिभ्य इति न्यासेन शित्त्वात्कृत्स्नस्य दस्य दादेशे वैयाघ्र-पद्य इत्यत्रापि न दोष इति चेन्न आदीध्य इत्यादौ टेरेत्त्वस्य स्थानिवत्त्वाद्यीवर्णयोरिति लोपापत्तेः, ननु यकारसाहचर्य्याच्छ्रूयमाण इकारे लोपविधाना-दिकारप्रश्लेषादिकारे ऽनतिदिष्ट एव लोपविधानाद्वा प्रकृते न दोष इति चेत्, हरिणेत्यत्र स्थानिवत्त्वेन यणापत्तेर्द्दोषत्वात्, विष्णौ नेति निर्द्देशात्सन्धिका-र्य्ये सन्निपातपरिभाषाया अप्रवृत्तेर्न्न तया ऽत्र नि-र्वाहः, न चाङि नुगस्त्रियामिति न्यासेन नात्र दोष इति वाच्यम्, अमुना कुलेनेत्यत्र नुकि कर्त्तव्ये मुत्वस्यासिद्धत्वात्तदनापत्तेः, न च न मु न इत्यत्रा कारस्योच्चारणार्थकत्वेन, नभावे कर्त्तव्ये ऽसिद्धत्वा भावबोधनेनात्रापि न दोष इति वाच्यम् अमुष्मैकुला येत्यत्रनुमि कर्त्तव्ये मुत्वस्यासिद्धत्वाभावेन स्माया देशानापत्तेः, ननु न मु नुकीति न्यासेनैव सर्वत्र निर्वाह इति चेन्न अस्मा इत्यत्र स्मायादेशस्य स्थानि वत्त्वेनहल्ङ्यादिलोपानापत्तिः, ननु अनाप्यक इत्यत्रान् द्यौसोरिति न्यासेन हलि लोप इत्यत्रापि लोप इति

न्यासेन हलग्रहणपरित्यागे न सर्वत्र निर्वाह इति चेन्न रामायेत्यत्रयादेशस्यस्थानिवत्त्वेनायञादित्वाद्दीर्घा नुपपत्तिः, स्वरदीर्घयलोपेषु लोपाजादेश एव न स्थानिवदित्युक्तेर्न्न दीर्घे कर्त्तव्ये निषेधसम्भवः, ननु ङेय्र्य इत्यत्र ङेरय इति न्यासेनाकः सवर्ण इति दीर्घे रामाये त्यत्र न दोषः भत्वेन पदत्वस्य बाधात्पर रूपापत्तिस्तु वक्तुमशक्या ऽकारोच्चारणसामर्थ्यादेव तस्य बाधादिति चेन्न वित्त इत्यादौ शल्लुकः स्थानिवत्त्वे नगुणापत्ति लुकि न स्थानिवदिति वक्तुमशक्यं लुकि परे ऽजादेशस्यैव तेन निषेधेन नास्य तेनापि सिद्धिः। केचित्तु जुहुत इत्यत्र स्थानिवत्त्वे न हुश्नुवोरिति यणापत्तिरित्यूचुस्तन्न प्रत्ययलोपसूत्र स्य नियमार्थत्वेन न लुमताङ्गस्येत्यस्य स्थानिवत्सूत्रस्यापि निषेधत्वाङ्गीकारात् अज्मात्रस्थानिका देशाभावाच्च न स्थानिवत्त्वस्य सम्भवः, ननूतोवृद्धि रिति सूत्रारम्भसामर्थ्येन शल्लुकः स्थानिवद्भावो न भवतीति कल्पनेन वित्त इत्यादिषु न दोष इतिचेन्न द्यूतिरित्यत्र दिवेः क्तिनि च्छ्वोरित्यूठि कर्त्तव्ये उकारलोपस्य स्थानिवत्त्वाद्ऊठो ऽनापत्तिरिति ज्ञेयम्॥

अन्ये तु ज्ञाने इत्यादौ यस्येति चेत्यकाग्लोपाभावाय क्रियमाणस्यौङः श्यामिति वचनस्यसामर्थ्यादपरनि मित्तकाजादेशो न स्थानिवदिति ज्ञापनेनैवेष्टसिद्धौ परस्मिन्ग्रहणं निरर्थकमेवेति तन्न वार्तिकप्रतिपाद्या र्थस्य सूत्रकृत्तात्पर्य्यागोचरत्वेनैवं सूत्रैकदेशखण्डन स्यानुचितत्वात्। केचित्तु लुकि न स्थानिवदित्य स्य लुकि परेऽजादेशो न स्थानिवदित्यर्थकत्वे यौती त्यादौ शब्लुकः स्थानिवत्त्वादुतो वृद्धिरित्यस्याप्राप्तौ तत् सामर्थ्यादपरानिमित्तकाजादेशो न स्थानि-वदिति ज्ञापनेनैवेष्टसिद्धौ परस्मिन् ग्रहणमुक्तार्थानु वादकमेवेति वदन्ति। ननु पूर्वविधावित्यस्याभावे-पीष्टसिद्धौ व्यर्थमेव तदिति चेन्न हेगौरित्यादौ पर निमित्तकौकारादेशस्य स्थानिवत्त्वादेङ्ह्रस्वादिति सुलोपापत्तेः, न चेङ्ह्रस्वात्सम्बुद्धेरित्यत्रैङ्ग्रहणसाम र्थ्यात्सम्बुद्धिलोपे स्थानिवद्भावो न भवतीति कल्प नेनादोष इति वाच्यम् पूर्वविधावित्यस्याभावे गौ-रित्यत्रैव स्थानिवत्त्वात्सुलोपसिद्धये तस्य चारिता र्थ्यात्। ननु तावन्मात्रप्रयोजनं चेदोह्रस्वादित्येव ब्रूयात्प्रत्याहाराश्रयणं व्यर्थमेव दीर्घैकारान्तप्रकृति-

कसे इत्यादीनामनभिधानान्न तत्र चारितार्थ्यसम्भव इति चेन्न वाभ्रवीया इत्यत्र मधुवभ्रोरिति यञि वृद्धावोर्गुणे वृद्धाच्छे वान्तादेशस्य परनिमित्तकत्वे न स्थानिवत्त्वाद्धलस्तद्धितस्येति यलोपो न स्यात् न च सन्निपातपरिभाषया यशब्दसन्निपातनिमित्तवान्तादेशस्य यलोपनिमित्तता न सम्भवतीति वाच्यम् तस्या अनित्यत्वात्, ननु वान्तसमुदायस्यादेशस्याश्रयणाभावाल्लोपं प्रति निमित्तत्वेनाश्रितस्य वकारस्यादेशत्वाभावाच्च प्रकृते न दोष इति चेन्न नैधेय इत्यादौ निपूर्वाद् धाञः किप्रत्यय आतो लोप इटि चेत्यालोपे तस्य स्थानिवत्त्वाद्द्व्यच्त्वनिवृत्तावितश्चानिञ इति विहितस्यढकोऽनापत्तेः, न च द्व्यच्त्वव्यपदेशसत्त्वेऽपि द्व्यच्त्वस्य विद्यमानत्वाड्ढक् स्यादेवेतिवाच्यम् एकसंख्याघटितधर्म्मप्रकारकबुद्धिं प्रत्यपरसंख्या घटितधर्म्मप्रकारकबुद्धेः प्रतिबन्धकतायाः स्वातन्त्र्येण क्लृप्तत्वात् त्र्यच्त्वव्यपदेशे द्व्यच्त्वबुद्धेः कर्त्तुमशक्यत्वात्, "अत एव कैयटग्रन्थे संख्याकृतस्तु व्यपदेशः परस्परपरिहारेण लोके स्थितः न हि त्रिपुत्रो द्विपुत्र-

व्यपदेशं लभत इत्युक्तिः संगच्छते। नन्वचः परस्मिन् पूर्वस्येत्येवं क्रियमाणे ऽपि षष्ठ्या विध्यर्थ आक्षिप्ते स्थानिभूतादचः पूर्वस्य कार्य्ये कर्त्तव्य इत्यर्थे सकलेष्टसाधुभावे विधिग्रहणं निरर्थकमेवेति चेन्न सर्वविभक्त्यन्तसमासलाभाय विधिग्रहणस्यावश्यकत्वात्। अन्यथा वेभिद्यतेस्तृचि वेभिदिता, मथितं पण्यमस्य माथितिकः, पाचेर्णिजन्ताल्लुङि अपीपचन्नित्यादौ स्थानिवत्त्वाभावादिट्प्रतिषेधकादेशजुस्भावापत्तेः, न चाचः परस्मिन् पूर्वेति लुप्तविभक्तिकनिर्देशे सर्वासामपि विभक्तीनामाश्रयितुं शक्यत्वात्किमर्थं विधिग्रहणमिति वाच्यम् विधिमात्रे स्थानिवद्भावो यथा स्यादित्येवं नियमार्थतया तस्यावश्यकत्वात् तेन वाय्वोरित्यादौ लोपो व्योरिति लोपाभावः स्थानिवद्भावेन सिद्धः, आयन्नित्याद्यन्यथासिद्धप्रयोगसिद्धये क्रियमाणो ऽचः परस्मिन्नपरविधाविति न्यासस्तु सर्वथा हेय एवेति भाष्यादौ विस्तरः। ननु स्थानिवत्सूत्रेण सिद्धे ऽचः परस्मिन्निति सूत्रं किमर्थमिति चेद् अल्विधौ स्थानिवत्त्वाय स्थानिवत्सूत्रस्यावश्यकत्वात् तेन वभ्र-

श्वेत्यादौ लिट्यभ्यासस्योभयेषामिति सम्प्रसारणन्न, उरदत्त्वस्य स्थानिवत्त्वेन सम्प्रसारणतया न सम्प्रसारण इति तन्निषेधात्। न चोरदत्त्वं परनिमित्तं नेति वाच्यम् अङ्गाक्षिप्ते प्रत्यये परे तद्विधानात् न चाभ्यासविकारेभ्यः प्रागेवाङ्गाधिकारात्कथमत्र तेन प्रत्ययस्याक्षेप इति वाच्यमङ्गस्येति सूत्रे वव-श्वेति प्रयोगस्यैवासाधुतामाशङ्क्यासप्तमसमाप्ते-रिति पक्षस्यैव भाष्ये सिद्धान्तितत्वात् किञ्च ना-यक इति भाष्योदाहरणात्पूर्वसूत्रेण भावस्यैवाति-देशः, अनेन तु शब्दाधिकारमाश्रित्य भावाभाव-योरुभयोरप्यतिदेश इति भेदात्, तेन गतार्थत्वाभा-वात्। ननु भावाभावयोरुभयोरप्यतिदेश इत्यस्य यदि स्थानिनि सति यद्भवति तदादेशेऽपि भवति स्थानिनि सति यन्न भवति तदादेशेऽपि न भ-वतीत्यर्थस्तदा द्यूरित्यत्र देवयतेर्ण्यन्तात्क्विपि णि लोपे च्छ्वोरूठि एचोऽयवायाव इत्ययादेशे कर्त्तव्ये णिलोपस्य स्थानिवद्भावेन स्थानिनि णिचि सत्यू-ठादेशो न प्रवर्त्तते इत्यूठ्निमित्तकायादेशो न स्यात् णिलोपस्योठि कर्त्तव्ये स्थानिवद्भावस्तु न सम्भव-

ति क्वौविधिम्प्रतीति निषेधात्, एवं यातेर्य्यङन्तात् क्विप्यतो लोपस्य स्थानिवद्भावेनातो लोप इटि चेत्यालोपे यातिरित्यत्र स्थानिन्यकारे सति यलोपो न जायते यकारव्यवधानादालोपो ऽपि न जायते स चादेशे सत्यपि न स्यादिति चेन्न, स्थानिनि सति यद्भवतीत्यादेरादेशो न जातः स्थानी न निवृत्त इत्येतत्सम्भावनायां यत्प्राप्नोति तद्भवति यन्न प्राप्नोति तन्न भवतीत्यर्थे ग्रन्थकर्त्तुस्तात्पर्य्येणादोषात्, दयूरित्यत्र णिलोपस्यस्थानिवत्त्वेन णिलोपो न जातः स्थानीणिज् न निवृत्त इत्येतत्सम्भावनायामूङ्जातः स्थानी वकारो न निवृत्त इत्येतत्सम्भावनाया असम्भवात् क्वौ विधिम्प्रतीति निषेधात्, अयादेशे कर्त्तव्ये णिलोपो न जातः स्थानी णिज्न निवृत्त इत्येतत्सम्भावनायामूङ्निमित्तकायादेशप्रवृत्तेर्दुर्वारत्वात्, एवं यातिरित्यादावपि स्थानिवद्भावेनाल्लोपो न जातः स्थानी अकारो न निवृत्त इत्येतत् सम्भावनायां यलोपो न जातः स्थानी यकारो न निवृत्त इति सम्भावनायाः कर्त्तुमशक्यत्वात् अल्लोपो न जातः स्थानी अकारो न निवृत्त

इत्येतत्सम्भावनायामातोलोपप्रवृत्तेर्दुर्वारत्वात् । केचित्तु स्थानिनि सति यद्भवतीत्यादिग्रन्थस्यादेशे स्थानिवृत्तिधर्म्मसम्भावनायां यत्कार्य्यम्प्राप्नोति तद्भवति यन्न प्राप्नोति तन्नेत्यर्थाद्द्यूरित्यादौ णिलोपादेशे स्थानि णिवृत्त्यच्त्वधर्म्मसम्भावनायामप्यूड्निमित्तकायादेशः स्यादेव, एवं यातिरित्यादावप्यल्लोपादेशे स्थान्यकारवृत्त्यच्त्वधर्म्मसम्भावनायामप्यातो लोपः स्यादेवेत्याहुस्तदसत्, परस्मिन्निति किं युवजानिरिति भाष्यासङ्गतेः, निङादेशस्य स्थानिवद्भावेन निसमुदाये स्थान्याकारवृत्त्यच्त्वधर्म्म सम्भावनायामपि तद्घटकनकारेवल्त्वस्याक्षततया यलोपप्रवृत्तेर्दुर्वारत्वात्, किञ्च स्थानिवदादेश इति सूत्रेण भावस्यैवातिदेशे नायकादिप्रयोगस्य साधुत्वं फलत्वेनोपन्यस्तं भाष्ये, तदिदानीमसङ्गतमेव भवेत्, अकादेशे स्थानिवद्भावेन स्थानिवृत्ति हल्त्वधर्म्मसम्भावनायामपि तद्घटकाकारेऽच्त्वस्याक्षततया ऽयादेशप्रवृत्तेः सत्त्वात् किञ्चैतेर्णिचि ततो लडादौ णौगमिरबोधन इति गमादेशे एषो गमयतीत्यादौ स्थानिवद्भावेन गमादेशे स्थानिवृ-

त्त्यन्त्वधर्म्मसम्भावनायामपि तद्घटकगकारे हल्त्व स्याक्षततयोत्वादिकंबाधित्वा सुलोपापत्तिर्दुर्वारैव स्यात्, किञ्चैवमियायेत्यत्रायादेशस्य स्थानिवत्त्वेन सवर्णाच्परत्वादियङभावमाशङ्क्येयङ्विधानसाम - र्थ्यादभ्यासकार्य्यप्रतिबन्धकीभूतस्याभ्यासोत्तरख---ण्डाजादेशस्थानिवत्त्वस्याभावकल्पनापरग्रन्थासङ्ग - तिः, आयादेशे सवर्णान्त्व धर्म्मसम्भावनायामप्या-कारनिमित्तकस्येयङः सिद्धेर्वक्तुंशक्यत्वात्, ॥ अनेन भावातिदेशान्नि पूर्वाद्वारीति ण्यन्तात्कर्म्मणि लटि यकि णिलोपे तस्य स्थानिवद्भावादचि विभाषेति लत्वसिद्धिः, अभावातिदेशाच्च पटयतीत्यादावतउप-धाया इति वृद्धौ कर्त्तव्यायां स्थानिवद्भावात्सा न, ननु पूर्वशब्दस्याकांक्षितत्वात्कस्मात्पूर्वस्येत्याकाङ-क्षायामज्वदादेशनिमित्तयोरप्यवधित्वसम्भवाद्वैयाक-रण इत्यत्रादेशान्निमित्ताद्वा पूर्वस्यैकारस्यायादेशे कर्त्तव्ये स्थानिवद्भावः स्यादिति चेन्न किरतौ ल-वन इति सूत्रे निमित्तात्पूर्वस्यौकारस्यावादेशे कर्त्त-व्ये गुणस्य स्थानिवत्त्वेन लवन इति निर्द्देशासङ्ग-त्यापत्त्याऽचोवधित्वेनलाभसम्भवात्, स्थानिन आ

देशेनापहारात्तस्यावधेर्ग्रहीतुमशक्यत्वात्, ननु क-
र्त्तव्या चौरेत्यादौ सय्योगे गुर्वीति गुरुसंज्ञायां कर्त्त-
व्यायां घकाराकारस्य स्थानिवद्भावात्संयोगत्वाभा-
वात्सा न स्यादिति चेन्न पूर्वस्येति षष्ठ्या कार्य्ये
कर्त्तव्य इत्यर्थस्याक्षेपसम्भवेन विधिग्रहणसामर्थ्या-
त्पूर्वसम्बन्धिन्येव विधौ कर्त्तव्ये स्थानिवद्भावो भ-
वतीति कल्पनान्न दोषः, यद्यपि विधिग्रहणस्य
समासद्वयलाभार्थत्वमुपपाद्य प्रातिपदिकनिर्द्देशाश्चा-
र्थतन्त्रा भवन्तीत्यादिना समासद्वयलभ्यमर्थमन्य-
थोपपाद्य विधिमात्रे स्थानिवत्त्वं यथास्यादित्यादि-
प्रयोजनान्तरं प्रतिपादितम् विधाविति योगवि-
भागेन स्थानिवदेव यथास्यादिति नियमात्स्वाश्र-
यप्रयुक्तकार्य्यनिवृत्तिरपि भवतीत्याविष्कृतो भावः
प्रदीपोद्द्योतयोस्तथापि पूर्वसूत्राद्विधावित्यनुवर्त्य
वाक्यभेदेन व्याख्यायोक्तार्थलाभसम्भवे पुनर्विधि-
ग्रहणस्य पूर्वसम्बन्धिन्येव विधावित्यर्थज्ञापकत्वमवि-
रुद्धम्, तनास्तुरित्यादौ ऋच्छत्यृतामिति गुणे सव-
र्णदीर्घः सिद्धो ऽन्यथा ऋकारस्य स्थानिवद्भावाद्दी-
र्घो न स्यात्। ननु पूर्वसम्बन्धिन्येवेतिज्ञाप्यमपि मा-

स्तु ऋच्छत्यॄतामित्यत्र ऋकारप्रश्लेषो ऽपि मास्तु ऋ ऋ अतुसिति स्थिते सवर्णदीर्घं बाधित्वा ऽऽङ्-त्वादुरति अत आदेरिति दीर्घे चोत्तरखण्डे यण्या रतुरिति सिद्धेः, न च आऋअतुसिति स्थिते पर-त्वादन्तरङ्गत्वाच्चाद्गुणे ऽरतुरिति स्यात् पुनरत आदेरिति दीर्घस्तु न सम्भवति आसप्तमसमाप्तेर-ङ्गाधिकारात्प्रथमप्रवृत्त्याश्रितशब्दसमुदायघटकमा--त्रोद्देश्यकविकारागमातिरिक्ताघटितत्वेन लक्ष्येलक्ष णस्येतिन्यायेन पुनः प्रवृत्तिर्न्नस्यादिति वाच्यम् अत आदेरित्यस्य पररूपापवादत्ववदानृज इत्यादौ गुणस्यापि प्राप्त्या तदपवादत्वस्याप्यवश्याभ्युपे-यत्वेनारतुरित्यादौ गुणपररूपे तदन्यतराप्राप्तियोग्ये ऽचरितार्थेन कृते वा ऽन्यतरस्मिन्नन्तवद्भावेन चरितार्थेनात आदेरिति दीर्घेण गुणस्य तक्रन्या-येन बाधाद्दीर्घोत्तरं तदप्रवृत्ते रिति चेन्न अर्त्ते-र्लिटि कसौ ऋत्रासितिस्थिते कृतद्विर्वचनैकाचो ऽभावेन वस्वेकाजादित्यस्याप्राप्त्या द्वित्वे चैका-च्त्वाभावात्तदप्राप्त्या उरति अत आदेरितिदीर्घे गुणस्य तक्रन्यायेन बाधादप्रवृत्तावारिवानित्य-

सिध्यापत्तेः, इष्यते तु ऋवासिति स्थिते उरति अत आदेरिति दीर्घे ऋच्छत्यॄतामिति गुणे सवर्णदीर्घे कृतद्विवचनैकाचः सत्त्वादा रिवानिति, तदर्थमृग्रहणस्यावश्यकत्वेनारतुरित्यर्थं प्रकृतज्ञाप्यस्यावश्यकत्वात्। स्यादेतत् अभ्यासकार्ये तदुत्तरखण्डादेशस्य स्थानिवत्त्वनिषेधादेवारतुरिति सेत्स्यति न चाभ्यासत्वावच्छिन्नोद्देश्यताककार्य्य एव तन्निषेधोऽस्त्विति वाच्यं कटीत्यत्र प्रश्लिष्टस्यायतेर्लिटि इयतुरित्यत्रोत्तरखण्डस्थयणादेशस्य स्थानिवत्त्वेनाभ्यास इकोयणनापत्तेः, न चैतदनुरोधेनाभ्यासपर्य्याप्तोद्देश्यताककार्य्य एव निषेधोऽस्तु अत एव विव्यतुरित्यत्रोपधायाञ्चेति दीर्घप्रतिबन्धकस्थानिवत्वस्य न निषेध इति वाच्यम् अभ्यासकार्य्येत्यादेः परिभाषात्वेन यथोद्देशपक्षेऽभ्यासस्यासवर्ण इत्येतद्देशीयत्वेन तदॄष्ट्योपधायाञ्चेत्यस्यासिद्धत्वेन तत्र कर्त्तव्ये तदप्राप्त्या पर्य्याप्तिनिवेशस्य फलाभावात्, किञ्चारतुरित्यत्र ऋअतुसिति स्थिते द्वित्वात्परत्वादृच्छत्यॄतामिति गुणे ततो द्वित्वेऽभ्यासाकारस्य स्थानिभूतादचः पूर्वत्वाभावेन न स्थानिवत्त्व

प्रसक्तिः, न च द्विर्वचनेऽचीति निषेधः शङ्क्यः द्वित्वनिमित्ततापर्य्याप्त्यधिकरणघटकाच्पर्य्याप्तनिमित्तदलप्रविष्टविषयताकाजादेशस्यैव तेन निषेधात् तन्निषेधेन पूर्वं द्वित्वे ऽपि प्रतिपदविधित्वेनान्तरङ्गत्वादपवादत्वाच्च पूर्वं गुणे तत उरति अकारस्यानादिष्टादचः पूर्वत्वस्य दुर्वारत्वाच्चेति चेत्तर्हि अर्त्तेर्लुङि आर्च्छदित्यत्रच्छादेशस्य स्थानिवत्त्वेन ऋबुद्ध्या ऽऽटश्चेति वृद्ध्यापत्तौ छश्रवणानापत्तिर्दोषः, सुमनायतेति क्यजन्तात्क्विपि अल्लोपयलोपयोस्ततऔपरे सुमनावित्यत्राल्लोपस्य स्थानिवत्त्वाद्वृद्ध्यनापत्तिः, हयशब्दादाचारक्विबन्तात्कर्त्तरि क्विपि हशब्दस्येन्द्रशब्देन समासेऽल्लोपस्य स्थानिवत्त्वाद्गुणानापत्तिः, पटुशब्दस्यान्शब्देन समासे पट्वन् शब्दाच्छसि पट्वनइत्यत्र संयोगसंज्ञायां यणादेशस्य स्थानिवत्त्वेन तदभावे न संयोगादिति निषेधानापत्तिश्च, नन्वैनेय इत्यादौ यस्येतिचेति लोपे तस्य स्थानिवत्त्वाप्रवृत्त्या सन्नियोगशिष्टन्यायेन नकारस्यापि निवृत्तौ तदसिद्धिरिति चेन्न पूर्वविधिशब्दे तन्त्रस्याभ्युपगमेन द्वितीये भावे किप्रत्यये पूर्वसम्ब

निवृत्तः स्थितौ स्थानिवदित्यर्थेनादोषात्, अत एव नपदान्तेति सूत्रे लुकि न स्थानिवदिति वार्त्तिकं सङ्गच्छते ऽन्यथा पञ्चेन्द्राण्यो देवता अस्य पञ्चेन्द्र इत्यत्र साऽस्य देवतेत्यणि लुक् तद्धितलुकीति स्त्री-प्रत्ययस्य लुकि स्थानिवत्त्वाप्रवृत्तेः सन्नियोगि-शिष्टन्यायेनानुको निवृत्तौ तद्वैयर्थ्यं स्पष्टमेव, न चान्यतरापाय उभयोरभावात्कथमस्य प्रवृत्तिरिति वाच्यं वैषयिकविभक्ति स्वीकारेणादोषात्, न च सन्नियोगशिष्टानामित्यत्र बहुवचनश्रवणादन्यतमा पाय इति युज्यते वक्तुमिति वाच्यं सन्नियोगशि ष्टौ च सन्नियोगशिष्टौ च सन्नियोगशिष्टौ चेत्येव मेकशेष स्वीकारेणान्यतरशब्दप्रयोगेऽप्यदोषात् यत्तु खेयमित्यत्र च खन इत्यनेन क्यप्सन्नियोगशिष्टस्ये-कारस्य गुणेनापाये क्यपोऽनपायात् तृतीयशब्दादी कंकि वृद्ध्या सम्प्रसारस्यापाये ऽपि तत्सन्नियोगशि-ष्टस्य तीयप्रत्ययस्या.पायात् फलतेःक्ते निष्पन्नात्फुल्ल-शब्दादिञि फौल्लिरित्यत्र वृद्ध्योकारस्यापाये ऽपि तत्सन्नियोगशिष्टस्य लत्वस्यानपायाच्च सन्नियोग शिष्टन्यायस्य लुङ्मात्रविषयत्वेनैनेय इत्यत्र न दोष

इत्युक्तं तन्न वातशब्दाद्वातातीसाराभ्यां कुक् चेति कुगागम इन्प्रत्यये वातकिनो ऽपत्ये ऽणि नस्तद्धित इति टिलोपे तत्सन्नियोगशिष्टस्य कुको ऽप्यपाये वात इत्यस्यासिद्धिप्रसङ्गादिति बोध्यम् ॥

न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चरविधिषु,

पदस्यान्तः पदान्तः, अन्तशब्दश्चरमावयवार्थकः, विधानं विधिः, उपसर्गे घोरिति किः कृतद्वन्द्वस्य चरन्तस्य कर्म्मषष्ठ्यन्तस्य विधिशब्देन सह षष्ठीतत्पुरुषः, पदचरमावयवादिकर्म्मकविधौ स्थानिवद्भावो नेत्यर्थः, प्रसङ्गान्मनोरमोक्तदिशोदाहरणानि लिख्यन्ते, पदान्ते कानि सन्ति, ननु स्थानिभूतादस्तेरकारात्पूर्वत्वमिकारे ऽभावात्कथमत्र स्थानिवत्त्वप्रसक्तिरिति वाच्यं वाक्यसंस्कारपक्षे पूर्वोपस्थितिनिमित्तकत्वान्तरङ्गत्वमादायान्तरङ्गाणां पूर्वं प्रवृत्तेरिकारादेः स्थानिभूतादचः पूर्वत्वम्, द्विर्वचने सुद्ध्युपास्यः, अत्र यकारस्य स्थानिवत्त्वादनचिचेति द्वित्वनिषेधे प्राप्ते द्विर्वचने कर्त्तव्ये ऽनेन निषेधात्, वरे यायावरः यातेर्य्यङन्ताद्यश्चयङ इति वर

चि अतो लोपे यलोपे आतो लोप इटि चेत्यालोपे कर्त्तव्येऽतोलोपो न स्थानिवत्, न चात्र पूर्वमलोपस्ततो यलोप इति क्रमस्य सत्वादकारणार्द्धधातुकत्वाद्यलाभात्कथमतिदेशेन तल्लाभ इति वाच्यं सम्भावनामात्रेण तल्लाभस्य वरेग्रहणेन ज्ञापनात्, यदि पूर्वं यलोपः स्यात्तदाऽकारेण प्रत्ययत्वं लब्धं स्यातिति सम्भावनाया अत्रापि सत्वात्, सम्भावनायाः फलं यातिरित्यादेः साधुत्वम्, यलोपे यातिः यातेर्य्यङन्तात्क्तिच्क्तौच संज्ञायामित्यनेन क्तिचि अतो लोपे यलोपे ऽल्लोपस्य स्थानिवत्वादातो लोपे यलोपः, न च पुनरालोपः शङ्क्यः स्थानिवत्वात्, स्वरे चिकीर्षकः सन्नन्तात्करोतेर्ण्वुलि सनोऽल्लोपो, लितीति ककारेकारस्योदात्तत्वे कर्त्तव्ये न स्थानिवत्, न च ण्वुलि लकारोच्चारणवलादेव स्थानिवत्वाप्रवृत्तिरिति वाच्यं कारकइत्यादौ तस्य चारितार्थ्यात्, सवर्णानुस्वारयोः शिण्ढि, शिंषन्ति, पूर्वत्र शिनष्टेर्हेर्द्धौ जश्त्वे ष्टुत्वे झरो झरीति वा ढलोपे ऽनुस्वारे परसवर्णे कर्त्तव्येऽल्लोपो न स्थानिवत्, नन्वनुस्वारस्यादिष्टादचः पूर्वत्वेन स्थानिव-

त्वाप्रवृत्तिः, नचास्मादेवज्ञापकात्तस्याशास्त्रीयत्वेऽपि स्थानेतयातत्त्वं, फलाभावात् तद्घटित सन्निवेशा पेक्षस्य ततः पूर्वत्वस्यातिदेशसहस्रेणाप्यतिदेष्टुम- शक्यत्वाच्चेत्यादि शब्दरत्नोक्तदिशाऽत्र फलाभावे तु पादयतेः क्विपि पाद्धसतीत्यादौ झयोह इति पूर्व सवर्णे ऽल्लोपो न स्थानिवत्, न च पञ्चमीसमासस्य पूर्वविधावित्यत्रानाश्रयणान्न दोष इति वाच्यं हरि- शब्दादाचक्षाणण्यन्तात्क्विपि हारिन्नमतीत्यादावनु नासिके कर्त्तव्ये स्थानिवद्भावनिषेधाय तस्यावश्य कत्वात्, हयवरडिति सूत्रस्थभाष्यरीत्या तत्र सवर्ण ग्रहणापकर्षेण तस्यापि सवर्णविधित्वात्, दीर्घे प्रति दीव्नः अत्र हलिचेति दीर्घे कर्त्तव्ये ऽल्लोपो न स्था- निवत्, जशि सग्धिश्च मे, अदनं ग्धिः, अदेः क्ति नि बहुलं छन्दसीति घस्लादेशः, घसि भसोर्हलि- चेत्युपधालोपः, धत्वं, घस्य जश्त्वं, सहस्य स इति सूत्रात्स इत्यनुवर्त्तमाने समानस्य च्छन्दस्यमूर्द्धप्र- भृत्युदर्केष्विति सूत्रेण सो जश्त्वे कर्त्तव्ये ऽल्लोपो न स्थानिवत्, चरि जक्षतुः, अदेर्लिटि घस्लादेशे गमहनेत्युपधालोपो ऽत्र खरिचेति चर्त्वे कर्त्तव्ये न

स्थानिवत् । नन्वचः परस्मिन्नित्येतद्दृष्ट्या त्रिपादी स्थानामसिद्धत्वमित्येतन्मूलकेन पूर्वत्रासिद्धे न स्थानिवादित्यनेनैवेष्टसिद्धौ द्विर्वचनसवर्णादिग्रहणं व्यर्थमिति चेदत्र के चित् वतिघटितान्यातिदेशानां त्रिपाद्यां प्रवृत्तिबोधनार्थं तत्, वतिघटिता ये ऽचः परस्मिन्नित्येतस्मादन्ये ऽतिदेशास्तेषामित्यर्थो ज्ञाप्यन्तु वतिघटितातिदेशानां त्रिपाद्यां प्रवृत्तिरित्येव, अत्रान्यपदमन्यत्र धातुग्रहणे तदादिविधिरितिवत्फलितार्थकथनपरम्, नन्वचःपरस्मिन्नित्यस्य त्रिपाद्यामप्रवृत्तौ चक्रयत्रेत्यादौ त्रैपादिके संयोगादिलोपे कर्त्तव्ये स्थानिवत्त्वाप्रवृत्त्या संयोगादिलोपः स्यादिति चेन्न संयोगादिलोपलत्वणत्वेष्विति वार्त्तिकवलादेतदतिरिक्तेषु नास्य प्रवृत्तिरिति ज्ञापनेनादोषात्, अतएव पाचयतेः क्तिचि पाक्तिः, याजयतेर्याष्टिः लेहयतेर्लैढिः, दोहयतेर्दोग्धिरित्यादौ कुत्वषत्वढत्वधत्वेषु कर्त्तव्येषु न स्थानिवत्त्वम्, वतिघटिताश्च स्थानिवदन्तादिवदाद्यन्तवदित्यादयः, तत्राद्यस्य फलं राम इति, द्वितीयस्यामी, क्षीरपेणेत्यादौ मीत्वणत्वयोः कर्त्तव्ययोरदश्शब्दत्वे काज्जुत्तर

पदत्वयोरतिदेशः फलम्, तृतीयस्य तु हे अँइत्यत्रा-
णो ऽप्रगृह्यस्येत्यनुनासिके कर्त्तव्ये पदान्तत्वातिदे-
शः, ननु प्रत्ययलोप इत्यस्य वतिघटितत्वाभावेन
त्रिपाद्यामप्रवृत्तौ रोऽसुपीति रत्वे कर्त्तव्ये प्रत्ययल-
क्षणाभावेन दीर्घाहो निदाघेत्यादावहन्निति रुत्वं
बाधित्वा रत्वमापद्येत, अतिदेशानां त्रिपाद्यामपि
प्रवृत्तिरित्युच्यमाने त्वसिद्धं वहिरङ्गमित्यस्यापि तत्र
प्रवृत्तौ सर्वेषामित्यत्र षत्वस्य हरीणामित्यत्र णत्व-
स्य राज्ञ इत्यत्र चुत्वस्य भविष्यतीत्यत्र षत्वस्य पी-
पठीष्ठु इत्यत्र ष्ठुत्वस्य चानापत्तेः, अतिदेशसूत्रा-
णां त्रिपाद्यां प्रवृत्तिरित्येवमुदित आद्यन्तवदेकस्मि
न्नित्यस्य तत्राप्रवृत्तावचैषीदित्यादौ प्रत्ययावयव-
त्वाभावात्सिचः सस्य षत्वस्य हेअँ इत्यत्रापदान्त-
त्वादनुनासिकस्यचानापत्तिः, न हि पदान्ताः परेणः
सन्तीति भाष्यात्पदान्त इत्यर्थस्य तत्रावश्यकत्वात्,
व्यपदेशिवदिति परिभाषामाश्रित्याद्यन्तवादित्यस्य
प्रत्याख्यानान्न तेनापि निर्वाहो युज्यते वक्तुम्,
वतिपदस्य वत्यर्थपरत्वे ऽपि प्रत्ययलोप इत्यत्र नि-
र्वाहे ऽन्तरङ्गपरिभाषाया असिद्धवद्भवतीत्यर्थेन व-

त्यर्थघटितत्वादिति चेन्न प्रत्ययलोपसूत्रे स्थानिव दित्यनुवृत्त्या तस्यापि वतिघटितत्वात्, न चैवम- वान्धामित्यत्र झलोझलीति सलोपस्य प्रत्ययलक्षणे न भष्भावापत्तिरितिवाच्यं साहचर्य्यस्यासार्वत्रिक त्वेन ध्वसाहचर्य्येण सादिप्रत्ययस्यैव ग्रहण मित्यत्र नियामकाभावेन सत्वस्य प्रत्ययासाधारणत्वाभाव- स्य तत्रैव शेखरे प्रतिपादितत्वात्। अन्ये तु वाहऊ- डिति सूत्रस्थोड्ग्रहण ज्ञापिताया अन्तरङ्गपरिभाषा याः सापादिकतया तद्दृष्ट्या त्रैपादिकशास्त्रस्या सिद्धत्वात्, व्यपदेशिवदित्यस्य लोकसिद्धतया सा पादिकत्वाभावेनान्तरेणापि वचनं तस्य त्रिपाद्यां प्रवृत्तेः सौलभ्याददतिदेशसूत्राणामित्युच्यमाने ऽपि न दोष इत्याहुस्तन्न नोत्तरपदसूत्रीयपृथिव्यादिप- र्युदासज्ञापितस्य स्वरविधौ व्यञ्जनमविद्यमानव दित्यस्य त्रिपाद्यामप्रवृत्त्यापत्तावश्व इत्यादावुदात्ता दकारात्परस्यानुदात्तस्या न्त्यस्याकारस्योदात्तादनु दात्तस्यस्वरित इत्यनेन त्रैपादिकेन स्वरितत्वे कर्त्त व्ये ऽप्रवृत्त्यापत्तेः, न चैवमपि प्रातिपदिकग्रहण इत्यस्य वतिघटितत्वाभावेन त्रिपाद्यामप्रवृत्तावय-

स्कुम्भीत्यत्र सत्वं न स्यादिति वाच्यं फलानुरो-
धेन प्रातिपदिकवद्ग्रहणइत्येवमभ्युपगमेनादोषात्,
यत्तु द्विर्वचनसवर्णादिग्रहणमादेशे स्थानिवृत्तिध-
र्म्मारोपकाणां त्रिपाद्यां प्रवृत्तिबोधनार्थन्तेन प्रत्यय-
लोप इत्यस्यादेशे स्थानिवृत्तिधर्म्मारोपकत्वात्त्रिपाद्यां
प्रवृत्तिः सिद्धा, स्थानिवदादेश इत्यादीनामपि तथा,
अन्तरङ्गपरिभाषायास्तु स्थानिवृत्तिधर्म्मारोपकत्वा
भावान्न त्रिपाद्यांप्रवृत्तिरित्युक्तं तन्न स्वरविधावित्य
स्यापि त्रिपाद्यामप्रवृत्त्यापत्तेः, ननु राम इत्यत्रोक्त
ज्ञापनस्य फलं न युक्तमिदुदुपधस्येति सूत्रेऽप्रत्य
य ग्रहणबलाद् विसर्गादेशस्य वक्तुं शक्यत्वादिति
चेन्न भिदेर्घुरचि ततो ण्यन्तात्क्विपि भेदुः करोती
त्यादौ षत्वव्यावृत्तये तस्य चारितार्थ्यात्, वस्तु
तस्तु तत्रापि प्रत्यय लक्षणमन्तरेण पदत्वाभावा
द्विसर्गाप्राप्त्या तदपि खरवसान योरित्यपिज्ञापकं
भवत्येवेति बोध्यम्, ननु कर्म्मसाधन विधिशब्दो
पादाने ऽपीष्टसिद्धौ किमर्थं भावसाधनो ऽभ्यु-
पगम्यत इति चेदत्र केचित् वृक्षं वेति वातीत्य
र्थेकात्कर्तृक्विबन्ताण्णिचि विचि वृक्षवित्यत्र लोपो

ञ्योरिति लोपे कर्त्तव्ये णिलोपस्य टिलोपस्य वा स्थानिवत्त्वसिद्धये तस्यावश्यकत्वात्, न च नपदान्तेति निषेध इह विधेयस्य लोपस्यपदानवयवत्वात्, न चात्र पदत्वाभावात्कथन्न पदान्तेत्यस्य प्रवृत्तिः सुबन्ताण्णिजिति हरदत्तमते ऽन्तर्वर्त्तिविभक्त्या पदत्वात्, न चेष्ठवदित्यनेन भत्वे पदत्वबाधो णिचो लुप्तत्वात् न च प्रत्ययलक्षणं वर्णाश्रयत्वात्, अन्ये तु सुबन्ताण्णिजिति पक्षं नाद्रियन्ते तन्मते त्वेषो यन् हसतीत्यादाविणः शतरि इणो यणिति विहितस्य यणः स्थानिवत्त्वादेतत्तदोरिति सुलोपाभावस्य फलत्वात्, न चोत्वे कर्त्तव्ये स्थानिवत्त्वं कुतो नेति वाच्यमनेन निषेधात्, ननु पदसंस्कारपक्षे ऽन्यत्र स्थितयोरेषस्यनित्यनयोः समभिव्याहारे ऽपि स्थानिवत्त्वाप्रवृत्तेरेष यन्नित्यस्यैव साधुत्वसम्भवादत एवैष यन्निति छान्दोग्यप्रयोगो ऽप्युपपद्यत इति चेन्न है शब्दोशब्दयोः समासे तस्यारणि शब्देन समासे हाव्यरणि रित्यत्र लोपोव्योरिति यलोपापत्तेः, न पदान्तेति निषेधेन स्थानिवत्त्वस्य वक्तुमशक्यत्वात् , एवं नदतीति

नद्, देवदत्तस्य नदिति समासे तस्मादाचक्षाण ण्यन्तादचि देवदत्तनेनेत्यादावेनशब्दे परादिवत्त्वेन सुप्त्वाद्भसंज्ञायामल्लोपो न इति लोपापत्तेः, स्थानिवत्त्वं तु वक्तु मशक्यमनेन निषेधात्, भावसाधनस्य विधिशब्दस्योपादाने तु लोपस्य पदानवयवत्वेनादोषात्, पादस्य लोप इत्यादि विहितस्य लोपस्य समासान्ता इति शास्त्रबलादवयवत्वे ऽपि सर्वत्र तस्यावयवत्वे प्रमाणाभावात्, नन्वेवं वेतस्वानित्यत्र भत्वे कर्त्तव्ये स्थानिवत्त्वे ऽपि पदत्वे स्थानिवत्त्व निषेधात्सान्तस्य पदत्वे रुत्वापत्तिरिति चेन्न पदे ऽन्त इति सप्तमी समासाश्रयणात्प्रत्यासत्त्या परपदस्थाजादेशस्यैव स्थानिवत्त्वनिषेधेनादोषात्, न च पदे परे ऽन्तस्य विधावित्यर्थेनापि निर्वाहे परपदस्थाजादेश इत्यर्थो व्यर्थ एवेति वाच्यं प्रत्यैषिषन् देवदत्ता इत्यत्र देवदत्ते पदे परे झेर्ज्जुसिकर्त्तव्ये स्थानिवत्त्वनिषेधाज्जुसापत्तेः, महिषो देवता ऽस्येत्यर्थे सा ऽस्य देवतेत्यणि यस्येति चेत्यकारलोपे ऽणो लुकि महिष् देवदत्त इत्यत्रानेन निषेधात्स्थानिवत्त्वाभावेन जश्त्वापत्तेः, धूण-

तेर्णिच्युपधावृद्धौ ण्यन्तात्क्विपि न ङिसम्बुद्ध्यो
रिति नलोपनिषेधे घ्रूणश्वयोः समभिव्याहारे हे
घ्राणश्व इत्यत्र स्थानिवत्त्व निषेधात्पदान्तस्येति ण
त्वनिषेधापत्तेश्च, ननु पूर्वत्रासिद्धे न स्थानिवदि-
त्यनेनैव निर्वाहे ऽलमेतादृशार्थाश्रयणेनेति चेन्न
महिष्मानित्यादिषु जश्त्वनिवृत्तये तत्र पदचरमा
वयवविधायकातिरिक्तस्यैव त्रैपादिकस्य ग्रहणात्,
न च जशि कर्त्तव्ये न पदान्तेति निषेधः, चर-
साहचर्य्येण परनिमित्तकस्य झलां जशिति जश एव
ग्रहणात्, न चान्तरङ्गपरिभाषया निर्वाहः कार्य्यका
लपक्षे त्रिपाद्यां तदप्रवृत्तेः, नन्वेवं पिपठीरित्यत्र
रुत्वे स्थानिवत्त्वनिषेधात्तदनापत्तिः, न च प्रत्य
यस्थानिकरुत्वभिन्नपदचरमावयवविधायकातिरि-
क्तस्य त्रैपादिकस्य ग्रहणान्न दोष इति वाच्यं ना-
सामाचष्टे नासयति, ना इत्यत्र रुत्वानापत्तेः, न
चोक्तपदे स्वादिष्विति विहितविशेषणान्न दोष
इति वाच्यं पिपठीभ्र्यामित्यत्र भ्यामि स्वादिष्वि-
ति पदत्वेन स्थानिवत्त्वनिषेधानापत्तिः, न च पदे
तद्धितप्रत्ययनिमित्तकस्य विशेषणान्न दोष इति

वाच्यं पिपठीः कल्पमित्यत्र स्थानिवत्त्वनिषेधाद्धु-
त्वानापत्तेः, न चाङ्गावयवलोपप्रयोजकप्रत्ययनि
मित्तकपदत्ववच्चरमावयवविधायकातिरिक्तस्यैव त-
स्य ग्रहणान्न दोष इति वाच्यं विविक्षशब्दात्क-
ल्पप्रत्यये विविद्कल्पमित्यत्राङ्गावयवसंयोगादि
लोपप्रयोजक कल्पप्रत्ययनिमित्तक पदत्ववच्चरमा-
वयवविधायके झलां जशिति कर्त्तव्ये निषेधाप्रवृत्तौ
स्थानिवद्भावात्षकारस्य जश्त्वानापत्तेः, नापि टि-
लोपप्रयोजकप्रत्ययप्रयोज्यपदत्ववच्चरमावयवविधा-
यकातिरिक्तस्य तस्य ग्रहणेन निर्वाहः षड्िक इ-
त्यत्र ठचष्टिलोप प्रयोजकत्वाभावेन तादृशप्रत्यय
प्रयोज्यपदचरमावयवविधायके जशि कर्त्तव्ये स्था-
निवत्त्वस्य निषेधात्षान्ते भत्वेन जश्त्वानापत्ते
रितिचेन्न प्रत्यासत्त्या यल्लोपस्य स्थानिवद्भावश्चि-
कीर्षितस्तल्लोपप्रयोजक प्रत्ययनिमित्तक पदत्ववच्च
रमावयवविधायकातिरिक्तस्यैव तस्य ग्रहणे ग्रन्थक
र्तुस्तात्पर्य्येणादोषात्, केचित्तूक्तभाष्यप्रामाण्ये-
न धात्ववयवपदचरमावयवविधायकातिरिक्तस्यैव त-
स्य ग्रहणेनोदितेषु वेतस्वानित्यादिषु दोषं परि

हरन्ति, अन्ये तु प्रत्ययविशिष्टो यः पदचरमावय वस्तदतिरिक्तस्येत्यर्थः वैशिष्ट्यं च स्वप्रयोज्यपदसं ज्ञावदुद्देश्यकत्व स्वप्रयोज्यकार्य्यप्रयोज्यत्व सम्बन्धाभ्यां वेतस्वानित्यादौ निरुक्तोभयसम्बन्धेन रुत्वस्य मतुप्प्रत्ययविशिष्टत्वान्न निषेधः, पिपठीरित्यादौ त्वेकैकसम्बन्धेन सुप्रत्ययस्य क्विप्प्रत्ययस्य वा वैशिष्ट्येऽप्युभयसम्बन्धेन वैशिष्ट्यविरहान्न दोषइत्याहुः, नन्वेवं गतिकारकोपपदानामिति सुबुत्पत्तेः प्राक् समासे उत्तरपदस्य पदत्वाभावेन पदे ऽन्त इति समासे ऽत्वङापत्तिरिति चेन्न कर्तृकरण इत्यत्र बहुलग्रहणेन तस्या अनित्यत्वात्, बहुलग्रहणस्य सर्वोपाधिव्यभिचारार्थकत्वे त्वम्बाम्बेति सूत्रे गवादिग्रहणमेव प्रमाणमित्यवेहि, हृदिस्थ इत्यत्र षत्वव्यावृत्त्यै गवादिग्रहणस्य नियमार्थत्वे तु पदपदस्य पदत्वयोग्यपरत्वेनात्र दोषो निराकरणीयः, सात्पदाद्योरिति सूत्रे पञ्चमीसमासाश्रयणेन हृदिस्थ इत्यत्र षत्ववारणे त्वनित्यत्वे ऽस्य ज्ञापकत्वं युक्तमेव, ननु भावसाधनविधिशब्दोपादाने वाचिक इत्यत्र भत्वे कर्त्तव्ये निषेधाप्रवृत्त्या ऽल्लोपस्य स्थानिवत्त्वेनाका-

शान्तस्यैव भत्वे चकारान्तस्यान्तर्वर्तिविभक्त्या पद
त्वाच्चोः कुरिति कुत्वापत्तिः, कर्म्मसाधनविधिशब्दो
पादाने षड़िक इत्यत्र भत्वे कर्त्तव्ये ऽल्लोपस्य स्था-
निवत्त्वाभावेन षान्तस्य भत्वे जश्त्वानापत्तिरिति
चेन्न एकाक्षरपूर्वपदानामुत्तरपदलोप इत्यनेन वा-
चिक इत्यत्राशीर्द्दत्तस्य लोपे ऽज्मात्रस्थानिकादेशा
भावेन स्थानिवत्त्वाप्रवृत्तेः, षडिक इत्यत्र ठाजादा-
वूर्द्ध्वं द्वितीयादच इत्यनेन ङ्युलिदत्तस्य लोपे स्था-
निवत्त्वस्य सौलभ्यादनयोर्व्यवस्थितत्वान्न सङ्करः,
अत्रोच्यते स्थानिवद्भावस्तावद्द्विविधः पदचरमवाय-
वादेः साधकः प्रतिबन्धकश्च निषेधसम्भावनाप्रयो
ज्यसम्भावनाविषयः पदचरमावयवाद्यभावो यत्र
तत्र साधकः, यत्र निषेधसम्भावनाप्रयोज्यसम्भाव-
नाविषयः तत्र प्रतिबन्धकः, द्विविधो ऽप्ययं पुनः
प्रत्येकं द्विविधः साक्षात्परम्पराभेदात्, अत्र च सा-
क्षादेव पदचरमावयवादिसाधकस्य ग्रहणात्, षडिक
इत्यत्र भत्वे कर्त्तव्ये जायमानाल्लोपस्थानिवत्त्वस्य
षान्ते भत्वप्रतिबन्धद्वारापदचरमावयवजश्त्वसाधक
त्वे ऽपि साक्षात्पदचरमावयवसाधकत्वाभावान्निषे-

धाप्रवृत्त्या जश्त्वसिद्धिः, वेतस्वानित्यत्र भसंज्ञा प्रतिबन्धकस्थानिवद्भावस्य तत्प्रतिबन्धद्वारा सान्त वृत्तिपदसंज्ञासम्पादनद्वारा पदचरमावयवरुत्वसाधकत्वेन निषेधादेव सान्ते भसंज्ञया रुत्वाभावे सिद्धे सप्तमीसमासाश्रयणपरभाष्यविरोधश्च न, साक्षात्पदचरमावयवसाधकस्थानिवद्भावस्योदाहरणं वाक्यसंस्कारपक्षे कानि सन्ति, पदसंस्कारपक्षे गोचेति तत्राच इत्यल्लोपस्थानिवत्त्वस्य साक्षादेवावङ्साधकत्वात्, प्रतीचो यदिति निर्देशादचो ऽल्लोपो न स्थानिवदिति कल्पनापेक्षया सूत्रोदाहरणस्यैव युक्तत्वात् दध्युपपदकेण धातोर्म्मूलविभुजादित्वात्क इणो यणि दधिय इत्यत्र यणः स्थानिवत्त्वेन प्राप्तस्य यणो व्यावृत्तये, साक्षात्पदचरमावयवसाधकस्थानिवद्भावनिषेधस्य फलत्वाच्च, साक्षात्पदचरमावयवप्रतिबन्धकस्थानिवत्त्वस्योदाहरणं वाक्यसंस्कारपक्ष एषो यन्निति, पदसंस्कारपक्षे हरिशब्दस्य यशब्देन समासे तत आचारक्विबन्तात्कर्तृक्विप्पल्लोपयलोपयोर्ह्रस्वस्येति तुकि हरिदित्यत्राल्लोपस्थानिवत्त्वस्य साक्षात्पदचरमावयवतुक्प्रतिबन्धकस्य नि

षेधः फलम् एवं तेजःपूर्वकेण् धातोर्म्मूलविभुजादि त्वात्के इणोयणि तेजोय इत्यत्र यणादेशस्थानिवत्त्वस्य साक्षात्पदचरमावयवोत्वप्रतिबन्धकस्य निषेधः फलम्, परम्परापदचरमावयवप्रतिबन्धकस्थानिवद्भावनिषेधस्योदाहरणं दध्यार इति तत्र हि दध्युपपदकऋधातोरणि वृद्धौ आरशब्दे स्थानिवत्त्वेन ऋबुद्ध्या ऋत्यक इति प्रकृतिभावो न, तस्य स्थानिवत्त्वस्य प्रकृतिभावसाधनद्वारापदचरमावयवस्य यणः प्रतिबन्धकत्वात्, ऋत्यक इत्यत्र ह्रस्वपदस्याप्यनुवृत्तेर्ह्रस्वस्यापि विधानात्साक्षात्पदचरमावयव साधकत्वादेवात्र निषेधे तु सर्पिश्शब्दादिदमर्थे ऽणि वृद्धौ सार्पिषशब्दस्याशब्देन समासे सार्पिषा शब्दादाचारक्विबन्तात्कर्त्तृक्विपि नपुंसकह्रस्वे तत आचारक्विबन्तात्कर्तृक्विप्यल्लोपे भ्यामि सार्पिपभ्यामित्यत्रालोपस्थानिवत्त्वस्य भसंज्ञाप्रवर्त्तनद्वारारुत्वप्रतिबन्धकस्यानेन निषेधस्य फलत्वात्, व्याघ्रपाच्छब्दस्याशब्देन समासे तत आचारक्विबन्ताद्विच्यल्लोपे टासमभिव्याहारे भसंज्ञायां पदादेशे व्याघ्रपदेत्यत्र पाच्छब्दान्तधर्म्मिकभत्वप्रतिबन्धकस्थानि

वत्त्वस्य परम्परापदचरमावयवपदादेशप्रतिबन्धक-
त्वेन निषेधस्य फलत्वाच्च, अत्र सूत्रे पूर्वत्रासिद्धे
न स्थानिवदित्यवष्टभ्य दीर्घग्रहणप्रत्याख्यानपरभा
ष्यप्रामाण्येन त्रैपादिकदीर्घाणामेव ग्रहणमिति प्राचा
म्मतम्, नव्यास्तु चिण्णमुलोरिति सूत्रे भाष्ये चि-
ण्णमुलोर्णिज्व्यवेतानां यङ्लोपे चोपसंख्यानमिति
वार्त्तिकस्य शमयन्तं प्रयोजितवान् अशमि अशा-
मि, शमं शमं, शामं शामं, शंशमयतेः अशंशमि
अशंशामि, शंशमं शंशमं' शंशामं शंशाममिति
प्रयोजनमुक्त्वास्थानिवद्भावस्य दीर्घविधौ निषेधमु-
द्भाव्यासिद्धत्वान्न प्राप्नोतीत्युक्तमतोदीर्घपदेनान्ये
षामपि ग्रहणं न तु त्रैपादिकानामेवाशोकवनि
कान्यायेन प्रतिदीव्न इत्युदाहरणदाने ऽपि क्षति
विरहः, ह्रस्वविधानमप्युदितोदाहरणासिद्धिभिया
निराकृतमर्हादिति सिद्ध्यर्थञ्चेत्याहुः, अन्ये तु णेज्ज्वा
तिपरनिर्देशेनप्राचांमते यङ्लुकश्छान्दसत्वाभावेन
यङन्ते यङ्लुकि चार्थभेदाभावाद्यङ्लुगन्ताण्णमुलि
शंशामं यङन्तणिजन्ताण्णमुलि शंशममिति रूपद्वय
सिद्धौ दीर्घग्रहणस्य प्रयोजनविरहेण प्रत्याख्येय

मेवेति वदन्ति ॥ ❀ ॥

॥ अन्तादिवच्च ॥

इहैकः पूर्वपरयो रित्यनुवर्त्तते, यथासंख्यं चेति दीक्षितः, पूर्वपरयोरित्यत्र यथासंख्यमित्यत्र च सम्बन्धानुरोधेनोपसर्गमनुमत्याक्षीन्नागेश इति केचित्, अतिदेशधर्म्मितावच्छेदकावच्छिन्न वाचकपदसमभिव्याहारस्यावश्यकत्वात्प्रकरणस्थमा-देशपदमत्रोपतिष्ठते इत्याभिप्रेत्यान्तादिशब्दावुप-स्थितैकादेशस्थानिपरावित्याह, पूर्वपरशब्दौच पूर्वपरघटितसमुदायपरौ, एवञ्च पूर्वपरघटित स-मुदायस्यान्तादिभ्यां वर्णाभ्यां पृथगवस्थिताभ्यांये व्यवहारास्ते कृतैकादेशस्य भवन्तीत्यर्थः, ननु रमय-तीति रमः पचाद्यच्, तेन सह नञः समासे, घटो ऽरमो यस्याः, घटारमेत्यत्र घटावयवाकारघटितघटारमस-मुदायस्यान्तेन टापा पृथगवस्थितेन य आबन्तत्व व्यवहारः स कृतैकादेशविशिष्टे घटेत्यत्र स्यात्ततो ङ्यापोरिति ह्रस्वापत्तिरिति चेन्न पूर्वपरशब्दयोस्त-दादितदन्तपरतया पूर्वान्तसमुदायपरादिसमुदाय-योरन्तादिवर्णाभ्या मित्याद्यर्थाभ्युपगमेन घटावयवा

कारान्तसमुदायस्यान्तेनाकारवर्णेन पृथगवस्थिते-
नाप्याबन्तत्वाभावादतिदेष्टुमशक्यत्वात्, संज्ञाभा-
वात्तदप्रवृत्तिर्वक्तुमशक्या, कस्याश्चित्स्त्रियो ऽभि
धानस्य स्वयमपि धर्त्तुं शक्यत्वात्, तेन रमावि-
त्यादौ कृतैकादेशादौ परादिवत्त्वेन सुप्त्वे पूर्वमान्त
स्यैकदेशविकृतन्यायेन प्रकृतित्वे पदत्वासिद्धिः, न
च प्रकृतित्वस्य तद्व्यक्तिरूपतया ऽक्तपरिमाणत्वा-
त्कथं तन्न्यायप्रवृत्तिरिति वाच्यं प्रत्ययविशिष्टत्वस्य
प्रकृतितया ऽक्तपरिमाणत्वाभावात्, वैशिष्ट्यं च,
स्वाव्यवहितपूर्वत्व स्वनिष्ठविधेयतानिरूपितोद्देश्य-
तासमानाधिकरणाद्यवयवतानिरूपकत्व सम्बन्धा-
भ्यां, ननु बहुपटव इत्यत्रपटोः प्रकृतित्वानापत्तिः,
तस्य स्वाव्यवहितपूर्वत्वाभावादिति चेन्न, अवध्यं
शे साकांक्षरूपावच्छिन्न विधेयतानिरूपितोद्देश्यता
श्रयत्वस्यैव तत्वेनादोषात् नन्वनेन वर्णमात्रवृत्ति
धर्म्मस्यात्वह्रस्वत्वादेरनातिदेशे किम्मानमिति चेत्
षत्वतुकोरसिद्ध इत्यत्र तुग्ग्रहणमेवेति गृहाणान्यथा
ऽधीत्येत्यादावादिवत्त्वेन ह्रस्वत्वप्रयुक्ततुक्सिद्धौ
तद्वैयर्थ्यं स्पष्टमेव, नन्वाधिपूर्वादीङः क्त्वो ल्यपि

सवर्णदीर्घेऽधीयेत्यत्रान्तवद्भावेन कृतैकादेशेदीर्घकारे ह्रस्वत्वं परादिवद्भावेनकृतैकादेशे पित्कृत् प्रत्ययनिरूपिततदादित्वञ्चादाय ह्रस्वस्येति तुगापत्तिः, न चात्र पूर्वान्तवद्भावेन ह्रस्वत्वातिदेशेऽपि परादिवद्भावेन तदादित्वमिव दीर्घत्वमादायातिदिश्यमानधर्म्मविरुद्धस्वाश्रयकार्य्याणामभावेन ह्रस्वत्वप्रयुक्तस्तुग्न स्यादिति वाच्यं स्थानिवत्सूत्रस्यैवास्यापि शास्त्रप्रवृत्तिरूपश्शास्त्रीयकार्य्य एव प्रवृत्त्यातुक्शास्त्रप्रतिबन्धकदीर्घत्वस्य परादिवद्भावेनातिदेष्टुमशक्यत्वात्, सति तुग्ग्रहणे पूर्वान्तवद्भावेन ह्रस्वत्वस्य परादिवद्भावेन तदादित्वस्यातिदेशे ऽपि तुकि कर्त्तव्य एकादेशशास्त्रस्यासिद्धत्वेन ह्रस्वान्तत्वाभावात्तुगप्रवृत्तिरिति चेन्न एकस्मिन् धर्म्मिणि पूर्वान्तवद्भावपरादिवद्भावाभ्यां धर्म्मद्वयमादाय कार्य्यन्न प्रवर्त्तत इत्यभ्युपगमेनैकस्मिन् कृतैकादेशे धर्म्मिणि पूर्वान्तवद्भावेन ह्रस्वत्वं परादिवद्भावेन तदादित्व मित्येतद्धर्म्मद्वयप्रयुक्ततुक्कार्य्याप्रवृत्त्या तुक्यसिद्धवचनं व्यर्थमेव, अत एव हल्ङ्याब्भ्यिति सूत्रे दीर्घग्रहणप्रत्याख्यानाय कृतस्य

ङ्याब्ग्रहणे ऽदीर्घ इति वार्त्तिकस्य आआबिति प्र-श्लिष्य प्रत्याख्यानं भाष्योक्तं संगच्छते, ऽन्यथा ऽशब्दाट्टाप्याशब्देन निरस्समासे गोस्त्रियोरिति ह्रस्वे तत्संबोधने हे निर, अशब्दात् स्वाद्युत्पत्तौ उभयोः समभिव्याहारे, हे निरा इत्यत्र ङ्याब्ग्रहणे ऽदीर्घ इति वार्त्तिकसत्त्वे दीर्घभिन्नह्रस्वरूपादे-शस्य स्थानिवत्त्वाभावेन कृतैकादेशे आकारे ऽन्त-वद्भावेनाप्त्वस्यानेतुमशक्यत्वेन निराघटकाऽऽका-रस्याबन्ततदादित्वाभावात्सुलोपो न जायते, आ आबिति प्रश्लिष्य वार्त्तिकप्रत्याख्यानपक्षे तु निरा इत्यत्र ह्रस्वाकारे स्थानिवद्भावेनाप्त्वमादायान्तादि-वद्भावेन कृतैकादेशे आकारे आप्त्वमादाय परा-दिवद्भावेनाकारवृत्तिसुनिरूपित तदादित्वमपि कृतै-कादेशे आदायाऽऽरूपत्वस्य स्वतः सिद्धत्वेन सो-र्ल्लोपः स्यादित्यारम्भप्रत्याख्यानयोः फलभेदः स्यात्, एकस्मिन् धर्म्मिणीत्याद्यभ्युपगमे तु वार्त्ति-काभावेऽपि निराघटकाकाररूपैकधर्म्मिणि पूर्वान्त-वत्त्वेन ह्रस्वत्वं परादिवत्त्वेन तदादित्वमित्येवं ध-र्म्मद्वयानयनासम्भवेन सुलोपाप्रवृत्तेर्न्न फलभेदः

अन्ये तु नाजानन्तर्य्यइति परिभाषाज्ञापनपरभाष्य प्रामाण्येन तेषामनभिधानादित्याहुः । यत्तु ह्रस्वस्य पिति कृतीत्यत्रादीर्घस्य पिति कृतीति न्यस्याधियेत्यत्र पूर्वान्तवत्त्वेन ह्रस्वत्वस्यातिदेशे ऽपि परादिवत्त्वेन दीर्घत्वस्य ह्रस्वभिन्नत्वस्याप्यतिदेशेन दीर्घभिन्नत्वाभावान्न तुगापत्तिः, न चाशास्त्रीयकार्य्येऽन्तादिवच्चेत्यस्याप्रवृत्त्या परादिवत्त्वेन दीर्घत्वस्यानयनासम्भवादिति वाच्यं पर्य्युदासलभ्याशास्त्रीये ऽपि शास्त्रीयत्वव्यवहारस्य स्थानिवत्सूत्रे नागेशेनोक्तत्वादित्युक्तं तन्न परेत्येत्यत्र परादिवत्त्वेन ह्रस्वत्वातिदेशे पूर्व्वान्तवत्त्वेन दीर्घत्वातिदेशे दीर्घभिन्नत्वाभावेन तुगप्रवृत्त्या षत्वतुकोरसिद्ध इत्यस्य वैयर्थ्यापत्तेः, ननु खट्वाभिरित्यत्र वर्णमात्रवृत्तिधर्म्मस्यानतिदेशे ऽप्यदन्तत्वमतिदिश्यैस्दुर्वार इति चेन्नाकारात्परस्याङ्ग संज्ञानिमित्तभूतस्य भिस ऐस्नेत्यर्थाभ्युपगमेनादोषात्, ननूक्तस्थले दोषवारणाय वर्णाश्रये चान्तादिवत्त्वप्रतिषेध इति कृतस्य वार्त्तिकस्य, न वाऽताऽऽप्यातिदेशादिति वचनमङ्गीकृत्य प्रत्याख्यानं न

युक्तंलाघवाभावादिति चेन्नास्य वचनस्य फलितत्वे-
न तदपेक्षया लाघवात्, अतएवान्तादिवर्णमात्रवृत्ति
धर्म्मानतिदेशादिति तदर्थं इति नागेशः नन्वस्य
कथं फलितत्वमिति चेच्छृणु षत्वतुकोरसिद्ध इति
सूत्रस्थतुग्ग्रहणेनार्थवन्मात्रवृत्तिधर्म्मस्यैवानेनाति-
देशादत्त्वह्रस्वत्वादीनामर्थवदशब्दवृत्तित्वस्यानर्थक-
शमघटकाकारवृत्तित्वस्य च सत्त्वेनार्थवन्मात्रवृत्ति
त्वाभावात्तेषामनतिदेशात्, स्थानिवद्भावप्रकरणा
नन्तरं वदिति न्यासे पूर्वपरयोरित्यकारात्पूर्वपराभ्यां
तुल्यं कार्य्यमित्यर्थात्सकलेष्टसिद्धावन्तादिग्रहणसा
मर्थ्यादताद्रूप्यस्यैवातिदेशस्य ज्ञापनाच्च नन्वस्य व
चनस्यान्तवर्णमात्रवृत्तिधर्म्मस्यादिवर्णमात्रवृत्तिध-
र्म्मस्यानतिदेशादित्यर्थे ऽत्त्वस्यान्यत्रापि सत्त्वेना
न्तवर्णमात्रवृत्तित्वाभावादिदमनुपपन्नमिति चेन्ना-
न्तवृत्तिवर्णमात्रवृत्तिधर्म्मस्येत्यर्थवर्णनेनोक्तदोषा-
भावात्, एवञ्च वर्णमात्रवृत्तिरन्तवृत्तिधर्म्मो वर्ण-
मात्रवृत्तिरादिवृत्तिश्च धर्म्मस्ताद्रूप्यमिति फलितं।
नन्वेवं क्षीरपेणेत्यादावेकादेशस्य वर्णमात्रवृत्तित्वा
दतिदेशो न स्यादिति चेन्न स्थानिविशिष्टधर्म्मघ-

टितधर्म्मे ऽन्तादिवद्भावोनेत्यर्थात् वैशिष्ट्यं च, स्व वृत्तित्व स्वस्थानिकादेशावृत्तित्व स्ववृत्त्यल्त्वव्या-प्यत्वसम्बन्धैः, प्रकृते द्वितीयसंबन्धविरहान्न दोषः, अत्रातिदिदिक्षितधर्म्म प्रवेश्य वारणन्तु न युक्तं पूर्वोत्तरपदनिमित्तकार्य्यादिति परिभाषाया अवतरणे सोमेन्द्र इत्यत्रोत्तरपदाद्यच्त्वस्यान्तादिव द्भावेन प्रदर्शनपरनागेशग्रन्थविरोधात्, नेन्द्रस्यपर-स्येतिसूत्रस्य परिभाषायां ज्ञापकतयोपन्यस्तस्यापि विरुद्धत्वाच्च, मम त्वानेयस्योत्तरपदत्वसमाना-धिकरणस्याद्यच्त्वस्यादेशे न्द्रशब्दे ऽभावेन तत्र ताद्रूप्यस्यसुलभत्वात्। अन्ये तु स्ववृत्तिप्रवर्त्तनीयशा स्त्रघटकपदप्रयोज्योपस्थितीयमुख्यविशेष्यतावच्छे-दकत्वसंसर्गेण स्थानिविशिष्टधर्म्मघटितधर्म्मस्ता-द्रूप्यमिति स्वीकारेण क्षीरपेणेत्यत्रैकाच्त्वस्य प्र-वर्त्तनीयशास्त्रघटकैकाजुत्तरपदप्रयोज्योपस्थितीय-प्रकारत्वान्नदोषः खट्वाभिरित्यादावतो भिस इति शास्त्रघटकातपदप्रयोज्योपस्थितीयमुख्यविशेष्यताव च्छेदकत्वस्यात्त्वे सुलभत्वात्तत्त्वं सुलभमित्याहुः के चित्तु वर्णमात्रवृत्तित्वस्य तत्वे रमाभिरित्यादावैसा

देशवारणे ऽपि रमाऽऽदिशब्देभ्यो ऽदन्तात्प्रातिपदि
कादिनिठनौ भवत इत्यर्थेनात इनिठनावित्यनेनेना
दिप्रत्ययो दुर्वार एव स्यादतो ऽन्तादिवर्णविशिष्ट
वर्णमात्रवृत्तिधर्म्मघटितधर्म्मस्ताद्रूप्यं, वैशिष्ट्यं च,
स्ववृत्तित्व स्वस्थानिकादेशाऽवृत्तित्व सबन्धाभ्यां प्र-
कृते वर्णमात्रवृत्तिधर्म्मस्यात्त्वस्य रमावयवाकारवृत्ति-
त्वस्य स्वस्थानिका कारादेशाऽवृत्तित्वस्य च सत्त्वे
नोक्तधर्म्मघटितादन्तत्वस्य ताद्रूप्यसत्त्वेनातिदेष्टु
मशक्यत्वेनेनादेरप्रवृत्तेः क्षीरपेणेत्यादौ तु वर्ण-
मात्रवृत्तिधर्म्मघटितत्वाभावेनाताद्रूप्यात् अत्रा-
दिवर्णविशिष्टवर्णमात्रवृत्ति धर्म्मघटितत्वं चातिदि-
ष्टमपि गृह्यते तेनात्त्वस्यापि ताद्रूप्याद्तिदेशाभावे
न रमाभिरित्यत्र भिस ऐस्न, नन्वेवं सोमेन्द्र इत्यत्र
गुणे परादिवद्भावेन कृतैकादेशे एकारे ताद्रूप्यादु
त्तरपदाद्यच्त्वमतिदेष्टुन्न शक्यत इति नाशेशग्रन्था-
सङ्गतिः वर्णमात्रवृत्त्यच्त्वधर्म्मस्यादिवर्णेन्द्रघटके
कारवृत्तित्वे ऽपि तत्स्थानिकैकाररूपादेश वृत्तित्वेना-
ताद्रूप्यादिति चेन्न उत्तरपदादिभूतो योऽच् तत्त्वमपि
वर्णमात्रवृत्त्येवेति वर्णमात्रवृत्तेरुत्तरपदाद्यच्त्वस्या-

दिवर्णेन्द्रघटकेकारवृत्तित्वस्य तत्स्थानिकैकारावृत्ति-त्वस्य च सत्त्वेनोत्तरपदाद्यच्त्वघटितत्त्वस्यव्यपदेशि-वद्भावेनोत्तरपदाद्यच्त्व सत्त्वात्तस्य ताद्रूप्यात्, एका-जुत्तरपदत्वं तु न वर्णमात्रवृत्तिधर्म्मोऽतोन क्षीरपेणे-त्यादौदोषःस्थानिवद्भावेन तु नैतल्लभ्यमप्राधान्येना-लाश्रयणात्,एकाजुत्तरपदत्वस्याल्त्वव्याप्यधर्म्मघटित त्वादानुमानिकस्थान्यादेशभावेनापिपतृत्त्येकाजुत्तरप दत्वं पे इत्यत्रानेतुमशक्यं, न चैकाच्त्वं प इत्यस्य स्वतः सिद्धं स्थानिवद्भावेनोत्तरपदत्वमात्रमतिदि-श्यत इति वाच्यमुत्तरपदत्वस्याशास्त्रीयत्वात् अने न शास्त्रीयत्वस्यैवातिदेशात्, शास्त्रीयत्वं च शास्त्रकारीयशङ्कैततावच्छेदकरूपावच्छिन्नपदादिप-दप्रतिपाद्यनावच्छेदकत्वमेतेनान्तादिवच्चेति सूत्र दीक्षितोक्तं स्थानिवत्सूत्रेण गतार्थमिदमित्यन्तमयु-क्तं क्षीरपेणेत्यत्रैकाजुत्तरपदत्वातिदेशार्थं तस्यावश्य-कत्वादिति सूचितम्, नन्वनल्विधावित्यस्य प्राचां मते स्थान्यवयवाल्वृत्त्यल्मात्रवृत्त्यतिदिदिक्षितधर्म्म घटितधर्म्मावच्छिन्नोद्देश्यताके विधौ स्थानिव-द्भावो नेति सिद्धान्तार्थेनैकाच्त्वस्य स्वतः सिद्ध-

त्वेनोत्तरपदत्वस्याल्मात्रवृत्तित्वाभावेन न दोष इति चेन्न भियो हेतुभये षुगिति सूत्रे भी ई इति प्रश्लिष्य भिय इति साधयतां नये, एकादेशे वर्णयोरेव स्थानित्वेन स्थानितापर्य्याप्त्यधिकरणवृत्तिधर्म्मस्यैव स्थानिवत्सूत्रेणातिदेशेनैकादेशविशिष्टे धातुत्वाद्यनापत्तेः, अन्तादिवच्चेत्यस्य सत्त्वे भीवृत्तिधातुत्वं कृतैकादेशविशिष्टे ऽतिदिश्य तत्त्वमुपपन्नं मानुमानिकादेशकल्पकवाक्यमन्तादिघटितसमुदायस्यैकादेशघटित आदेश इत्येव न तु प्रत्येकं तयोः स्थानित्वबोधकं, प्रत्येकं स्थानितोपगमे स्वशब्दस्याश्वशब्देन समासे सवर्णदीर्घे स्वाश्वेनेरितुं शीलमस्येति स्वाश्वेरीत्यत्र गुणम्बाधित्वा स्वाश्वशब्दे स्थानिवत्त्वेन स्वशब्दत्वमादाय स्वादीरेरिणोरिति वृद्ध्यापत्तिः, किञ्चान्तादिवच्चेति सूत्रस्यैवाभावेन तन्निषेधकस्योभयत आश्रयणेनान्तादिवदित्यस्य सुतरामभावेनाभीयादित्यादौ स्थानिवद्भावेनैकादेशविशिष्टे ऽभीत्यत्रोपसर्गत्वं पुनरपि स्थानिवद्भावेनैकादेशविशिष्टे ईयादित्यत्रेण् धातुत्वञ्चादायैतेर्लिङीति इत्वापत्तिः, नन्वन्तादिवच्चेत्यस्याभावे तन्नि

षेधकस्योभयतआश्रयणेनान्तादिवदित्यस्यापिस्था-न उभयत आश्रयणे न स्थानिवदित्येवं स्वीक्रियमाणे प्रकृते स्थानिवत्त्वाप्राप्त्याइस्याप्रवृत्तिरिति चेन्नाचः परस्मिन्नित्यस्याप्युभयत आश्रयणेऽप्रवृत्त्यापत्तौ प्लायत इत्याद्यसिद्धिरिति नागेशः। परे तु स्थानिवत्सूत्रेण गतार्थमिदमिति प्राचीनमतमेव ज्यायः, क्षीरपेणेत्यादौ प इत्यत्रैकाच्त्वं स्वतः सिद्धमुत्तरपदत्वं च स्थानिवत्सूत्रेण सुलभमिति न दोषः तत्र शास्त्रीयत्वं च शास्त्रस्थपदशक्यतावच्छेदकत्वमेव तच्चोत्तरपदत्वस्याप्यस्त्येव, आनुमानिकस्थान्यादेशवाक्यन्तु स्थानितावच्छेदकपर्य्याप्त्यधिकरणघटितस्थाने आदेशघटितो भवतीत्येव स्वीक्रियते, स्थानिवत्सूत्रस्य च स्थानितावच्छेदकपर्य्याप्त्यधिकरणवृत्तिधर्म्म आदेशतापर्य्याप्त्यधिकरणे भवतीत्यर्थः एवं च भियो हेतुभये षुगिति सूत्रे भिय इत्यादावकः सवर्ण इत्यत्र पूर्वपरयोरित्यधिकारात्स्थानितावच्छेदकपूर्वत्वपर्य्याप्त्यधिकरणभी-वृत्तिधातुत्वमादेशतापर्य्याप्त्यधिकरणे एकादेशविशिष्टे भीत्यत्र स्थानिवत्त्वेनातिदिश्य भीत्यस्य धा-

तुत्वेनेयङ्प्रवृत्तेर्न्न दोषः, स्वाश्वशब्दे तु स्थानिताव
च्छेदकपूर्वत्वपर्य्याप्त्यधिकरणस्ववृत्त्यकारघटितत्व-
धर्म्मस्य स्वाशब्दे ऽतिदेशे ऽपि स्वाश्वशब्दे
तदभावान्न स्वाश्वेरीत्यादौ वृद्धिः, किञ्चानुमानिक
स्थान्यादेशभावकल्पे स्थान्यघटित आदेशघटितः
स्थानिसमभिव्याहृतयावद्वर्णघटितः स्थानिसमभि
व्याहृतवर्णेतराघटित आदेशो भवतीत्यर्थो ऽवश्यं
कल्पनीय इतरथा सुधीत्यस्य स्थाने दध्यादेशापत्तेः
एवञ्च स्वस्य स्वेत्येवादेशो वक्तुं साम्प्रतं न तु
स्वाश्वः, एवं सति स्थानिवत्सूत्रेणैवनिर्वाहो न चै-
वमप्यभीयादित्यादौ स्थानिवत्त्वेनैकादेशविशिष्टे
ऽभीत्यत्रोपसर्गत्वमेकादेशविशिष्टे ईयादित्यत्रेण् धा
तुत्वञ्चातिदिश्यैतेर्लिङीति ह्रस्वापत्तिर्दुर्वारैवेति
वाच्यं स्थानिवद्भावेनाभीत्येकादेशविशिष्टे उपसर्ग
त्वे ऽपि ततः परस्य यादित्यस्य सत्त्वेनण्धात्ववयवे
काराभावेन ह्रस्वाप्रवृत्तेः, अभिइयादिति स्थिते
सवर्णदीर्घं बाधित्वा धातूपसर्गयोः कार्य्यस्यान्तरङ्ग
त्वेन पर्य्यन्यवन्न्यायेन ह्रस्वे ततो दीर्घे स्थानि-
वत्त्वेनोपसर्गत्वस्येण्धातुत्वस्य चातिदेशे ऽपि लक्ष्ये

लक्षणस्येति न्यायेन पुनर्हस्वाप्रवृत्तेश्च विकारकृतलक्ष्यभेदस्तु नाश्रयणीय उद्वोढामिति भाष्योदाहरणादित्याहुः ॥

अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ।

स्वादिविधौ ङ्याप्प्रातिपदिकादित्यस्याधिकाराद्यतोऽपि पूर्वसूत्रेभ्य इत्यादेर्लेखनन्तु न युक्तन्तत्रापि प्रातिपदिकादित्यस्याधिकारात् अर्थोऽस्यास्तीत्यर्थवत् तदस्यास्तस्मिन्निति मतुप्, अर्थाच्चासन्निहित इतीनिस्तु न, असन्निहितत्वाभावात्, तत्त्वं च स्वविषयकेच्छासमवायित्वम् एवं चार्थवानित्यत्रार्थविषयकेच्छासमवायित्वाभावान्नासन्निहितत्वमयुक्त इनिः किन्तु मतुबेव, सिद्धश्चार्थीत्यादावर्थ लिप्सोस्तस्य स्वविषयकेच्छा समवायित्वादसन्निहितत्वमयुक्त इनिः अर्थमात्रवतोऽप्यर्थविषयकेच्छासत्त्वे तु तत्रापीष्ट एवेनिः तत्रेनेरनिष्टत्वे तु स्वाभाववत्त्वे सतीति निवेशनीयम् एवञ्च विद्यार्थीत्यादावपीनिः सिद्धः न कर्म्मधार यान्मत्वर्थीय इत्यस्य लाघव मूलकतया कर्म्मधारयपदस्य समासमात्रोपलक्षक-

त्वे तु विद्यामर्थयते याचत इत्यर्थे णिनिरेव, न त्विनिः, उगिद्चामिति नुमापत्तिस्तु नैव वक्तुं शक्या तस्य शब्दस्वरूप विशेषणतया सोर्ल्लुकाल्लुप्तत्वेन प्रत्ययलक्षणाप्रवृत्तेः, अर्थवत्त्वं वृत्तिमत्त्वं, सा च शक्तिलक्षणाऽन्यतररूपा, ईश्वरसङ्केतः शक्तिःआधुनिकसङ्केते, न शक्तिः, तत्रापि शक्तेः सत्त्वे त्वीश्वरीयत्वमनुपादेयं, राम इत्यादौ तस्याः सत्त्वात्तद्वत्त्वेनार्थवत्त्वम् शक्यसम्बन्धो लक्षणा,सिंहो माणवक इत्यादौ शूरादि शक्यार्थसम्बन्धस्य तत्सदृशे गृहीतत्वात्तत्सदृशस्मरणं तस्य तद्वत्त्वेनार्थवत्त्वम् राजपुरुषादिषु समुदायेषु शक्त्यभावान्नार्थवत्त्वम् ऋद्धस्येत्यादीनां राजादिपदार्थेऽन्वयविरहस्तु सविशेषणानां वृत्तिर्न्न वृत्तस्य च विशेषणयोगो नेति वचनादेव, पूर्वपदार्थप्रधान इत्यादिपूर्वपदार्थघटितलक्षणमप्यतएवोपपन्नं, समासग्रहणन्तु विध्यर्थमेव परिष्कृतार्थवत्त्वाभावेन पूर्वेण तदप्रवृत्तेः, बहुपटवइत्यादौ तु तद्धितपदस्य तद्धितविशिष्टपरत्वेनोत्तरेण निर्वाहात् वैशिष्ट्यं च स्वघटितत्व स्वनिष्ठविधेयतानिरूपितोद्देश्यताश्रयघटितत्व स्वविशि

ष्टाघटितत्वसम्बन्धैः,अत्र वैशिष्ट्यं स्वभिन्नत्व स्वनि-
ष्ठविधेयतानिरूपितोद्देश्यताश्रयभिन्नत्व सम्बन्धाभ्यां
प्रकृतिमात्रस्य तत्ववारणाय प्रथमः, प्रत्ययमात्रस्य
तत्त्ववारणाय द्वितीयः,तदुभयघटित वाक्यस्य तत्त्व
वारणय तृतीयः, ननु पचतकीत्यत्र तद्धितवैशिष्ट्या
त्तत्वं स्यादिति चेन्न घटितत्व ज्ञानस्यानुपूर्वीविशेष
वत्तया तदभावादेवाप्रवृत्तेः। अन्ये तु तद्धितवैशि-
ष्ट्यं स्वविशिष्टत्व स्वविशिष्टाघटितत्व सम्बन्धा-
भ्यां प्रथमसम्बन्धघटकं वैशिष्ट्यं स्वघटितत्व
स्वविशिष्टप्रकृतिघटितत्वसम्बन्धाभ्याम् अत्र वैशि-
ष्ट्यं स्वाव्यवहितपूर्वत्व स्वाव्यवहितोत्तरत्वान्य-
तरसंसर्गेण, द्वितीयसम्बन्धघटकं वैशिष्ट्यं स्वभि
न्नत्व स्वविशिष्टप्रकृतिभिन्नत्व सम्बन्धाभ्याम् अत्र
वैशिष्ट्यं स्वाव्यवहितपूर्वत्व स्वाव्यवहितोत्तरत्वा-
न्यतरसंसर्गेण, पचतकीत्यत्र तत्ववारणायाद्यः
बहुपटवस्तिष्ठन्तीति वाक्ये तत्ववारणाय द्वितीयः
नन्वेवमकैदित्यत्र तद्धितवैशिष्ट्येन तत्वापत्तिरि-
ति चेन्न स्वनिष्ठविधेयतानिरूपितसुप्त्वानवच्छि-
न्नोद्देश्यताश्रयाघटितत्वरूपसम्बन्धप्रक्षेपेणादोषात्,

सूत्रघटकस्य कृतो ऽपि कृद्विशिष्टपरत्वेन मूलकेनो-पदंशमिति समुदायस्य प्रातिपदिकत्वाप्रवृत्तेः, अत्र वैशिष्ट्यं स्वघटितत्व स्वनिष्ठविधेयतानिरूपि-तोद्देश्यताश्रयघटितत्व, स्वविशिष्टाघटितत्वसम्ब-न्धैः, अत्र वैशिष्ट्यं स्वभिन्नत्व स्वनिष्ठविधेयता-निरूपितोद्देश्यताश्रयभिन्नत्व सम्बन्धाभ्याम्, स-म्बन्धफलन्तु स्फुटतरत्वान्नोक्तम्, इति मीमांसका-नुयायिनः; विशिष्टशक्तिस्वीकर्तॄणां सिद्धान्तिनां नये तु समासेऽपि शक्तिसत्त्वात्तत्राप्यर्थवत्त्वम् समासग्रहणन्तु नियमार्थमेव, कृत्तद्धितेति सूत्रे ऽर्थवदित्यनुवृत्तिसामर्थ्यात्तदन्तविधिः, कृत्तद्धिता-न्तञ्चैवार्थवन्न केवलाः कृतस्तद्धिताश्चेति भाष्य-विरोधविरहायाप्यदर्थवत्त्वमङ्गीकृतम्, तत्र हि प्र-शस्तोऽर्थोऽस्येत्यर्थवत्, प्राशस्त्यमर्थे च एकार्थी-भावेन लौकिकप्रयोगे प्रसिद्धत्वरूपन्तादृशप्रसि-द्धार्थवत्त्वमेवार्थवत्त्वं, तच्च कृदन्ते तद्धितान्ते समासे चास्ति न तु प्रत्ययमात्रे समासावयवपदमात्रे च तन्मात्रे ह्येकार्थीभावाभावात्, एकार्थी भावत्वञ्च शक्तिविशिष्टसम्बन्धवत्त्वम्, अत्र वैशिष्ट्यं स्वाश्रय-

घटकपदार्थानुयोगिकत्व स्वाश्रयघटकपदार्थप्रतियोगि कत्व सम्बन्धाभ्याम्, न च घट इत्यादौ घटत्वावच्छिन्न निरूपितशक्त्याश्रयघटकघटपदार्थानुयोगिकत्वं समवायेऽस्ति, स्वाश्रयघटकघटपदार्थ प्रतियोगिकत्वमपि तस्मिन्नस्तीति तत्त्वापत्तिरिति वाच्य मुक्त सम्बन्धद्वयं विहाय स्वाश्रयघटकपदपर्य्याप्तशक्तिप्रयोज्योपस्थितीयमुख्यविशेष्यताश्रयानुयोगिकत्व, स्वाश्रयघटकपदपर्य्याप्तशक्तिप्रयोज्योपस्थितीयमुख्यविशेष्यताश्रयप्रतियोगिकत्व सम्बन्धद्वयनिक्षेपेण द्वितीय सम्बन्धविरहेणादोषात्, नचैवं वाक्येप्याकाङ्क्षारूपायाः शक्तेः सत्वात्तत्वापत्तिरिति वाच्यमुपस्थापकतारूपायाः शक्तेरभ्युपगमेन तत्र तदभावादिति बोध्यम्। वस्तुतस्तु अर्थवदित्यनुवृत्तिसामर्थ्यात्तदन्तविधिरित्यस्यानुवृत्तिस्वभावादनुवृत्तमर्थवदिति विशेष्यमादाय तदन्तविधिः, संज्ञाविधाविति निषेधस्तु ज्ञापकसाजात्यात्तदादिविशेष्यमादाय तदन्तविधेरेव, कृत्तद्धितान्तं चैवार्थवन्न केवलाः कृतस्तद्धितावेत्यस्य कृत्तद्धितान्तं चैवार्थवत्प्रातिपदिकं, न तु केवलाः कृतस्तद्धिता वा

चैवशब्दयोरप्यर्थभिन्नक्रमत्वेन केवला: कृतस्तद्धिता चैवार्थवन्तो न, अपि तु कृत्तद्धितान्तमप्यर्थवदिति वा भाष्यव्याख्याने सूत्रद्वये ऽपि प्राचोक्तमर्थवत्त्वं वक्तु साम्प्रतं, तादृशप्रसिद्धार्थवत्त्वरूपार्थवत्त्वस्य सूत्रद्वये वक्तुमशक्यतया तद्धेयमेव, अन्येतु पञ्च गव धनइत्यत्र पञ्चगवेत्यस्यार्थवत्त्ववारणायो त्तरसूत्रे ऽन्यदर्थवत्त्वमभ्युपगतमेवञ्च पञ्चगवमात्रवृत्त्ये कार्थीभावविरहेणा दोषादित्याहु:, परे तु स्वपर्य्याप्त्यधिकरणत्व स्वप्रयोज्यबोधजनकत्वप्रकारकतात्पर्य्यीयविशेष्यतापर्य्याप्त्यधिकरणत्व सम्बन्धाभ्यां वृत्तिविशिष्टत्वमेवार्थवत्त्वम्, रामघटकान्त्याकारादीनामर्थवत्त्ववारणायाद्य:, राज्ञ: पुरुषावित्येतद्घटकस्य राज्ञ: पुरुषेत्यस्यार्थवत्त्ववारणायान्त्य: भाष्यविरोधस्तु पूर्वोक्तयुक्त्यैव परिहरणीय:, न चैवमप्रत्ययग्रहणस्यावश्यकत्वेन कृत्ताद्धितान्तं चैवार्थवदिति भाष्यप्रतीकमुपादाय लौकिकार्थप्रत्यासन्नो ऽभिव्यक्ततरो यो ऽर्थ: प्रत्ययान्तेषु लक्ष्यते स आश्रीयत इति कैयटग्रन्थासङ्गतिरिति वाच्यं भाष्यस्यान्यरीत्या व्याख्यानेनाप्यविरोधत्वे कैयटग्रन्थस्यायुक्तत्व:

स्यापि कल्पयितुं शक्यत्वादित्याहुः, ननु पूर्वोक्त
रसूत्रयोर्वृत्तिमत्त्वमेवार्थवत्त्वमस्तु, पूर्वत्र शक्तिलक्ष
णान्यतररूपैव सा, उत्तरत्र कृत्तद्धितसमासैकशेषम
नाद्यन्तधातुरूपाः पञ्च वृत्तयः सन्तु कृत्तद्धितसमा
सग्रहणस्य तु नास्ति वैयर्थ्यमेकशेषादेः प्रातिपदि-
कत्वव्यावृत्तये तस्यावश्यकत्वात्, तत्त्वन्त्वेकशेषस्थ
ले वक्तुमशक्यं विभक्त्यन्तानामेकशेष इति पक्षस्य
शिष्यमाणविभक्तिश्रवणापत्तिभियैव निराकृतत्वा
त्, नाप्यर्थवतो ऽनुवृत्तिर्व्यर्था तदन्तविधिलाभाय
तस्यावश्यकत्वात्, समासपदस्य वृत्तेरेकशेषरूपाया
उपलक्षणत्वेन चेन च विभक्त्यन्तानामेकशेष इति
पक्षस्य स्थापनन्तु न युक्तं भाष्यादौ तत्पक्षस्थाप
नस्यादृष्टत्वादिति चेन्न पञ्चनाधप्रिय इत्यादौ स-
मासत्वस्य पञ्चनावेत्येतद्वृत्तित्वेन प्रातिपदिकत्वा-
ट्टाबापत्तेः, ङीबापत्तिस्तु वक्तुमशक्या टिड्ढाणञिति
सूत्रे ऽनुपसर्ज्जनाधिकारस्य सत्त्वेन पञ्चनावेत्य-
स्योपसर्ज्जनत्वात्, स्त्रियाः पुम्वदिति पुंवद्भावस्तु न
अप्रियादिष्विति प्रतिषेधात्, गोस्त्रियोरित्यस्यापि न
प्रवृत्तिः, राजकुमारीपुत्र इत्यादेः सिद्धये प्रत्यासत्त्या

यत्समासीयोपसर्ज्जनत्वं तत्समासीयप्रातिपदिकस्य ग्रहणेन पञ्चनावेत्यस्य बहुव्रीहिसमासीयोपसर्ज्जनत्वेन तत्समासीयप्रातिपदिकत्वस्य समुदायवृत्तित्वात्, न चोत्तरपदाऽव्यवहितपूर्वत्वमुपजीव्य जायमानः समासस्तमुपजीव्यजायमानष्टच् उत्तरपदाऽव्यवहितपूर्वत्वविघातकटाब्विधावनिमित्तं स्यादिति सन्निपातपरिभाषया टाबनस्यादिति वाच्यं कुम्भकारेभ्य इत्यादिभाष्यप्रयोगेण परम्परासन्निपातविघातके सन्निपातपरिभाषाया अप्रवृत्तेः, परम्परासन्निपातविघातके तत्प्रवृत्तौ मानाभावाच्च, न च समाससंज्ञाविधायकताद्धितार्थेति शास्त्रीयाभ्यनुज्ञावाक्ये सन्निपातपरिभाषया सङ्कोचः स्यादिति टाबप्रवृत्तिरिति वाच्यम् संज्ञाशास्त्रे ऽभ्यनुज्ञावाक्यस्यैवाभावाद्विधिशास्त्रे तस्याङ्गीकारात्, न च संज्ञाशास्त्रे ऽभ्यनुज्ञावाक्यस्याभावे, दाक्षिः, दिदृक्षुरित्यादावङ्गसंज्ञा ऽल्लोपे ऽनिमित्तं स्यादिति भाष्यं विरुध्येतेति वाच्यं तादृशभाष्यस्यैकदेश्युक्तित्वेनादोषात्, न चैवमप्युपसर्ज्जनं पूर्वमित्यस्यानुपसर्ज्जनाऽव्यवहितपूर्वमुपसर्ज्जनं प्रयोज्यमित्यर्थे एतच्छास्त्रीया

भ्यनुज्ञावाक्ये सङ्कोचेन पञ्चनावप्रिय इत्यत्र टाब्न स्यादिति वाच्यमव्यवहितांशस्य फलाभावेन तन्निवेशाभावात् यत्तु न यासयोरिति निर्देशेन टापि कर्त्तव्ये सन्निपातपरिभाषा न प्रवर्त्तत इत्युक्तं तन्न बुद्धावित्यत्र टाबापत्तेः, यदप्युक्तं पूर्वान्तवद्भावेन सन्निपातविघाताभावमादाय सन्निपातपरिभाषाया अप्रवृत्तिरिति तदपिनातिदेशिक सन्निपातविघाताभावमादाय सन्निपातपरिभाषाया अप्रवृत्तेरस्वीकारात्, न च पञ्चनावेत्यस्य प्रातिपदिकत्वाभावाट्टजपि कथमिति वाच्यं समासान्तविधौ प्रातिपदिकादित्यस्यासम्बन्धादित्यव्ययीभावप्रकरणे नागेशैरभिहितत्वात्! अथ पूर्वोक्तरसूत्रद्वये विभिन्नमर्थवत्वद्वयमप्रत्ययपदस्यावर्त्तनमप्यङ्गीकुर्वाणानां प्राचां नयमपाकर्त्तुमुत्सहमाना नवीना उभयसूत्रे ऽर्थवत्त्वमेकमेवैतत्संज्ञाफलभूतविभक्तीतरसमभिव्याहारानपेक्षया लोके ऽर्थविषयकबोधजनकत्वरूपं स्वीकुर्वन्ति, तत्रैतत्संज्ञाफलभूतेति वस्तुस्थितिकथनं न त्वर्थवत्वशरीरघटकमतएव शब्दरत्ने न दृश्यते तदिति केचित्, ओदनं पचतीत्यादावोदनं पचेति समुदा

यस्य विभक्तितीतरघटादिसमभिव्याहारानपेक्षयैवा-
र्थविषयकबोधजनकत्वादर्थवत्त्ववारणायैतत्संज्ञाफल
भूतेति विशेषणं विभक्ताविति राघवेन्द्राचार्य्यः, दे-
वदत्तो गार्ग्य इति सुब्विभक्त्यन्तसमुदायघटकत-
द्धितान्तस्य राज्ञः पुरुषाविति सुब्विभक्त्यन्तसमुदा
यघटकपुरुषान्तस्य च विभक्ति-सु-आ-वितरघटा
दिसमभिव्याहारानपेक्षयैवार्थविषयकबोधजनकत्वा
दर्थवत्त्ववारणायैतत्संज्ञाफलभूतेतिविशेषणमितिपरे,
विहाय विभक्तिपदं तिङितरसमभिव्याहारान
पेक्षयेति निवेशयतां नय ओदनं पचेति समुदाय
स्यार्थवत्त्वस्य निराकर्त्तुमशक्यत्वात्, राम इत्यादा-
वर्थवत्त्वस्य सम्पादयितुमशक्यत्वाच्च, सुबित्तरसमभि
व्याहारानपेक्षयेति वदतां मत ओदनं पचेति समु-
दायस्यार्थवत्त्वाभावे ऽपि राम इत्यत्रेव देवदत्तो
गार्ग्य इत्यादावपि समुदायघटकदेवदत्तो गार्ग्यादे
रपि तत्त्वस्यनिवारयितुमशक्यत्वात्, तस्मात्तान्निवेश
आवश्यकः । अथात्र कः समासः, एषाचासौ संज्ञा
एतस्य संज्ञा वा, कर्म्मधारयाश्रयणे राज्ञः पुरुष
इत्यादौ प्रातिपदिकसंज्ञाफलभूत—सुविभक्तीतर

घटादिसमभिव्याहारानपेक्षयैवार्थविषयकबोधजन-कत्वादर्थवत्त्वं राज्ञः पुरुषेति समुदायस्य स्यात् षष्ठीतत्पुरुषाश्रयणे ऽत्र वारणे ऽपि देवदत्तो गार्ग्य इत्यत्र देवदत्तो गार्ग्येति समुदायस्य त-द्धितान्तत्वप्रयुक्तावाप्तप्रातिपतिकत्वस्यप्रत्ययग्रहणप रिभाषालब्धतदादिपदोपस्थितिद्वारावारणपरभाष्य-मसङ्गतं स्यात्, देवदत्तो गार्ग्येति समुदायस्य प्रातिपदिकत्वप्रयुक्तविभक्तीतरगार्ग्यप्रकृतिक सु विभक्ति समभिव्याहारापेक्षयैवार्थविषयकबोधज-नकत्वेनार्थवत्त्वाभावात्, यत्तु कर्म्मधारयाश्रयणे ऽधातुः किम्अपि काकः श्येनायत इति भाष्यं विरु-ध्येत, प्रातिपदिकसंज्ञाफभूत विभक्तीतर-ते-समभि-व्याहारापेक्षयैवार्थविषयकबोधजनकत्वेन सेनाये त्यस्यार्थवत्त्वाभावात्, आवृत्तिमविज्ञाय प्रवृत्तमिदं भाष्यस्थं प्रत्युदाहरणं न प्रत्ययान्ततदादित्वप्रयु-क्तं हेयम्, काण्ड इत्यादौ सत्त्वप्रधानप्रातिपदिक-स्याभावेन ह्रस्वो नपुंसक इत्यस्याप्रवृत्तौ प्रातिपदि कत्वे पि क्षत्यभावेन प्रत्ययान्तग्रहणं प्रत्याख्यात ञ्चेति तन्न भाष्ये तादृशप्रत्युहारणस्यानुपलम्भा-

त्, सुपोधात्विति सूत्रस्थधातुग्रहणस्यापिकाकः श्येनायत इत्यत्र सार्थक्यकथनपरभाष्यप्रामाण्ये नाप्रत्ययान्तग्रहणस्यावश्यकत्वाच्च, न चैतत्संज्ञा फलभूतविभक्त्यपेक्षया लोके ऽर्थविषयकबोधजनकत्वमित्येवास्तु कृतं नञ्द्वयप्रवेशेनेति वाच्यम धातुरित्यादिपर्य्युदासस्य वैफल्यस्य वारयितुमशक्यत्वात्, न च नञ्द्वयप्रवेशो ऽहन्नित्याद्यर्थमधातुरिति पर्य्युदासश्च मास्त्विति वाच्यम्, दधि पश्य राजपुरुष इत्यादौ दधिराजेत्यस्य विभक्तिसमभिव्याहारापेक्षया ऽर्थविषयकबोधजनकत्वाभावेनार्थवत्वानापत्तेः, समभिव्याहारस्यानुपादाने राम इत्यादावेवार्थवत्त्वं न स्यात् सर्वं हि वाक्यं क्रियया परिसमाप्यत इति नियमादस्त्यादिक्रियां विना ऽर्थबोधासम्भवेन विभक्तीतरास्त्याद्यपेक्षयैवार्थविषयकबोधजनकत्वात् समभिव्याहारोपादाने तु समभिहारशब्दस्य नियतपौर्वापर्य्यबोधजनकतया ऽस्ति रामो रामोस्तीति वाक्यदर्शनेनास्त्यादेर्नैयत्यासम्भवात्, ननु लोके ऽर्थविषयकबोधजनकत्वमित्येतावन्मात्रोक्तौ सर्वत्रनिर्वाहे ऽलं तादृशसमभिव्या-

हारानपेक्षयेत्यन्तनिवेशेनेति चेन्न पञ्चगवधन इत्या· दौ पञ्चगवेत्यस्य लौकिकार्थविषयकबोधजनकत्वे नार्थवत्त्वापत्तेः, अथ लोक इति निवेशो व्यर्थ स्ता दृशसमभिव्याहारानपेक्षयेत्यन्ताविशेषणादेव सकले- ष्टसिद्धेरिति चेदत्र केचित् हरिष्वित्यादौ सोरर्थवत्त्वा पत्तेः, तस्यापि तत्तच्छास्त्रबलात्प्रकृत्यनपेक्षया ऽर्थ बोधकत्वात्,, अथैवंविधार्थवत्त्वग्रहणे रमागौरीत्या- दिषु रम-गौरादेः प्रातिपदिकत्वानापत्तिः विभक्तीत- रटाबाद्यपेक्षयैव रमादेरर्थबोधकत्वात् टाब्विधानं त्व· नियतलिङ्गे चरितार्थम्, नापि विभक्तिपदस्य प्रत्यय- परत्वेन निर्वाहो भवानीत्यादौ प्रत्ययेतरानुगागम समभिव्याहारापेक्षयैवार्थबोधकत्वात् विभक्तिपदप- रित्यागेप्येधाञ्चक्र इत्यत्रैधामित्यस्यार्थवत्त्वानाप- त्तिः, न वैतत्संज्ञाफलभूतेतरपदेतरसमभिव्याहारा- नपेक्षयेत्यादिलक्षणाभ्युपगमेन निर्वाहो हरिष्वित्यादौ केवलस्य सोरप्यर्थवत्त्वापत्तेः; एतत्संज्ञाफलभूतेतर सुप्तिङन्तमिति पदेतरसमभिव्याहारानपेक्षयेत्याद्यु- क्तौ हरीत्यादेः सुप्तिङन्तमिति पदेतरत्वेनार्थवत्त्वा- भावेऽपि परमहरिष्वित्यादौ सुप्तिङन्तमिति पदत्वे

न तदितरोदासीनसमभिव्याहारानपेक्षयैवार्थबोधकत्वा त्सोरर्थवत्त्वापत्तिः, यदि च परमस्य हरेश्च सुप्तिङन्तमिति पदत्वे ऽपि समुदायस्य सुप्तिङन्तमिति पदेतरत्वान्न सोरर्थवत्त्वन्तदा मघोरपत्यानि मघवस्तेषु मघुष्वित्यत्र तद्धितप्रत्ययस्य लुकि प्रत्ययलक्षणेन सुप्तिङन्तमिति पदत्वेन तदितरोदासीनसमभिव्याहारानपेक्षया ऽर्थबोधकत्वादर्थवत्त्वापत्तिः, स्वादिष्विति पदत्वानाश्रयपदेतरेति निवेशे तु राज्ञः पुरुषावित्यादौ समुदायघटकपुरुषपदोत्तरजायमानविभक्तिरहितस्य राज्ञः पुरुषेत्यस्यस्वादिष्विति पदत्वानाश्रयपदेतर द्विवचनविभक्ति समभिव्याहारापेक्षयैवार्थबोधकत्वेनार्थवत्त्वाभावे ऽपि पञ्चगवधन इत्यादौ समुदायघटकस्य पञ्चगवेत्यस्यार्थवत्त्वापत्तिः, यत्तु एधाञ्चक्र इत्यादावेधामित्यस्यार्थवत्त्वसिद्धये तिङन्तेतरं निवेश्य चक्र इत्यस्य तिङन्तेतरत्वाभावेनैधामित्यस्यार्थवत्त्वं सङ्गतं. मघुष्वित्यादौ मघोस्तिङन्तेतरत्वेन न सोरर्थवत्त्वमित्युक्तं तन्न अ अभवाव यस्मिन् व्यापारे आभवावो व्यापार इत्यत्राख्यातमाख्यातेनेति समासे परादि

वद्भावेनाभवाधेत्यस्य तिङन्तत्वेन तदितरोदासीन समभिव्याहारानपेक्षयैवार्थबोधकत्वात्सोरर्थवत्त्वाप- त्तिः तन्निभमित्यादौ तिङन्तेतरतदादिपूर्वपदसमभि व्याहारापेक्षयैवार्थबोधकत्वान्निभादेरर्थवत्त्वानापत्ति- श्च स्वादिष्वितिपदत्वानाश्रयपदेतरं विहाय स्ववृत्तिसं ज्ञानाश्रयपदेतरं लक्षणकुक्षौ निः क्षिप्य पञ्चगवेत्य स्य स्ववृत्त्यपर्य्यासिसमाससंज्ञानाश्रयोदासीनपदे- तरधनसमभिव्याहारापेक्षयैवार्थबोधकत्वादर्थवत्त्वाभा वे ऽपि कौम्भकारेय इत्यत्र कारेत्यस्य स्ववृत्तिसं- ज्ञानाश्रयपदेतरकुम्भादिसमभिव्याहारापेक्षयैवार्थबो- धकत्वादर्थवत्त्वाभावेन कुम्भकारेयोप्यापद्येतेति- नागेशग्रन्थासङ्गतिर्दुर्वारैव, ये ऽपि स्ववृत्तिसंज्ञा भाववत्पदेतरं स्ववृत्तिप्रातिपदिकत्वाभाववदितरं वा निवेश्य पञ्चगवस्यार्थवत्त्वां निराचिकीर्षन्ति ते कु- म्भकारेयोप्यापद्येतेति नागेशग्रन्थासङ्गत्यैव निरस्ताः, पूर्वपदेतरेत्यस्यापि प्रवेशे पक्त्रिममित्यत्र पक्त्रीत्यस्य स्ववृत्तिसंज्ञानाश्रयपदेतरपूर्वपदेतरसुसमभिव्याहारा पेक्षयैवार्थबोधकत्वादर्थवत्त्वाभावेन क्त्रेर्म्मम्नित्यमि- ति मप्प्रत्ययो न स्यात्,यदि च सुविभक्तेरपि परम्परया

पक्त्रीत्येतद्वृत्ति प्रातिपदिकसंज्ञाप्रयोज्यत्वेन तादृश संज्ञाफलभूतेतरोदासीनसमभिव्याहारानपेक्षयैव पक्त्रीत्यस्यार्थबोधकत्वादर्थवत्त्वसम्भवस्तदा हरिष्वित्यादौ सोरर्थवत्त्वापत्तिः, अथात्र पूर्वपदे स्वादिष्विति पदत्वाभाववत्त्वं विशेष्यार्थवत्त्वे निराक्रियमाणे त्वेधामासतुः कल्पमित्यत्रासतुरित्येतद्वृत्त्यपर्य्याप्तपदसंज्ञानाश्रयोदासीनपदेतर समासाद्यवयवपूर्वपदेतरैधां समभिव्याहारपेक्षयैवार्थबोधकत्वादासतुः कल्पेत्यस्यार्थवत्त्वानापत्तिः, वृत्तितायामधिकरणतावारकपर्य्याप्तिनिवेशे आसतुः कल्पवृत्तिसंज्ञायाः कस्याश्चिद्विरहेण तादृशसंज्ञानाश्रयैधाम्पदेतरोदासीनसमभिव्याहारानपेक्षयैवार्थबोधकत्वादासतुः कल्पेत्यस्यार्थवत्त्वेतु देवदत्तस्य पञ्चगवधन इत्यादौ देवदत्तस्य पञ्चगवेतिसमुदायवृत्तिसंज्ञायाः कस्याश्चनाभावेन स्ववृत्तिसंज्ञानाश्रयधनपदेतरोदासीनसमभिव्याहारानपेक्षयैवाऽर्थबोधकत्वादर्थवत्त्वापत्तिः, स्ववृत्तित्व विशिष्ट संज्ञानाश्रयपदेतरं लक्षणकुक्षौ सन्निवेश्य विशिष्टाधिकरणताया इतरत्रानभ्युपगमादासतुः कल्पवृत्तित्वविशिष्टसंज्ञाया एधामित्यत्र विरहेण ता

दृशसंज्ञानाश्रयैधाम्पदेतरोदासीन समभिव्याहारान
पेक्षयैवार्थबोधकत्वादत्रार्थवत्त्वसत्त्वे तु पञ्चगव
वृत्तित्वविशिष्ट समाससंज्ञानाश्रयधनपदेतरोदासीन
समभिव्याहारानपेक्षयैव पञ्चगवस्यार्थबोधक-
त्वादर्थवत्त्वापत्तिः, पूर्वञ्च तत्पदं पूर्वपदमिति कर्म्म
धारयं विधायैधामित्यस्यापि पूर्वपदत्वेनार्थवत्त्वे तु
राजीयतीत्यादौ क्यचः स्वादिष्विति पदत्वाभाववत्पूर्व
पदराजीतरोदासीनसमभिव्याहारानपेक्षयैवार्थ बो-
धकत्वादर्थवत्त्वापत्तिस्तस्मात्किमर्थवत्त्वमिति चे-
दत्र के चित् एतत्संज्ञाफलभूते तरस्वानिष्ठविधेयता-
निरूपितोद्देश्यतानाश्रयेतरसमभिव्याहारानपेक्षया
लोके ऽर्थविषयकबोधजनकत्व मेवं च, सकलेष्टसिद्धेर्न्न
दोष इत्याहुः,॥ अन्येतु यस्य प्रादिपदिकत्वं चिकीर्षितं
तन्निष्ठविधेयतानिरूपितो द्देश्यतानाश्र यपदेतर सम-
भिव्याहारानपेक्षया लोके ऽर्थ विषयकबोधजनकत्व-
मर्थवत्त्वम् राम इत्यादौ रामनि ष्ठविधेयतानिरूपितो-
द्देश्यतानाश्रयं घटादिपदेतरानर्थकवाक्यादि समभि
व्याहारानपेक्षयैवार्थबोधकत्वादर्थवत्त्वम्, न च पञ्च
गवधन इत्यत्र पञ्चगवनिष्ठविधेयतानिरूपितो द्देश्य

तानाश्रयपदघनेतरोदासीनसमभिव्याहारानपेक्षये-
वार्थबोधकत्वादर्थवत्त्वापत्तिरिति वाच्यं तादृशार्थ-
विषयकबोधजनकतापर्य्याप्त्यधिकरणत्वस्यैव तत्त्वा
भ्युपगमेनादोषात्, न च गवित्ययमाहेत्यादौ गोनि-
ष्ठविधेयतानिरूपितोद्देश्यतानाश्रयपदेत्ययमाहितरोदा
सीनसमभिव्याहारानपेक्षयाऽर्थबोधकत्वाद्गवित्यस्या
र्थवत्त्वापत्तिरिति वाच्यं तादृशार्थविषयकबोधानुकू
लशक्तिज्ञानाधीनोपस्थिति प्रयोज्यबोधतात्पर्य्येणो
च्चरितत्वस्यैवार्थवत्त्वाभ्युपगमेनादोषात्, न च गा-
मानयेति वाक्ये समुदायशक्त्यभावेन तादृशशक्ति
ज्ञानाधीनोपस्थिति प्रयोज्यबोधतात्पर्य्येणानुच्चरित
त्वादर्थवत्त्वानापत्तिरिति वाच्यं यस्य प्रातिपदिक-
त्वं चिकीर्षितं तन्निष्ठविधेयतानिरूपितोद्देश्यतानाश्र
यपदेतरसमभिव्याहारानपेक्षया लोकेऽर्थविषयकबोधा
नुकूलशक्तिविशिष्टत्वस्यैवार्थं वत्त्वाभ्युपगमात् वैशि-
ष्ट्यञ्च स्वाश्रयत्व स्वनिष्ठविषयतानिरूपितशाब्दबो
धीय विषयताप्रयोजकतापर्य्याप्त्याधिकरणत्व सम्बन्धा
भ्याम् एवं च गामानयेत्यादावर्थवत्त्वस्य सौलभ्येन न
कोऽपि दोष इत्याहुः॥ परे तु स्वनिष्ठोद्देश्यतानिरूपित

विधेयताश्रयेतर समभिव्याहारानपेक्षया लोकेऽर्थविषयकबोधजनकत्व स्वतादात्म्य संबन्धाभ्यां शब्दविशिष्टत्वमर्थवत्त्वम् हरिष्वित्यादौ सुनिष्ठोद्देश्यतानिरूपित विधेयताश्रयेतर हरिसमभिव्याहारापेक्षयैवार्थबोधकत्वान्न सोऽर्थवत्त्वम् एधाञ्चक्र इत्यादावेधामित्यस्य स्वनिष्ठोद्देश्यतानिरूपितविधेयताश्रयचक्रपदेतरोदासीनसमभिव्याहारानपेक्षयैवार्थबोधकत्वादर्थवत्त्वं, पञ्चगवधन इत्यादौ पञ्चगवादेः स्वनिष्ठोद्देश्यतानिरूपित विधेयताश्रयेतरधनादिसमभिव्याहारापेक्षयैवार्थबोधकत्वान्नार्थवत्ता, ननु तन्निभमित्यादौ स्वनिष्ठोद्देश्यतानिरूपितविधेयताश्रयेतर तदादिसमभिव्याहारापेक्षयैवार्थबोधकत्वादर्थवत्त्वानापत्तिः, नापि स्वावधिकपूर्वत्व स्वनिष्ठोद्देश्यतानिरूपितविधेयताश्रयत्व सम्बन्धाभ्यां स्वविशिष्टपदेतरसमभिव्याहारानपेक्षया लोके ऽर्थविषयकबोधजनकत्वसम्बन्धदानेन निर्वाहो हरिष्वित्यादौ सोऽर्थवत्त्वापत्तेः, पदपदेनात्र सुप्तिङन्तमिति विहितस्यैवग्रहणे तु मघोरपत्यानि मघवस्तेषु मघुष्वित्यादावणो लुकि प्रत्ययलक्षणेन सुप्तिङन्तमिति

पदत्वे सोऽर्थवत्त्वापत्तेः, स्वावधिकपूर्वत्व स्वप्रयोज्यपदत्वाभाववत्त्व संसर्गद्वयेन स्वविशिष्टपदपरत्व स्वनिष्ठोद्देश्यतानिरूपितविधेयताश्रयेतरत्व सम्बन्धाभ्यां स्वविशिष्टसमभिव्याहारानपेक्षयेत्यादि सम्बन्धाभ्युपगमे ऽत्र वारणे ऽपि राजपुरुष इत्यत्र स्वन्तपुरुषइत्यस्यार्थवत्त्वापत्तिः, विहाय स्वावधिकपूर्वत्वं, स्वघटितसमासाघटकत्वनिवेशे तन्निभमित्यत्रोक्तदोषस्तदवस्थ एवेति चेन्न स्वविशिष्ट पदेतरत्वं परि त्यज्य स्वघटितपदाघटकपदेतरत्व सम्बन्धनिवेशेन समासाघटकनिभादेः स्वघटितपदाघटकपदत्वेन तदितरोदासीन समभिव्याहारानपेक्षया ऽर्थबोधकत्वेनार्थवत्त्वस्य सौलभ्यात्, नच कौम्भकारेय इत्यत्र कारेत्यस्यार्थवत्त्वाभावेनाप्रातिपदिकत्वे कुम्भकारेयो ऽप्यापद्येतेति नागेशग्रन्थासङ्गतिरितिवाच्यमर्थवत्सूत्रोक्तार्थवत्त्वाभावेनाणन्तस्याप्रातिपदिकत्वाच्चेति नागेशोक्त्या कारेत्यस्यार्थवत्त्वाभावस्यैवेष्टत्वात्, टिड्ढेति सूत्रेद्वितीय तदन्तविध्यभावेकर्म्मण्यणित्येव सिद्धे शीलिकामीतिणविधान सामर्थ्येनाप्रादिपदिकत्वेऽपि ङीबापत्तिरित्याशया-

द्विति वदन्ति, सूक्ष्मदर्शिनस्तु एतत्संज्ञाफलभूतेत-
रो यः सुप्तत्प्रकृत्येतदन्यनरस्तत्समभिव्याहारान
पेक्षया लोके ऽर्थविषयकबोधजनकत्वमित्यभ्युपग-
म्य रमादिषु टाबादेः सुप् तत्प्रकृत्येतदन्यतरत्वविरहेणे
तरपदेन धर्तुमशक्यत्वेनोदासीनसमभिव्याहारान
पेक्षया ऽर्थबोधकत्वेनार्थवत्त्वं सुलभमेव न च तन्नि
भमित्यादौ निभादेरर्थवत्त्वानापत्तिरेतत्संज्ञाफलभू-
तेतर सुप्प्रकृतितत्समभिव्याहारापेक्षयैवार्थबोधक-
त्वादिति वाच्यं मयूरव्यंसकादेराकृतिगणत्वेन तत्र
निभस्य पाठेनाप्रातिपदिकत्वे ऽपि समासबोधना-
न्न दोष इत्याहुः नव्यास्तु स्वनिष्ठोद्देश्यतानिरू-
पित विधेयताश्रयपूर्वपदत्ववदितरसमभिव्याहारान
पेक्षया लोके ऽर्थविषयकबोधजनकत्वमेवार्थवत्त्वम्,
तन्निभमित्यत्र निभनिष्ठोद्देश्यतानिरूपित विधेयता
श्रयपूर्वपदत्ववत्तदितरोदासीन समभिव्याहारानपेक्ष-
या ऽर्थबोधकत्वादर्थवत्त्वम्, पञ्चगवधन इत्यत्र
पञ्चगवनिष्ठोद्देश्यतानिरूपितविधेयताश्रयपूर्वपद-
त्ववदितरधनाद्यपेक्षया ऽर्थबोधकत्वान्नार्थवत्ता, न-
न्वेवं रामघटकरेफस्याप्यर्थवत्त्वापत्तिः, रेफेण दानरू

पार्थबोधमकारादि समभिव्याहारानपेक्षणादिति चेन्न स्वपर्य्याप्त्यधिकरणत्व स्वप्रयोज्यबोधजनकत्वप्रकारकतात्पर्य्यविशेष्यतावत्व सम्बन्धाभ्यां स्वनिष्ठोद्देश्यतानिरूपित विधेयताश्रयपूर्वपदत्ववदितर समभिव्याहारानपेक्षया लोके ऽर्थविषयकबोधजनकता विशिष्टत्वस्यैव तत्त्वाद् बोधजनकता च शक्तिरूपैव लक्षणसमन्वयः स्वयमूहनीय इत्याहुः॥ ननु धनं वनमित्यादावन्तरङ्गत्वादवयवेभ्यः प्रातिपदिकत्वात्सुब्लुकि सति समुदायस्य प्रातिपदिकत्वेन सुपो धात्विति लुक्यर्थवत्यक्रियमाणे ऽपि न दोष इति चेन्न सुब्लुकि नलोपादेर्वारयितुमशक्यत्वात्, पचति धनतीत्यादौ तु न दोषो धातुप्रत्ययान्तपदयोस्तदवयवपरत्वेन तत्र तन्निषेधात्, धिनोतेर्द्धनमिति व्युत्पत्तिपक्षे वनाद्युदाहरणमिति शब्दरत्नकृत् कैयटहरदत्तौ तु वन सम्भक्तौ धनधान्य इत्येतयोर्द्धात्वोः पचाद्यचि व्युत्पादितयोरधातुप्रतिषेधस्तु नाव्युत्पत्तिपक्षाश्रयणादित्युक्त्वा किञ्च प्रतिवर्ण्णं संज्ञा स्यात् न च प्रतिवर्ण्णं धातुसंज्ञेति ब्रूवाणौ नावयवपरतां सूचयतः, युक्तं चैतदवयवपरत्वे मानाभावात् न

चाधातुरप्रत्यय इति पर्य्युदासाश्रयणादर्थवतो ग्रहण मधीते यावक इत्यादावनर्थकयोरपि धातुप्रत्यययोः सम्भवात्, नाप्यर्थवद्ग्रहणपरिभाषया निर्वाहस्तस्या विशिष्टरूपोपादानविषयत्वात्, । अन्ये त्वव्य- येभ्यो विभक्त्युत्पत्तावव्ययादाप्सुप इति वदत्र गमकाभावेन नात्र विभक्त्युत्पत्तिः सम्भवति, सत्ये वगमके विभक्त्युत्पत्तेरभ्युपगमादेव ङ्याप्सूत्रे प्रा- तिपदिकाधिकाराभावे तिङन्तात्तदुत्पत्तिमाशङ्क्य एकत्वादीनामुक्ततया समादधात् भाष्यकृत, तस्मा द्दशदाडिमानीत्याद्यनर्थकसमुदायस्याप्रातिपदिक- त्वमेवास्य मुख्यं व्यावर्त्यं प्रातिपदिकत्वे तु सुपोधा त्विति लुगापत्तिरित्याहुः, राघवेन्द्राचार्य्यस्तु दशदा- डिमानीति निरर्थकपदसमुदायस्तु न व्यावर्त्यः समासग्रहणकृतनियमेनैव व्यावर्त्तनात्, न चार्थवतां यः समुदायो ऽर्थवान् स एव नियमव्यावर्त्य इति वाच्यं व्यावर्त्यसमुदायस्यार्थवत्त्वविशेषणवैयर्थ्यात् भाष्ये तु दशदाडिमानीति पदसमुदायस्यानर्थक- स्य प्रातिपदिकत्वमाशङ्क्यानर्थकत्वेन परिहृत्य ततो गामभ्याजशुक्लामिति सार्थकवाक्यस्य तदा-

शङ्कस्य समासग्रहणकृतनियमेन वारितम् न त्वर्थं वदित्यस्य तद्व्यावर्त्यतया प्रदर्शितम् समासग्रहण कृतनियमस्यासाधारणं प्रयोजनं प्रदर्शयितुमेवानर्थकसमुदायस्यार्थवदित्यनेन व्यावृत्तिः प्रदर्शिता, न तु तस्य तदेव व्यावर्त्यमित्यभिप्रेत्य, हरिषु करोषी त्यादौ षुकरोषीति समुदायस्यानर्थकस्य प्रातिपदि कत्ववारणाय तत्, तस्य प्रातिपदिकत्वे तु सुपोधा त्विति लुगापत्तिः समासग्रहणकृतनियमेन तु न वारणं पूर्वभागस्याऽपदत्वादित्याह, सुपोधात्विति सूत्रे धातुसाहचर्य्यात्प्रातिपदिकसंज्ञाप्रयोजकस्य सुपोग्रहणेनापि लुगापत्तिर्न्न शक्या वारयितुं समुदायघटकस्य सुपोऽपि प्रातिपदिकसंज्ञाप्रयोजकत्वादि तरथा प्रत्ययान्ततदादित्वात्करोषीत्यस्य सा न स्यात्, अपोयोनियन्मतुष्वित्यारम्भाच्च साहचर्य्यपरिभाषाया अत्रानाश्रयणाद्दशदाडिमानीत्यादावपि हरिनये न लुगापत्तिर्न्निवारयितुं साम्प्रतम्, ॥ अथ न धातुरिति विग्रहे नञिति समासे नञर्थैकदेशे प्रतियोगितया धात्वर्थस्यान्वय,ः ननु घटो न द्रव्य मिति वाक्यस्य प्रामाण्यवारणाय प्रतियोग्यवृत्ति-

धर्म्मस्यैव भेदीयानुयोगितावच्छेदकत्वमिति व्युत्पत्तिः, अनुयोगितावच्छेदकस्य पटत्वस्य प्रतियोगिनि घटे ऽवृत्तित्वेन घटो न पट इति वाक्यस्यापि प्रामाण्यं, प्रकृते ऽनुयोगितावच्छेदकस्यार्थवत्त्वस्य प्रतियोगिनि धातौ वृत्तित्वेन भेदानुयोगितावच्छेदकत्वासम्भवादिति चेन्न इतरविशेषणतानापन्ने यत्र नञर्थस्यान्वयस्तत्रैव प्रतियोग्यवृत्तिधर्म्मस्यनञर्थान्वयितावच्छेदकत्वोपगमात्, कथमन्यथा घटान्यद्द्रव्यमानयेत्यस्य प्रामाण्यम्, एवं सति शब्दस्वरूपे विशेषणतापन्ने ऽर्थवति नञर्थस्यान्वये वाधकाभावात्, ननु घटो न द्रव्यमिति वाक्यस्यैव प्रामाण्यवारणाय नञर्थस्योद्देश्यतावच्छेदकावच्छेदेनैवान्वयात्प्रकृते ऽर्थवत्त्वस्य धातावपि सत्त्वेनार्थवत्त्वावच्छेदेन नञर्थान्वयबाधादिति चेन्न इतरविशेषणतानापन्नस्य यत्र नञर्थोद्देश्यता तत्रैवोद्देश्यतावच्छेदकावच्छेदेन नञर्थान्वयः, यत्र चेतरविशेषणतापन्नस्य नञर्थोद्देश्यता तत्रोद्देश्यतावच्छेदकसामानाधिकरण्येनैवान्वयोपगमात्, अन्यथा घटान्यद्द्रव्यमानयेति प्रयोगस्य प्रामाण्यस्य गीर्वाणगुरूणामपि कर्त्तु

मशक्यत्वात्, प्रकृते शब्दस्वरूपे ऽभेदेन विशेषणता पन्ने ऽर्थवति धातुभेदस्यार्थवत्सामानाधिकरण्येना न्वयसम्भवान्नानुपपत्तिः, ननु यद्धर्म्मवाचकपदोत्त रं नञ्पदस्य श्रुतिर्न्नञा तद्धर्म्मावच्छिन्नप्रतियो गिताकभेद एव प्रत्याय्यत इति नियमादत्रापि नञ् पदस्यार्थवत्पदोत्तरं श्रुतेः सत्त्वादर्थवत्त्वावच्छिन्न प्रतियोगिताकभेद एव प्रतीयेतेति चेन्न घटानधि करणं भूतलमिति प्रयोगस्य प्रामाण्यनिराकरणाय समासाघटकयद्धर्म्मवाचकपदोत्तरं नञ्पदस्य श्रवणं तत्रैव नञा तद्धर्म्मावच्छिन्नप्रतियोगिताकभेदः प्रत्याय्यत इति नियमान्नोक्तदोषः, वस्तुतस्तु यद्धर्म्मावच्छिन्नवाचकपदसाकाङ्क्षं नञ्पदं श्रूयते तत्रैव नञा तद्धर्म्मावच्छिन्नप्रतियोगिताकभेदः प्रत्याय्यत इत्येव नियमो ऽन्यथा यो न वह्निमान् स न धूमवानिति वाक्याद्वह्निमद्भेद-धूमवद्भेदयोर्बोधासम्भवात्. न पचति चैत्र इत्यत्र पाकानुकूलकृत्यभावस्य बोधासम्भवात्, निशायामुदितो यो वै स चन्द्रो न च भास्कर इत्यत्र भास्करभेदबोधस्यासम्भवात्, चैत्रस्य धनं न मैत्रस्ये

त्यत्र धने मैत्रस्वत्वाभावस्य बोधासम्भवाच्च । ननु घटत्वगोत्वाद्यन्वयतात्पर्य्येण नित्यो घटो नित्यो गौरित्यादिवाक्यानां प्रामाण्यं निराकुर्वतां पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति व्युत्पत्तिमभ्युपगच्छतां नये ऽत्रापि नञर्थैकदेशे भेदे धात्वर्थान्वयोऽयुक्त इति चेन्न देवदत्तस्य गुरुकुलं चैत्रस्य दासभार्य्येत्यादौ देवदत्तचैत्रादेर्न्निरूपितत्वादिसंसर्गेण पदार्थैकदेशे गुरुत्वादावन्वयदर्शनेन तस्याः साकाङ्क्षपदातिरिक्ते प्रवृत्तेरभ्युपगमात् ॥ अथ धातुप्रतियोगिकभेदस्य भवतिर्न्नैधातिरित्याकारकप्रतीतिसाक्षिकस्य धाताववाधितत्वात्प्रातिपदिकत्वापत्तिः, धातुत्वावच्छिन्नप्रतियोगिताकभेदस्य धातुघटोभयं न धातुरित्याकारकप्रतीतिसाक्षिकस्य धातावप्येकसत्त्वे द्वयं नास्तीतिप्रतीतिबलात्सत्वात्, धातुत्वमात्रावच्छिन्नप्रतियोगिताकभेदनिवेशे तु स्ववृत्तित्वे सति स्वेतरावृत्तित्वमेव धातुत्वमात्रत्वं वक्तव्यं स्वेतरावृत्तित्वं च धातुत्वप्रतियोगिकभेदवदवृत्तित्वं, तच्च धातुत्वघटत्वोभयं न धातुत्वमिति प्रतीतिबलाद्धातुत्वे प्यक्षतं, धातुत्वपर्य्याप्तावच्छेद-

कताकप्रतियोगिताकभेदानिवेशे धातुत्वघटत्वोभय पर्य्याप्तावच्छेदकतायाः प्रत्येकं पर्य्याप्तत्वात्समुदायस्य प्रत्येकानतिरेकाद्धातुत्वे तत्त्वापत्तिः, न च धातुत्वगतैकत्वावच्छिन्नानुयोगिताकपर्य्याप्तिप्रतियोगिताकभेदनिवेशे त्रितयपर्य्याप्तावच्छेदकतायाः पर्य्याप्तिर्य्यद्यपि प्रत्येकं तथापि पर्य्याप्तेरैक्यात्तदीयानुयोगितााया अपि त्रितयनिष्ठाया ऐक्यात्तदवच्छेकत्वं त्रित्वमेव, न तु प्रत्येकगतमेकत्वं तस्य न्यून वृत्तित्वात् तादृशावच्छेदकताकप्रतियोगिताकभेदस्य धातौ सत्त्वे ऽपि नातिव्याप्तिरिति वाच्यं धातुत्ववृत्तित्वविशिष्टत्वेन सैवावच्छेदकता धातुत्व एवास्तीति धातुत्ववृत्तित्वविशिष्टायास्तादृश्या अप्यवच्छेदकताया धातुत्वगतैकत्वावच्छिन्नानुयोगिताकपर्य्याप्तिप्रतियोगित्वेन तादृशप्रतियोगिताकभेदस्य धातावबाधितत्वादिति चेदत्रोच्यते यथा धातुत्ववृत्तित्वविशिष्टावच्छेदकता धातुत्व एव, तथा धर्मत्रयपर्य्याप्तं त्रित्वमपि धातुत्ववृत्तित्वपुरस्कारेण धातुत्व एवेत्यनुभवसिद्धम् एवञ्च तद्वृत्तित्वविशिष्टावच्छेदकतापर्य्याप्त्यनुयोगितााया अनतिप्रसक्तं

धातुत्वगतमेकत्वमिव तद्वृत्तित्वविशिष्टत्रित्वमपि वक्तुंयुक्तं, धातुत्ववृत्तित्वविशिष्टावच्छेदकतात्वेन तादृशावच्छेदकतापर्य्याप्त्यनुयोगितावच्छेदकं धातुत्ववृत्तित्वविशिष्ट त्रित्वमेवैकत्वे च न तत्, तद्वृत्तित्वविशिष्टत्वेनाप्युक्तावच्छेदकतापर्य्याप्त्यनुयोगितावच्छेदकं तद्वृत्तित्वविशिष्टत्रित्वमेवोचितमक्लृप्ते च तत्कल्पने गौरवात्, तद्वृत्तित्वविशिष्टावच्छेदकताप्रतियोगिकपर्य्याप्तिप्रतियोगिताया अवच्छेदकत्वस्यतद्वृत्तित्वविशिष्टत्वे एवाभ्युपगमात् तद्वृत्तित्वविशिष्टावच्छेदकतायाधर्त्तुमशक्यत्वाच्च न चैवं धातुत्वेन घटो नेति प्रतीतिसाक्षिकव्यधिकरण धातुत्वधर्म्मगात्रावच्छिन्नप्रतियोगिताकभेदस्य धातावबाधितत्वात्तत्त्वापत्तिरिति वाच्यं धातुत्वसमानाधिकरणप्रतियोगितानिरूपकस्यापि भेदस्य विवक्षणेन प्रतियोगिताया धातुत्वसामानाधिकरण्यविरहेणादोषात् न च धातुत्वेन धातुघटोभयं नेति प्रतीतिसाक्षिकभेदप्रतियोगिताया धातुत्वसामानाधिकरण्यस्याप्यक्षततया ऽतिव्याप्तिर्दुर्वारैवेति वाच्यं धातुत्वसामानाधिकरण्यावच्छेदकैकत्वावच्छि-

ज्ञानुयोगिताकपर्य्याप्तिप्रतियोगिताकभेदस्य वि-
वक्षणेनादोषात्, न च धातुत्वेन तद्धातुतद्धातुभि-
न्नधातुर्न्नेति भेदप्रतियोगितायाः अपि तथात्वात्तत्वा
पत्तिरिति वाच्यं स्वावच्छेदकतात्वावच्छिन्नप्रतियो-
गिताकपर्य्याप्त्यनुयोगितावच्छेदकत्व, स्वनिरूप-
कानुयोगितानिरूपित निरूपकतावच्छेदकतात्वाव-
च्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितवच्छेदकत्व,
सम्बन्धाभ्यां धातुत्वगतैकत्ववृत्तिप्रतियोगिताकभे-
दवदित्याद्यर्थाभ्युपगमेनादोषात्, स्वपदेन प्रतियो-
गिता ग्राह्या, घटत्वेन धातुर्न्नेति भेदमादायातिव्या-
प्तिवारणायाद्यः, धातुत्वेन घटोनेति भेदमादाया-
तिव्याप्तिवारणाय द्वितीयः, ये तु तद्धातुर्न्नेति प्र-
तीतिसिद्धतद्धातुत्वावच्छिन्नप्रतियोगिताकभेदवा-
रणाय प्रतियोगितायां धातुत्वव्यापकत्वं धातुघटो
भयं नेति भेदवारणाय धातुत्वव्याप्यत्वं च समनि-
यतत्वरूपं, घटत्वेन धातुर्न्नेति भेदवारणाय धातु-
त्वावच्छिन्नत्वं च निवेश्य दोषान् समुद्धरन्ति ते
धातुत्वेन तद्धातुतद्धातुभिन्नधातुर्न्नेति भेदमादाय
दोषस्य तादवस्थ्येनैवहेयाः, वस्तुतस्तु धातुत्वेतर

धर्म्मावच्छिन्न निरूपकतानिरूपितानुयोगित्वानिरूपित धातुत्वावच्छिन्न प्रतियोगिताकभेदवदित्त्याद्यर्थ करणेन धातुत्वेन तद्धातु तद्धातुभिन्नधातुर्न्नेति भेदीयप्रतियोगिताया धातुत्वेतरोभयत्वावच्छिन्ननिरूपकता निरूपितानुयोगितानिरूपितत्वेन वारणसम्भवाद् घटत्वेन धातुर्न्नेति भेदीयप्रतियोगिताया धातुत्वावच्छिन्नत्वविरहेण च वारणसम्भवादलमधिकनिवेशेनेति ध्येयम् ॥ ये ऽप्यनश्च इत्यादावुत्तरपदार्थप्राधान्यसम्पत्तये आरोपितत्वमेव नञर्थमभ्युपगम्योदाहरणानि साधयन्तो दोषान्परिहरन्ति, ते आरोपजन्यप्रतीतिविषयत्वरूपारोपितत्व लक्षणकुक्षिप्रक्षिप्तारोपत्वलक्षण सन्निविष्टाभावप्रवेशजातोक्तदोषनिराकारकायासस्समाश्रयणीयतयैवोपेक्ष्याः, अथात्र सूत्रे ऽधातुग्रहणाभावे ऽहन्नित्यत्र प्रातिपदिकत्वापत्तिः, सत्यामपि धातुसंज्ञायां परत्वात् स्वाद्युत्पत्तिः स्यात्, लडादयः पुत्रीयतीत्यादौ सावकाशाः, भूवादय इति धातुसंज्ञाऽपि श्रियावित्यादावियङादिसम्पादकत्वेन चरितार्था, ननु भूवादय इत्यस्य लविधौ तिबादिविधौ चोपस्थितेर्न्निरवकाशतया ऽप-

वादेस्तिबादिभिर्बाधात्कथमत्र स्वाद्युत्पत्तिरिति चे न्न न लोपः प्रातिपदिकेति नलोपस्य वारयितुमशक्यत्वात्, न च कार्य्यकालपक्षे प्रत्ययान्तत्वेन पर्य्युदासो ऽस्त्विति वाच्यं प्रत्ययलक्षणेनोक्तपर्य्युदासाप्रवृत्ते र्न्न ङिसंबुद्ध्योरिति संबुद्धिग्रहणेन ज्ञापितत्वात्, कथमन्यथा राजेत्यादौ न लोपः स्यात्, न च राजेत्यादौ कृदन्तत्वात्प्राप्तिः तत्राप्यप्रत्यय इत्यस्य संबन्धात् अत एव दाक्षी, दिदृक्षू इत्यादौ पराद्विद्भावेन न सुपो लुक्, न च सुब्लोपविषयमेव ज्ञापकमसति बाधके प्रमाणानां सामान्ये पक्षपात इत्यर्थस्यापि ज्ञापनादन्यथा सूत्रोपस्थितङिसंबुद्धिमात्रविषयता स्यादिति राजपुरुषासिद्धिरिति शब्दरत्नकृत्, न च नलोपो ऽतिङिति न्यासेनाहान्नित्यादौ न दोष इति वाच्यं रामानित्यादौनलोपापत्तेः, नत्वविधानसामर्थ्यात्सा वारयितुमशक्या कॉस्कान् इत्यादावपि नलोपापत्तौ कानाम्रेडित इत्यस्य वैयर्थ्यापत्तेः; तस्माच्छमो न इत्यत्र तस्माच्छसो नस् इति न्यासेन संयोगान्तलोपस्यासिद्धत्वान्नलोपस्य वारणे सर्वस्मिन्नित्यत्र नलोपापत्तिः, नकारोच्चारण

सामर्थ्याचु न सा वारयितुं शक्या, सर्वस्मिन्ह्शय इत्यादौ शयवासवासिष्वित्यलुकि संबोधनविवक्षायां नकारोच्चारणसत्वे लोपे ऽपि तस्या सिद्धत्वाद्गुरु संज्ञायां गुरोरनृत इति प्लुतता सम्प्रत्यगुरुतया प्लुतता न स्याद्यदि चेकोचि विभक्ताविति सूत्रस्थभाष्य प्रामाण्येन गुरुसंज्ञायां कर्त्तव्यायां संयोगान्तलोपस्या सिद्धत्वं न भवतीति कल्प्यते तदा एधेरन् पचेरन् यस्मिन् व्यापारे स एधेरन्न पचेरा व्यापार इत्यत्र नलोपो न स्यात्प्रत्ययग्रहणपरिभाषया तदादेरुपस्थितौ समुदायस्य तिङन्ततदादिभिन्नत्वेन नलोपे तु अ अहन्निति यस्मिन् व्यापारे स आहा व्यापार इत्यत्र पशादिवद्भावेन तिङन्ततदादित्वसत्त्वान्नलोपो न स्यात्, ननु नलोपः सुब्यतो ऽन्तस्येति न्यासो ऽस्तु यतः सुब् विधीयते तादृशं यत्पदं तदन्तस्य नस्य लोप इत्यर्थान्न दोषः, पदस्येत्याधिकारान्न राजानावित्यादौ नलोप इति चेन्न अहन्निवाचरन्नित्यर्थे सर्वप्रातिपदिकेभ्य इति क्विबापत्तेर्दुर्वारत्वात्, अहन्नकरोदित्यर्थे तत्करोतीति णिजापत्तेश्च,, यत्तु गतिकारकोपपदानामिति परिभाषया चर्म्मकार इत्यत्र सुबु-

त्पत्तेः प्राक् समासे नलोपो न स्यात्सिद्धान्ते तु पदस्य
पदत्वयोग्यपरत्वेन न दोष इत्युक्तं तदसत् तथा
पूर्वपदे सुबनुत्पत्तेरबोधनात्, पदत्वयोग्यपरत्वे प्राति
पदिकग्रहणस्य वैयर्थ्यापत्तेः राजानावित्यत्र नलोपाप
त्तेश्च, आवर्त्तिते प्रत्ययपदे प्रत्ययग्रहण परिभाषया त-
दन्तग्रहणमिति नागेशः केचित्तु प्रत्यय इत्यस्यावृ-
त्तौ नञर्थैकदेशे भेदे एकस्य प्रत्ययपदार्थस्यान्वय
इतरस्योपस्थित तदादिपदार्थे ऽसो ऽसामर्थ्यात्समा
सो न स्यादप्रत्यय इत्यस्यावृत्तौ त्वेकस्य भेदे ऽ-
न्वयो ऽन्यस्य प्रत्ययान्ततदादिपरस्य तस्य च भेदे
इति सामर्थ्यसत्वात्समास इति वदन्ति, वस्तुतः
प्रत्यय इत्यस्यावृत्तावपि प्रत्ययग्रहणपरिभाषया
लक्षणाग्राहकतयोभयोः पदार्थयोरेकत्र द्वयमिति
रीत्या भेद एवान्वयेनासामर्थ्यविरहात्, नन्वावृ-
त्तौ किम्मानमिति चेदत्र दीक्षितः, औपगव इत्या
दावुपगु ङस् अ इति स्थिते पूर्वेण प्रातिपदिकत्वे
सिद्धे तद्धितान्तस्य संज्ञा विधानं व्यर्थं स्यादित्य
वोचत्, अस्यापत्यमिरित्यादौ तु अ ङस् इ, इत्य
वस्थायां प्रवृत्तायाः प्रातिपदिकसंज्ञाया एकदेशवि

कृतन्यायेन विभक्तिलुक्यपि सुलभत्वादित्याहुः श ब्दरत्नकृत् अधुनेति सूत्रे ऽधुनाप्रत्यय इदमो लो पश्चेति भाष्य उक्ते ऽपि, धुनाप्रत्यय इदमो ऽशिति तत्र पक्षान्तरस्याप्युक्ततया चारितार्थ्यविरहात्, अ ल्पार्थकादव्ययादशब्दादिनौ यस्येति लोपे, ई, इत्य त्र चरितार्थन्तु न सम्भवति, निपात इति प्रगृह्य संज्ञाया एवान्तरङ्गत्वात्पूर्वं प्रवृत्तेः, प्रादिपदिका धिकाराद्विभाषासुप इत्यत्र सुब्ग्रहणबलाच्च प्राति पदिकात्तद्धितोत्पत्तौ वासुदेववाचकाद शब्दादि- नौ चरितार्थं तु न युक्तम् इनिठनोरेकाक्षरात्प्रतिषे ध इति वार्तिकादेकाक्षरादिन्यादेरप्रवृत्तेः, अशब्दा दतिशायन इष्ठनि नित्यत्वात्प्राप्तं टेरिति लोपं बाधि त्वा ऽन्तरङ्गत्वात्प्रातिपदिकसंज्ञाया एव प्रवृत्तेः, घ- कालतनेष्वित्यलुग्विधानसामर्थ्यात्सुबन्तात्तद्धितोत्प त्तिरिति पक्षस्यैवाभ्युपगमाच्च, ननु घकालतनेष्विति ज्ञापकात्सप्तमीश्रवणे दिवातनमित्यादावपि सप्तमी श्रवणं प्रसज्येत, सुपोधातुविति वदव्ययादित्यस्यापि बाधकत्वं स्यात्, न च प्रत्ययाश्रयत्वेन समानाश्रय स्य लुको बाधकत्वस्येष्टतया ऽव्ययादित्यस्याव्यय-

मात्रापेक्षत्वेनान्तरङ्गत्वात्समानाश्रयत्वविरहादिति वाच्यं प्रातिपदिकाधिकारा त्ततस्तदुत्पत्तौ तने ऽलुग्विधानबलेनासद्विभक्त्याकर्षणेनाऽव्ययादिति लुको ऽपि तद्धितोत्पत्त्युत्तरकालिकसुप्स्थानिकत्वात्स्यात्तस्यापि बाधकत्वमिति चेन्न हलदन्तादित्यनुवृत्तावव्ययादलुको ऽप्रवृत्तेः, न च सुबन्तादुत्पत्तौ द्विपद आगतं द्विपाद्रूप्यमित्यत्रान्तरङ्गत्वाद्विभक्तिनिमित्तकपदादेशः स्यादिति वाच्यमन्तरङ्गानपीति न्यायेन पूर्वं लुकः प्रवृत्तेः, विभाषा सुप इत्यत्र सुब्ग्रहणन्तु तिङन्ताद्बहुचोऽभावाय, न च केवलादनुकृताद्व्यञ्जनमात्राद् वशब्दात्कानि नित्यत्वाद्धलोपे चरितार्थन्तु न वाच्यमनुकार्य्यानुकरणयोरभेदविवक्षायां सुबभावेन ततः कनुत्पत्तेरभावात् अन्तरङ्गत्वात्प्रातिपदिकसंज्ञाया एव पूर्वं प्रवृत्तेश्च, वयन्तु अप्रत्यय इति किमर्थं काण्डे कुड्ये, अप्रत्यय इति शक्यमवक्तुमिह कस्मान्न भवति काण्डे कुड्ये इति कृत्तद्धितग्रहणं नियमार्थं भविष्यति कृत्तद्धितान्तस्यैव प्रत्ययान्तस्य प्रातिपदिकसंज्ञा नान्यस्येति वदता कृतो ऽपि प्रमाणतोक्तैव, परत्वान्नित्यत्वात्प्र

तिपदोक्तत्वाच्चापृक्तस्य वस्य लोपे भिदित्यत्र चरितार्थन्तु वक्तुमशक्यं संज्ञाया वाध्यवाधकभावविरहेणापृक्तसंज्ञासमकाल एव तत्प्रवृत्तेः, अधुनाप्रत्ययपक्षे तद्धितस्य चारितार्थ्येनास्यैव प्रमाणतेति ब्रूमः, नन्वावृत्तिमन्तरेणापि येनविधिरित्यत्र स्वंरूपमित्यस्यानुवृत्त्या केवलस्य प्रत्ययस्य तदप्रवृत्तिरिति चेन्न तस्य चेत्युक्त्वा स्वंरूपमित्यस्य भाष्यकृता ऽनाद्रितत्वात्, ननु तस्यचेत्यपूर्वं, व्यपदेशिवद्भावमूलकम्वा, आद्ये सुप्तिङन्तमिति सूत्रे सुप्तिङोः संज्ञावारणायान्तस्य चरितार्थतया भाष्योक्तं तस्य संज्ञाविधावित्यत्र ज्ञापकत्वं भज्येत, अन्त्ये रोणीति विहिताण् प्रत्ययः केवलान्न स्यात्, व्यपदेशिवद्भावो ऽप्रातिपदिकेनेति प्रतिषेधादिति चेन्न पूर्वान्तादिनिरित्येकयोग एव कर्त्तव्ये पृथग्योगकरणेन ज्ञापितायाः परिभाषायाः सूत्रोपात्तान्तादिशब्दसत्त्वे एव प्रवृत्त्यभ्युपगमेन प्रकृते तदप्रवृत्तेः, एवञ्चावृत्तिं विनोक्तार्थालाभेन सा ऽऽवश्यकी, नन्वत्र संज्ञाविधाविति निषेधात्कथं तदन्तविधिरिति चेन्न संज्ञानिष्ठविधेयतानिरूपितसाक्षादुद्देश्यताप्रयोज-

कं प्रत्ययामात्रवृत्ति विषयता प्रयोजकं पदं त-दन्तवृत्तिविषयताप्रयोजकन्न भवतीत्यर्थकरणेना दोषात् नचकृत्ताद्धितेति सूत्रे साक्षात्प्रत्ययनिष्ठोद्देश्य त्वाभावेनसंज्ञाविधावित्यस्याप्रवृत्तावर्थवदित्यनुवृत्ति सामर्थ्यात्तदन्तविधिरिति भाष्यमसङ्गतमेव भवेदि ति वाच्यमर्थवतो विशेषणतया कृतः प्रत्ययस्यैव साक्षादुद्देश्यत्वेन निषेधप्रवृत्तेर्दुर्वारत्वात्, अर्थवदित्य नुवृत्तिसामर्थ्यादित्यस्यार्थवदित्यनुवृत्तौ संज्ञावि-धावित्यस्यप्रवृत्तिविरहेणार्थवतो बलादेवतदन्तवि-धिरित्यर्थकरणेनादोषाच्च, अभेदस्थलेउभयोः साक्षा दुद्देश्यतायाः सत्त्वान्निषेधप्रवृत्तिसम्भवान्नतद्विरोध तिकेचित् ननु षः प्रत्ययस्येत्यादौ प्रत्ययनिष्ठसाक्षादु द्देश्यत्वाभावेन निषेधो न स्यादिति चेन्नाद्यवच्छेदेन प्रत्ययः ष इद्भवतीत्यर्थेन प्रत्यये साक्षादुदेश्यतायाः सम्भवात्, न चैवं कृदतिङित्यादावगतिरिति वाच्यं निषेधार्थकॢप्तविभक्तिकाशब्दनिर्देशाद्धात्वधिका-रेप्रत्ययः कृत्, तिङ् कृत्संज्ञको नेत्यर्थकरणेनादोषात्, धातोरित्यधिकारात्पञ्चम्यन्तात्परतया प्रत्ययग्रहण ञ्चेति निषेधाच्च, एवं लः परस्मैपदं तिङस्त्रीणि-

त्रीणि, तान्येक वचनद्विवचन बहुवचनानीत्यादि
ष्वपि कार्य्यकालपक्षे विधिशास्त्रैणैकवाक्यतया धा·
तोरित्यधिकारात्पञ्चम्यन्तात्परत्वेनोक्तरीत्यैव वार-
णात्, एकवचनं सम्बुद्धिः, सुप इत्यादौ तु प्रातिप
दिकाधिकारात्पञ्चम्यन्तात्परत्वेन निषेधात्, तद्धि
तश्चासर्वविभक्तिः, सामन्त्रितं, प्रथमचरमेत्यादिष्व
पि महासंज्ञाकरणसामर्थ्यान्निषेधाप्रवृत्तेर्न्नदोष इति
प्राचां पन्थाः॥अन्ये तूक्तस्थलेषु दोषवारणाय, संज्ञा
निष्ठविधेयतानिरूपितसाक्षात्प्रत्ययेतरावृत्त्युद्देश्यता-
प्रयोजकपदघटितशास्त्रघटकप्रत्ययमात्रवृत्तिविषयता-
प्रयोजकं पदं तदन्तवृत्तिविषयताप्रयोजकन्न भव
तीत्यर्थाभ्युपगमेनोक्तस्थलेष्वदोषात्, ईदूदेद्द्विवचन
मित्यादौ त्वीदन्तं यद्द्विवचनमित्याद्यर्थेन प्रत्ययेतरा
वृत्त्युद्देश्यतायाः सत्वेन तदन्तविधिनिषेधस्य सौ-
लभ्यात्, सामन्त्रितं, क्तातोसुन्नित्यादौ तु शब्दस्व
रूपं विशेष्यमादायोद्देश्यतायाः प्रत्ययेतरवृत्तित्वेना
दोषादिति वदन्ति.॥परे तु संज्ञाविशिष्टसंज्ञाविधौ
प्रत्ययग्रहण इत्याद्यर्थाभ्युपगमान्न दोषः, वैशिष्ट्य-
ञ्च स्वतादात्म्य स्वविशिष्टशास्त्रप्रयोज्यविधेयताव

च्छेदकानुपूर्व्यभाववत्त्व सम्बन्धाभ्याम् अत्र वैशि-ष्ट्यं च स्वघटितत्व स्वनिष्ठविधेयतानिरूपितप्रत्यये तरनिष्ठोद्देश्यताप्रयोजकपदघटितत्व सम्बन्धाभ्याम् इतिचेत्यत्र निषेधाभावायाद्यः, अर्थवदित्यादौ नि-षेधवारणाय द्वितीयः, कृदतिङित्यत्र तिङ्भिन्नप्रत्य यस्यैव ग्रहणेन प्रत्ययेतरनिष्ठोद्देश्यताया अभावात्, क्त्वातोसुन्नित्यादौ त्वव्ययसंज्ञानिष्ठविधेयतानिरू-पितप्रत्ययेतरस्वरादिनिष्ठोद्देश्यताप्रयोजकपदघटित-शास्त्रप्रयोज्यविधेयतावच्छेदकानुपूर्व्यभाववत्त्वविर-हान्न दोष इत्याहुः, ॥ वस्तुतोऽन्ते रण्डाविवाह न्यायेनावृत्तिकरणबलादेव तदन्तविधेरभ्युपग-म्यमानत्वादितरथा पूर्वाप्रत्ययघटकप्रत्ययपदात्तद-न्तविधेर्वारणस्याशक्यत्वादिति ध्येयम्, ॥ ननु कि न्तावत्प्रत्ययान्ततदादित्वमिति चेदुच्यते, प्रत्ययवि शिष्टत्वम् वैशिष्ट्यं च स्वनिष्ठचरमावयवतानिरूपक त्व स्वनिष्ठविधेयतानिरूपितोद्देश्यताश्रयादित्व स-म्बन्धाभ्याम् बहुपटव इत्यादावुक्तसम्बन्धाविरहेण तद्भिन्नत्वात्, राजपुरुषादौ प्रत्येकं तत्त्वेऽपि समु दायस्य तभिन्नत्वाच्च तत्त्वसिद्धिः, नन्वेवमकैदि त्यत्राप्युदितसंसर्गेण तद्भिन्नत्वात्तत्त्वापत्तिरिति चे-

न्न द्वितीयसंसर्गपदे स्वनिष्ठविधेयतानिरूपितोद्दे-
श्यताविशिष्टत्वरूपसम्बन्धनिक्षेपेणादोषात् अत्र वै
शिष्ट्यं च स्वाश्रयादित्व स्वाश्रयघटितनिष्ठसुप्त्वा
नवच्छिन्नोद्देश्यतानाश्रयाघटितत्वान्यतरसम्बन्धेन,
अत्र सम्बन्धघटकद्वितीयसम्बन्धेन तिङ्निष्ठविधेय
तानिरूपितोद्देश्यताविशिष्टत्वात्तत्त्वं, बहुपटव इत्या
दौ तु प्रत्ययविशिष्टत्वविरहेण तद्भिन्नत्वात्तत्त्वम्, ॥
ये तूक्तदोषवारणाय द्वितीयसंसर्गपदे स्ववृत्तिप्रत्यय
त्वव्याप्यतिङितरनिष्ठोद्देश्यतानिरूपित विधेयता-
नाश्रयादित्वं निवेशयन्ति तेपचतभवतेत्यादौ समा
सग्रहणस्यनियमार्थकत्वपक्षे, प्रातिपदिकत्वानापत्ति
भियैवोपेक्ष्याः, ॥ अन्ये तु प्रत्ययविशिष्टत्वं तत्त्वं,
वैशिष्ट्यं च स्वघटितत्व स्वनिष्ठविधेयतानिरूपि-
तोद्देश्यताश्रयघटितत्व स्वनिष्ठसुप्त्वावच्छिन्नोद्देश्य
ताश्रयाघटितत्व स्वविशिष्टाघटितत्व सम्बन्धचतुष्ट-
येन, अत्र वैशिष्ट्यं स्वाभिन्नत्व स्वनिष्ठविधेयतानि
रूपितोद्देश्यताश्रयभिन्नत्व सम्बन्धाभ्यां, बहुपटव
इत्यत्र तत्त्वसिद्धये तृतीयः, एवञ्चार्केदित्यत्र प्र-
त्ययान्ततदादित्वेन न तत्त्वम्, उत्तरसूत्रे तद्धितग्रह
णस्य न वैयर्थ्यं सम्भवति, अत्यन्तस्वार्थिकानां

सुबुत्पत्तेः पूर्वमेव विधानात्प्रत्ययान्ततदादित्वेनाने न प्रातिपदिकत्वाप्रवृत्तेरित्याहुः ॥ परे तु श्नमादिवदकचः प्रत्ययत्वेऽप्यागमत्वेन यदागमन्याये नाकैदित्यस्य प्रत्ययान्ततदादित्वेन तद्भिन्नत्वविरहेण प्रतिपदिकत्वाप्रवृत्तेः, अत एव राजन्नकैदित्यत्र ङमोह्रस्वादिति ङमुड़ागमः, तिङ्ङतिङ इति निघातश्च सिद्धः, अत एव येनविधिरित्यत्रभाष्ये सर्वके, विश्वके इत्यत्र शीभावाप्रवृत्तिमाशङ्क्य, तदेकदेशविज्ञानाद्वापुनः सिद्धमेतदित्युक्तमितरथा तदेकदेशविज्ञानाद्वेत्युक्तिरसङ्गतैव भवेत्, न च तन्मध्यपतितन्यायो ऽव्यर्थः, यदागमन्यायेन टेर्ग्रहणेन ग्रहणेऽपि समुदायग्रहणेनाकज्विशिष्टस्य ग्रहणाय तस्यावश्यकत्वात्, न चापि प्रतानादेरकचि ततोऽणि कृते ऽकज्विशिष्टस्य टेर्लोपः सम्भवति, कार्य्यकालपक्षेपुनर्दिष्टसंज्ञायां तद्वतो लोपाप्रवृत्तेः, न चापिपुरस्तादित्यादिबलाद्बहुजादेरप्यागमत्वं फलाभावेन तस्यतदनभ्यु पगमादित्याहुः॥ यत्तु अकैदित्यत्र तत्त्वे पिक्षतिविरह इत्युक्तं तदसत् क्रियावाचकपदानां प्रातिपदिकत्वाद्दृष्टत्वात् ॥ वयन्तुनाशक्तेः प्रयोजनं न विद्यते प्रत्ययो

यस्मान्निति बहुव्रीह्याश्रयणेन प्रत्ययान्ते तद प्रवृत्तेः, बहुपटव इत्यादौ तु पूर्वोदितरीत्या तद्धितपदस्य तद्धितविशिष्टपरत्वेन तद्धितवृत्ति मत्कृत्समासाश्चेति न्यासेन वा निर्वाहात्, ननु पच तकीत्यत्र तद्धितवृत्तिमत्त्वेन तत्त्वं स्यादिति चेन्न कृदन्तसाहचर्य्येण प्रकृतिविशिष्टाघटितस्यैव तद्धि-तवृत्तिमतो ग्रहणात्, वैशिष्ट्यं च स्वघटकावधि-कपूर्वत्व स्वघटकावधिकोत्तरत्व सम्बन्धाभ्याम्, पचतकीत्यत्रोक्तोभय सम्बन्धेन प्रकृतिविशिष्ट घटितत्वेनादोषात्, ननु मूलकेनोपदंशमित्यादौ कृद न्तत्वात्प्रातिपदिकसंज्ञास्यादिति चेन्न तद्धितसाहच र्य्यात्प्रकृतिप्रत्ययारम्भकसमुदायाघटकवर्णाघटितस्यै वकृतोग्रहणेनादोषात्, नच परमगार्ग्यायणःशिवभा-गवत इत्यादौ प्रकृतिप्रत्ययारम्भकगार्ग्यायणभागवत समुदायाघटकपरमशिवादिघटितत्वेन तत्त्वं न स्या दिति वाच्यं प्रकृतिप्रत्ययारम्भकसमुदायाघटकवि द्यमानसुबन्तवर्णाघटितस्यैव ग्रहणेन परमादेर्विद्य-मानसुबन्तत्वविरहेण विद्यमानसुबन्तोदासीनाघ टितत्वेन तत्त्वस्य सौलभ्यात्, नन्वेवमकैदित्यत्र त त्वापत्तिस्तादृशवर्णाघटितत्वादिति वाच्यं प्रकृति

प्रत्ययारम्भकसमुदायविशिष्टस्यैव ग्रहणात्, वैशिष्ट्यं च स्वाघटकविद्यमानसुबन्तवर्णाघटित्व स्वघटकनिष्ठसुप्त्वानवच्छिन्नोद्देश्यताश्रयाघटितत्व सम्बन्धाभ्यां प्रकृते द्वितीयसंसर्गविरहेणादोषादिति तत्त्वम् ॥ उच्छृङ्खलास्तु अर्थवदिति कृत्तद्धितेति ङ्याप्प्रातिपदिकादिति सूत्रत्रयं परित्यज्य शब्दानुशासनप्रस्तावाच्छब्दस्वरूपादेव स्वादिप्रत्ययान्विधाय द्व्येकयोरित्याद्येकवाक्यतयाधातुप्रत्ययवाक्येभ्यः संख्याकर्म्मादिविरहेण तदनुत्पत्तिं विज्ञाय सुपोधात्वित्यत्राकृद्वृत्तेरिति न्यासेन मूलकेनोपदंशमित्यत्रापि दोषान् परिहरन्ति तदसमभ्यं न रोचते, प्रातिपदिकाद्धात्वर्थे, सर्वप्रातिपदिकेभ्य इत्यत्रानिर्वाहात्, प्रकृतिपदोपादाने तु प्रत्ययोत्पत्तेः पूर्वं प्रकृतित्वविरहात्, प्रत्ययनिष्ठविधेयतानिरूपितोद्देश्यताश्रयत्वयोग्यत्वस्यैव प्रत्ययपत्वे तु सुबन्तस्यापि तत्त्वापत्तेः, हलन्तेभ्य आचारक्विपोऽभावाद्राजनतीत्यादेः सिद्धान्तेप्यनिष्टत्वेऽर्तीत्यादौ पररूपानापत्तेः, नलोपोऽतिङ्ङस्मिन इति न्यासे त्वाहेत्यत्र नलोपानापत्तेश्च, सर्वस्य विकारः सार्व इत्यत्राद्यं बाधित्वा सर्वस्य सुपीत्याद्युदात्तत्वेऽञोऽना

पत्तेश्चेति ङ्याबिति सूत्रे शेखरे ॥ नन्वर्थवत्प्रातिपदिकमित्येवास्तु सुपोधातु प्रातिपदिकयोरित्यत्र धातुग्रहणेन धातोः प्रातिपदिकत्वं नेतिज्ञापनात् सात्पदाद्योरित्यत्र सातिग्रहणेन प्रत्ययस्य तत्त्वं नेति ज्ञापनात्, उत्तरसूत्रे तद्धितग्रहणेन प्रत्ययान्तस्य चेत्तद्धितान्तस्यैवेति ज्ञापनाच्च तेष्वदोषादिति चेन्नानेकपदानां नियमार्थत्वकल्पनापेक्षया तत्करणस्यैवौचित्यात्. येऽपि विभक्त्यन्ततदादिभिन्नमर्थवत्प्रातिपदिकमित्यर्थकमर्थवदविभक्तिप्रातिपदिकमिति न्यस्योत्तरसूत्रे कृत्तद्धितग्रहणमपि परित्यज्य समासग्रहणस्य नियमार्थत्वमभ्युपगम्य वाक्ये तां निवारयन्ति ते तत्रेत्यादौ प्राग्दिशीयानां विभक्तित्वेन प्रातिपदिकत्वानापत्ति भियैवहेयोः ॥ परे तु भवत्यादौ तत्त्वापत्तिः न ङिसम्बुद्ध्योरित्यत्र सम्बुद्धिग्रहणेन प्रत्ययलक्षणेनोक्तपर्युदासाप्रवृत्तेः, सिद्धान्ते तु शपः प्रत्ययत्वेन तस्य प्रत्ययान्तत्वाक्षतेरित्याहुः ॥ अन्ये तु अर्थवदधातुः प्रातिपदिकमिति सूत्रमस्तु, वृत्तिमत्त्वमेवार्थवत्त्वं, वृत्तिश्च शक्तिलक्षणान्यतरस्रूपेव, शक्तिश्चोपस्थापिकैव, न तु बोधजनिका कृदन्ते तद्धितान्ते ऽव्युत्पन्नप्रातिपदिके एव तस्या अभ्यु

पगमान्न सुबन्ते तिङन्ते वाक्ये च प्रसक्तिः, कृत्तद्धि
तेत्यत्र कृत्समासावित्येवास्तु लिडादावुपसञ्जनि
ष्यमाणन्यायेनाधातुपर्य्युदासादप्रवृत्तौ तत्त्वसिद्धये
कृद्ग्रहणम् मूलकेनोपदंशमित्यत्रोपस्थापिकाया
शक्तेः सत्त्वेऽपि समासग्रहणस्य नियमार्थत्वान्न
तत्त्वं केवलस्य तु प्रत्ययस्योपयोगविरहादेव न त
त्त्वमिति वदन्ति॥ केचित्तु अतिप्प्रातिपदिकमित्येव
न्यस्य समासश्चेति नियमार्थकं वाक्ये संज्ञानिवार
कं पृथगेव सूत्रमभ्युपगम्य तिप्तस्झीत्यारभ्य सुपः
पकारेण तिप्प्रत्याहारमाश्रित्योदाहरणानि साधय-
न्ति, तदस्मभ्यं न रोचते धनाद्यवयवे दशदाडिमा
नीत्यादिसमुदाये पञ्चगवधन इत्यत्र पञ्चगवादे·
श्च प्रातिपदिकत्वापत्तेर्दुर्वारत्वात्, ॥ सूक्ष्मदर्शिन
स्तु लिङ्गवत्प्रातिपदिकमित्येव न्यस्यावयवानामलि
ङ्गवत्त्वेन नोक्तस्थलेष्वापत्तिः, परवल्लिङ्गमित्यादिब·
लात्समासानां लिङ्गवत्त्वा भ्युपगमात् अव्यया·
दाप्सुप इति सूत्रबलादव्ययेभ्यो ऽपि विभक्त्युत्प·
त्तेः सम्भवात्, अधिहरीत्याद्यर्थमपि नह्येकमुदाहर
णमिति भाष्यादव्ययीभावात्सुप इति न्यासस्य
कर्त्तुं शक्यत्वादित्याहुः ॥

सरूपाणामेकशेष एकविभक्तौ।

ननु यतश्च निर्द्धारणमिति विहित विभक्ति स्थले स्व-घटकत्व, स्वघटकनिर्द्धार्य्यमाणेतरावृत्तिधर्म्मवत्त्व संबन्धाभ्यामेवाऽन्वयो ऽभ्युपगम्यते ऽन्यथा नृणां नृषु वाद्धिजः प्राणीति प्रयोगापत्तिस्ततश्चैकत्वस्य केवलान्वयितया सर्वत्र सत्वात्तदितरस्याप्रसिद्धत्वेनाऽन्वयो ऽनुपपन्न इति चेन्नैको ऽन्यार्थे प्रधाने च प्रथमे केवले तथेत्यादिवचनादेकशब्दस्यात्र प्रथमार्थकतया ऽनुपपत्त्यभावात्, नन्वेकविभक्तावित्युच्यमाने समुदायाद्विभक्तेरभावेन सूत्रानर्थक्यं, नचार्थवदिति प्रातिपदिकत्वेन विभक्त्युत्पत्तिः सम्भवति समासग्रहणस्य नियमार्थत्वेन समुदायस्य तत्त्वासम्भवात्, एकविभक्तावित्यत्रैकशब्दस्य समानार्थकत्वेप्युत्पन्न विभक्तिश्रवणप्रसङ्गः, विभक्त्यन्तानामेकशेष इत्यभ्युपगमेपि शिष्यमाणोत्तरजातविभक्ति श्रवणप्रसङ्ग इति चेन्नोक्तदोषभियैव भाष्ये प्राति पदिकानामेकशेष इति पक्षस्याङ्गीकृतत्वात्, नन्वेतत्पक्षे जननी परिच्छेतृवाचिनोर्म्मातृशब्दयोः सारूप्यादेकशेषापत्तिरिति चेन्न वृद्धोयूनेति सूत्रादेवका

रापकर्षणान्नदोषः, नन्वेवशब्दार्थस्य स्वीयभेदप्रति योगितावच्छेदकाभाववद्वृत्त्यवच्छेदकत्वेन विभक्ताविस्यनेनान्वये विभक्त्यव्यवहितपूर्वत्वावच्छिन्नप्रतियोगिताकभेदवति सारूप्याभाववतामेकशेष इत्यर्थापत्तौ घटादीनामपि विभक्त्यव्यवहितपूर्वत्वावच्छिन्नप्रतियोगिताकभेदवति तद्धितादौ सारूप्यस्य सत्त्वात्सूत्रस्य वैयर्थ्यापत्तिः, नाप्येकशेषपदार्थेनान्वयः फलाभावादेकशेषपदेनैव तल्लाभाच्च, नापि षष्ठ्यन्त पदार्थेनान्वयो, यत्पदोत्तरमेवकारः प्रयुज्यतेतदर्थसंबन्धस्य तदर्थेतरसंबन्धाभावस्यविशेषणे विशेष्ये वा प्रतीयमानतयानिर्द्धारणविभक्तिस्थले बहुवचनस्यैव साधुत्वेन बहुत्वघटकत्वादेर्विभक्त्यर्थत्वेन सरूपारम्भकसमुदायघटकः सरूपान्यारम्भकसमुदायाघटकः शिष्यमाणत्वेनेच्छाविषयैकत्ववान् शिष्यत इत्यर्थेन रामश्च कृष्णश्च रामश्चेति सहविवक्षितानां रामकृष्ण रामा इति प्रयोगापत्तिः, सरूपान्यारम्भकसमुदायघटकत्वेनैकशेषाप्रवृत्तेः, नापि विभक्तिवाच्यघटकत्वात्प्रागेवान्वयः सरूपारम्भकसमुदायघटकस्य सरूपान्यारम्भकसमुदायेतराघटकस्येत्याद्युदितार्थापत्तौ मा

तृमातरावित्यादावेकशेषापत्तिः, नापि षष्ठ्यर्थबहुत्वात्प्रागेवान्वयः सरूपारम्भकसमुदायघटकस्य सरूपान्यारम्भकसमुदायाघटकस्येत्याद्यर्थापत्तौ राम कृष्णा इत्यादावेकशेषानापत्तिः, मातृशब्दयोरेकशेषापत्तिश्चेति चेन्न सरूपपदार्थैकदेशे सारूप्येऽन्वयेनैवार्थस्य स्वीयभेदप्रतियोगितावच्छेदकव्यधिकरणधर्म्मानवच्छिन्नत्वनियमाद्वैरूप्यानाश्रय सारूप्यवदारम्भकसमुदायघटकस्येत्याद्यर्थान्मातृशब्दे ऽदोषात्, नन्वेवमुक्तावपि रामादीनां यत्किञ्चित्प्रतियोगिकविरूपतायाः विद्यमानत्वाद्वैरूप्यानाश्रयत्वाभावादेकशेषानापत्तिरिति चेन्न ययोरेकशेषश्चिकीर्षितस्तयोरेव परस्परप्रतियोगिकानुयोगिकयोः सारूप्यस्य विवक्षितत्वात्, ननु पदार्थः पदार्थेनान्वेतीतिव्युत्पत्त्या कथमेवार्थस्य पदार्थैकदेशे सारूप्ये ऽन्वय इति चेत्सत्यमत्रत्यसरूपपदस्यैव सारूप्ये लक्षणा, एवकारस्य च तदर्थे तात्पर्य्यग्राहकत्वात्, तत्रान्वयमभिप्रेत्यैव यानि सरूपाण्येवेति प्रथमान्तेन व्याचक्षते दीक्षिताः,। सारूप्यञ्च यत्किञ्चित्पदविशिष्टत्वं वैशिष्ट्यंच स्ववृत्तिरूपवत्त्व स्वावृत्तिरूपाभाववत्त्वसंब-

न्धाभ्यां, येषामेकशेषश्चिकीर्षितस्तत्समुदायघटका-
न्यतमः स्वशब्देन ग्राह्यः, मातारत्वादीनामपि मा-
तृशब्दवृत्तित्वं, वृत्तिता च समवाय स्वोद्देश्यत्वान्य-
तरसंबन्धेनोपादेया न च हरिणीशब्दे एकशेषाना-
पत्तिः हारितं हारिणमिति तद्धितस्थलीयान्यतरा-
वृत्तिरूपस्यान्यतरस्मिन् सत्त्वादितिवाच्यं स्वावृत्ति-
विभक्त्यव्यवहितपूर्वत्वावच्छिन्नरूपाभाववत्त्व संस-
र्गस्यैव द्वितीयसंबन्धपदे निवेशात्, नच परिच्छेतृ
वाचकमातृशब्दवृत्तिमातरत्वरूपादेर्जननीवाचक-
मातृशब्दे ऽपि वृत्तेः स्वावृत्तिघटत्वादिरूपाभावव-
त्त्वाच्च सारूप्यं स्यादिति वाच्यं स्ववृत्तियावद्रूपवत्त्व
स्यविवक्षितत्वात्, नचैवं हरिणीशब्दे द्वितीयसंबन्ध
सत्त्वे ऽपि हारितादेरितरस्मिन्नभावेनान्यतरवृत्ति
यावद्रूपवत्त्वस्यान्यतरास्मिन्नभावादिति वाच्यं स्व-
वृत्तिविभक्त्यव्यवहितपूर्वत्वावच्छिन्नयावद्रूपवत्त्वस्य
प्रथमसंसर्गपदे निवेशान्न दोषः, ननु सारूप्यं वि-
भक्तित्वावच्छेदेन, विभक्तिसामानाधिकरण्येन वा,
नाद्यो दाराश्च दाराश्चेत्यादावेकशेषानापत्तिः, ना-
न्त्यो मातृशब्दादावतिप्रसङ्गादिति चेन्नैकविभक्ता

वित्यत्रैकग्रहणात्समानविभक्तित्वावच्छेदेन सारूप्य स्य ग्रहणाद्दारशब्दे जश्शसादिषु सारूप्यादेकशेषः, मातृशब्दे औजसांवैरूप्यान्नदोषः, नन्वेवं सर्वनाम संज्ञकसंज्ञाभूतयोः सर्वशब्दयोरेकशेषानापत्तिः सर्व स्मै सर्वायेत्यादिदर्शनादिति चेदिष्टापत्तिः, नन्वेव मपि न क्षतमित्यर्थकसार्वविभक्तिकाक्षतशब्द तण्डु लपर्य्यायवाचि नित्यबहुवचनान्ताक्षतशब्दयोश्चैकशे षानापत्तिराद्याक्षतशब्दवृत्त्यदन्तत्वरूपस्येतरस्मिन्न वृत्तेरिति चेदत्र केचित्, सारूप्यं च यत्किञ्चित्पद विशिष्टत्वं वैशिष्ट्यं च स्ववृत्तिरूपविशिष्टरूपवद्भिन्न त्वसंबन्धेन, सबन्धघटकरूपवैशिष्ट्यं च रूपे, स्वभि न्नत्व स्वाश्रयोत्तरविभक्तिवृत्तिविभक्तिविभाजकध- र्म्मवद्विभक्त्यव्यवहितपूर्वत्व संबन्धाभ्यां रामवृत्ति रूपविशिष्टघटत्वादिरूपभिन्नत्वाद्रामादिशब्दे ल- क्षणसमन्वयः, संसर्गघटकस्याद्यसंबन्धस्यानिवेशान्न रामशब्देदोषः, द्वितीयसंबन्धस्यानिवेशान्न हरिणी शब्दयोर्द्दोषः, एवं सति मातृशब्दे ऽपि नैक शेषो ऽसारूप्यात्, अक्षतत्ववैशिष्ट्यस्याक्षतात्वा दावभावादक्षतशब्दे ऽपि दोषाभावात्, न च

स्वाश्रयोत्तरसुविभक्ति वृत्तिप्रथमात्वरूपविभक्तिवि-
भाजकधर्म्मवज्जसादिप्रत्ययाऽव्यवहितपूर्वत्वात्स्वाभि-
न्नत्वाच्चाक्षतात्वेऽक्षतत्वरूपवैशिष्ट्यादिति वाच्यं
विभक्तिविभाजक विभाजकधर्म्मवदित्यादिनिवेशेन
विभक्तिविभाजकप्रथमात्वादिविभाजकैकवचनत्वा-
दिधर्म्मवद्विभक्त्यव्यवहितपूर्वत्वाभावान्न दोष इत्या-
हुः, ॥ परे तु यत्किञ्चित्पदाविशिष्टत्वं तत्त्वं वैशिष्ट्यं
च स्ववृत्तिरूपविशिष्टरूपवद्भिन्नत्वसंबन्धेन अत्र
वैशिष्ट्यं च स्वभिन्नत्व स्वाश्रयोत्तरविभक्तिवृत्त्यानु-
पूर्वीमद्विभक्त्यव्यवहितपूर्वत्व संबन्धाभ्यामेवंच
नोक्तस्थलेषु दोषः, न च द्वित्रिशब्दयोरेकशेषाप-
त्तिः, द्विशब्दवृत्तिरूपविशिष्टं घटत्वादिकमेव भवेन्न
तु त्रिशब्दगतं रूपमपि तस्य स्वभिन्नत्वे ऽपि द्वि-
तीयसंबन्धाभावादिति वाच्यं स्वसमानानुपूर्वीक-
त्वस्यापि प्रथमवैशिष्ट्यनियामकसंबन्धे उपादेय-
त्वात्, नच जरसावित्यादौ जराशब्दगतरूपविशिष्ट
जरस्त्वरूपवद्भिन्नत्वाभावादेकशेषानापत्तिरित्ति वा-
च्यं स्वभिन्नत्वमपहाय स्वाश्रयवृत्तिभिन्नत्वस्य नि-
क्षेपेणादोषात्, वृत्तिता च पूर्वोदितसंसर्गेणैव ग्राह्या,

नच मातृशब्दयोरेकशेषापत्तिः, जननीवाचकमातृ शब्दवृत्तिरूपविशिष्टघटकत्वादिमद्भिन्नत्वा न्न हि स्वाश्रय जननीवाचक मातृशब्द वृत्ति भेदो मातारत्वरूपे विद्यते आचारक्किबन्ता द्धेतुमणि-चि ऋकारस्य वृद्धौ मातारयतीत्यादेरीक्ष्य माण-त्वादिति वाच्यं, स्वाश्रयवृत्तिभिन्नत्वमपहाय स्व-विशिष्टरूपाभिन्नत्वसंबन्धनिवेशेनादोषात् स्वपदे-नात्र रूपं गृह्यते तद्वैशिष्ट्यं च रूपे स्वाश्रयवृत्ति-त्व, स्वाश्रयोत्तरविभक्तिवृत्यानुपूर्वीमद्भिभक्त्यव्यव-हितपूर्वत्व संबन्धाभ्यां, मातृशब्दयोस्तु नैकशेषो मातारत्वस्य स्वाश्रयोत्तरविभक्तिवृत्यानुपूर्वीमद्भि भक्त्यव्यवहितपूर्वत्वेऽपिस्वाश्रयवृत्तित्वसंसर्गाभावा-त्, तथा हि मातरत्वरूपाश्रयः स्वोद्देश्यता संबन्धेन मातृशब्दस्तद्वृत्तित्वाभावात् मातारय-तीत्येतत्स्थलीयमातारत्वस्य स्वाश्रयवृत्तित्वे ऽपि द्वितीयसंसर्गविरहात्, यद्यपि तदुत्तरत्वादेरानु पूर्व्या जातिविशेषतया तस्या उभयत्रैक्यात्तथा प्यानुपूर्व्यवच्छिन्नवर्णसमुदायस्य रूपपदवाच्यत या प्रत्युच्चारणं शब्दानां भेदान्मातारौ, मातारय

र्तीत्येतत्स्थलद्वयवृत्ति मातारशब्दयोः परस्परं भि-
न्नत्वात्॥ यदितु रूपानुपूर्व्योर्लोकव्यवहारेण संकी-
र्णत्वमभिसन्धाय तयोरैक्यं प्रत्यवस्थीयते तदा स्व
विशिष्टरूपभिन्नत्वमपहाय स्वविशिष्टवृत्तितावद्रूप-
भिन्नत्व सम्बन्ध उपादेयो वृत्तितायां स्वस्य वैशिष्ट्यं
च, स्वाश्रयनिरूपितत्व स्वाश्रयोत्तरविभक्तिवृत्त्या-
नुपूर्वीमद्विभक्त्यव्यवहितपूर्वनिरूपितत्व सम्बन्धा
भ्यां मातरत्वरूपाश्रयजननीवाचकमातृशब्दोत्तर-
विभक्तिवृत्त्यानुपूर्वीमद्विभक्त्यव्यवहितपूर्वपरिच्छेतृ-
वाचकमातृशब्दनिरूपितवृत्तिता स्वाश्रयनिरूपिता
न भवतीति न दोष इत्याहुः। स्थूलदृश्वानस्तु श-
ब्दविशिष्टशब्दत्वं सारूप्यं वैशिष्ट्यं च स्वोत्तरसु
विभक्तित्वावच्छेदेन सुप्रत्ययाव्यवहितपूर्ववृत्तित्व
विशिष्टस्ववृत्तिरूपवत्त्वसंबन्धेन स्वोत्तरौविभक्तित्वा
वच्छेदेनौप्रत्ययाव्यवहितपूर्ववृत्तित्वविशिष्टस्ववृत्तिरू
पवत्त्वसंबन्धेनैवं सर्वासु विभक्तिषु योजनीयः, ज
ननीपरिच्छेतृवाचिनोर्म्मातृ शब्दयोरौविभक्तित्वाव-
च्छेदेन स्ववृत्तिरूपवत्त्वाभावान्नैकशेष इत्याहुःअन्ये
तु सब्दविशिष्टशब्दत्वं तत्त्वं, वैशिष्ट्यं च विभक्ति-

त्वावच्छेदेन स्ववृत्तियावद्रूपवत्त्वसंबन्धेन जननीप रिच्छेतृवाचकमातृशब्दयोर्नातिप्रसङ्गो विभक्तित्वाव च्छेदेनपरिच्छेतृवाचकमातृशब्दगतयावद्रूपस्य जन नीवाचकमातृशब्दे ऽसंभवादितिवदन्ति ॥ सूक्ष्म-दर्शिनस्तु प्रातिपदिकानामेकशेषे मातृमात्रोः प्रति षेधो वक्तव्यः, माता च जनयित्री, मातारौ च धान्यस्य, मातृमातार इति वैरूप्यविषयोदाहरणोप न्यासेन यस्यापि विभक्त्यन्तानामेकशेषस्तेनापि मातृमात्रोः प्रतिषेधोवक्तव्यस्तस्यापि सरूपाणि मा तृभ्यां मातृभ्यां चेति, अथ मतमेतत् विभक्त्यन्ता नां सारूप्ये भवितव्यमेवैकशेषेणेत्यग्रिमभाष्येणभ्या म्येकशेषो भवत्येव अथ मतमेतादिति प्रतीकमुपा दायार्थविप्रतिषेधादत्रैकशेषो न भवति कृते ह्येक शेषे ताभिरित्यनुप्रयोगे पुमर्थो न प्रतीयते तैरिति चोक्ते स्त्र्यर्थानवगतिकैयटोक्तं तु न युक्तं तैरित्य नुप्रयोगे स्त्र्यर्थावगतिसम्भवात् सा च तौ च तै रित्येकशेषसम्भवात् अर्थविप्रातिषेधेनैकशेष इति वचनाभावाच्च अत एव प्रातिपदिकानामेकशेष इति पक्षे एकविभक्तौ यानि सरूपाणि तेषामेकशेष इति

एवकाराघटितो वाक्यार्थनिष्कर्षो भाष्यकृता दर्शितः, अपकर्षस्य भाष्यकृता कुत्राप्यनाश्रयणाच्च, अत एव प्रातिपदिकतन्त्रमाश्रित्यैकशेषप्रत्याख्यानेन न फलभेदः, तत्र हि मातृभ्यामित्यत्र सारूप्यं तन्त्रं स म्भवति, मातरावित्यादौ च नेत्याहुः, नचैवकाराप कर्षे एकविभक्ताविति व्यर्थं यानि सरूपाण्येवेत्युक्त्यै वोक्तदोषवारणादिति वाच्यं हरिणस्त्रीवाचकहरिणी शब्दस्य हरितवर्णविशिष्टस्त्रीवाचकहरिणीशब्दस्य चैकशेषानापत्तेः, भस्याढ इति पुंवद्भावेन ताद्धितादौ वैरूप्यात् । अन्ये त्वेवकारो नापकृष्यते ऽदर्शनात्, मातृशब्दयोस्तूक्तयोर्भ्याम्येकशेषो भवत्येवेत्युक्तम्, एवं शुद्धङ्यन्तकुमारीशब्दस्यौजसोरेकशेषो भव- त्येव, शसि तु न, यणपूर्वसवर्णाभ्यां रूपभेदात्, मातृमात्रोः प्रतिषेधोवक्तव्य इतिवार्त्तिकन्तूपलक्ष णम् एकविभक्ताविति तु सहविवक्षाया उपलक्ष णार्थं सहविवक्षायामेकविभक्तेरेव दर्शनात्, तदेत दभिप्रेत्याह भाष्यकृतोक्तम् एकविभक्ताविति कि मर्थं पयः पयो जरयति वासो वासश्छादयति ब्रा- ह्मणाभ्यां कृतं ब्राह्मणाभ्यां देहीति असहविवक्षा

विषयप्रत्युदाहरणदानेनैकविभक्तावित्यस्य सहाविव क्षोपलक्षणत्वं स्पष्टमेव सूचितं, विभक्तिः सारूप्येणा श्रीयत इति प्रातिपदिकैकशेषोपपादनप्रकरणस्थं भाष्यं त्वेकदेश्युक्तिः, नचैवं सति मातृमातरावित्य त्राप्येकशेषापत्तिः शिष्यमाणस्य कृतदीर्घत्वे च तेन जननीबोधासम्भवेनाकृतदीर्घत्वे च तेन परिच्छेतृ बोधासम्भवेनैकशेषाप्रवृत्तेः, एकशेषशास्त्रं हि एकस्य नानेकार्थकतोत्पादकं किन्तु लोकसिद्धानुवादकं, नहि लोके दीर्घोपधान्मातृशब्दाज्जननीबोधो ह्रस्वो पधाच्च परिच्छेतृबोधो दृष्टः, तदेतदभिप्रेत्य भाष्य कृतोक्तं, शब्दस्य स्वाभाविकी वा ऽनेकार्थता स्या द् वाचनिकी वा, तद्यदि तावत्स्वाभाविकी अशिष्य एकशेषः, किं कारणमेकेनोक्तत्वात्तस्यार्थस्य द्विती यस्य प्रयोगेण न भवितव्यं, यदि तर्हि एकेनाने कस्याभिधानं भवति प्लक्षन्यग्रोधावेकेनोक्तत्वादपर-स्य प्रयोगो ऽनुपपन्नः, इदानीमेवोक्तमेकेनानेकस्या भिधानं भवतीति, सरूपाणामेकेनानेकस्याभिधानं भवति न विरूपाणां, किं कारणं सरूपाणामेकेनाने कस्याभिधानं भवति न विरूपाणामभिधानं पुनः

स्वाभाविकमिति एतद्भाष्येण हि शिष्यमाणस्य स्व विरूपार्थबोधकत्वं स्पष्टमेवोक्तम् अत एव ङीबन्त ङीषन्तहरिणी शब्दयोस्तद्धितविवक्षानिमित्तकपुंव- द्भावापेक्षया ऽनैमित्तिकत्वेनान्तरङ्गत्वादेकशेषे कृते स्वरभिन्नानामिति ङीबन्तस्य शेषे तस्मात्तस्य समूह इत्यर्थे ऽणि हारितमिति रूपं न भवति, तशब्दघटित स्य विरूपत्वेन हरिणीशब्दार्थाप्रतिपादकत्वात्, यत्र तु तद्धिते द्वयोरूपं समानं तत्र भवत्येवैकशेषः, यथा हरिण्योरपत्ये हारिणेयावत्र भस्याढ इति पुंवद्भावो नाढे इति पर्य्युदासादित्याहुः,, ॥

ननु समानानामेकशेष एकविभक्तावित्युच्यमाने ऽपि सकलेष्टसिद्धे रूपग्रहणं किमर्थमिति चेन्न वृक्षाः प्लक्षा इत्यादिषु शब्दार्थसमानेष्वेवैकशेषो भवेन्न पुनः पादा माषा इत्यादिषु रूपस्य निमित्तत्वेनाश्रयणे नैष दोषः सम्भवति, ननु सरूपाणामेक एकविभक्तावित्यनेनापि निर्वाहे शेषग्रहणं किमर्थमिति चेन्न सरूपाणामेकादेशापत्तावश्वश्चाश्वश्चाश्वावित्यत्रान्तर्यतो द्व्युदात्तवतः स्थानिनो द्व्युदात्तवानादेशः स्यादिति शेषग्रहणमितिविभावनीयम् ॥

नामि

नन्वत्र नुटीत्येवास्तु नुडादौ प्रत्ययेऽजन्ताङ्गस्य दीर्घविधानादनश्च इत्यादावदोषात्, अस्यापत्यमिः, न इः, अनिरित्यत्र नुडादिप्रत्ययस्य सत्त्वेऽपि तस्मिन्नङ्गत्वविरहाद्दीर्घाप्रवृत्तेरिति चेन्न भृङ्ग इत्यादौ भृञः किन्नुट्चेति भृञो गनि नुडागमे दीर्घापत्तेः, उणादिष्वव्युत्पत्तिपक्षाभ्युपगमेऽपि वर्सतर्समित्यादि भाष्यप्रयोगेणायामन्तेतिसूत्रबलेन च क्वचित्तदनाश्रयणात्, क्रियमाणे तत्र नटि तु भृङ्ग इवाचार्य्य भृङ्गित्वेत्यादावुदितोवेतिवैकल्पिकेडागमानापत्तेः, यत्तु अक्षण्वन्तइत्यत्रानोनुडिति नुटिदीर्घापत्तेरित्याहुस्तन्न नडितिकरणेन तत्रापि निर्वाहात्हलन्तेभ्य आचारक्विपोऽभावान्न ततः क्त्वउदितोवेतिवैकल्पिकेडागमप्रवृत्तिः, ॥ ननु नीत्येवास्तु, हरिणेत्यादौ दीर्घापत्तिर्वक्तुमशक्या ऽऽङिनुगस्त्रियामितिन्यासात्, नमुन इत्यत्र नशब्दस्यापितत्सम्भवादमुनेत्यत्रादोषात्, नमुनुकीति न्यासेनामुष्मै कुलायेत्यत्रापि दोषवारणादितिचेन्नाङ्गनेत्यत्र नकारादौ प्रत्यये दीर्घापत्तेः, विनञ्भ्यामित्यत्र नाञि ञकारोच्चार

णान्नकारादौ तद्धिते दीर्घाभावकल्पने तु सुनोतीत्यादौ दीर्घापत्तेः, प्वादीनामितिह्रस्वत्वविधानसामर्थ्यात्तत्रापितदभावकल्पने तु सिनो ग्रास इत्यादौ दीर्घापत्तेः, दुग्वोर्दीर्घश्चेत्यस्य तु विशेषापेक्षज्ञापकत्वात्॥ ननु वितीत्येवास्तु उकारेत्संज्ञके प्रत्यये ऽजन्ताङ्गस्य दीर्घ इत्यर्थेन निर्वाहात् सेर्विधानाद्ग्रामइत्यादावदोषादिति चेन्न मघशब्दान्मतुपि दीर्घापत्तेः मतिपि तूगिदचामिति नुमनापत्तेः, नच मतूब्विधानान्न दोष इति वाच्यम् अद्यतन इत्यत्र ट्युलि तुडागमे दीर्घापत्तेः, तिटि क्रियमाणे ऽद्यतनित्वेत्यादावुदितोवेति वैकल्पिकेडागमानापत्तेः, अनद्यतने लङित्यादिनिर्देशात्तेन दीर्घाभावकल्पने तु सर्वेषामित्यादौ दीर्घापत्तेः, सिटि क्रियमाणे सर्वेषांसुत इत्यत्र षष्ठ्या आक्रोश इत्यलुकि सइवाचर्य्यं सर्वेषांसुतित्वेत्यादौ वैकल्पिकेडागमानापत्तेः, प्रातिपदिक निष्ठानुबन्धप्रयोज्यात्मनेपदत्रिरहस्य सर्वत्र कल्पने प्रमाणाभावात्, ॥ परे तु नृनयोः समासे तत आचारक्विबन्तात्कर्त्तरि क्विप्पल्लोपे नृन्नयोः समासे नलोपे ततआचारक्विबन्तात्कर्त्तरि क्विप्पल्लोपयलो

पयो नलोपःसुविति नलोपस्यासिद्धत्वात्तुकोऽभावे, आमि नृआमितिस्थिते प्रत्ययत्ववदाम्त्वस्य सुप्त्वव्याप्यत्वाभावेन नलोपस्यासिद्धत्वाप्राप्तौ ह्रस्वनद्याप इति नुडागमे नृचेतिदीर्घे कर्त्तव्ये प्रत्ययत्ववन्नाम्त्वस्यसुप्त्वव्याप्यत्वान्नलोपस्यासिद्धत्वेन नोपधाया इति दीर्घे नृणामितिरूपम् इदानीं नुडादिप्रत्ययत्वस्य नादिप्रत्ययत्वस्य वित्प्रत्ययत्वस्य च सुप्त्वव्याप्यत्वाभावेन नलोपः सुबित्यस्याप्रवृत्तौ नृचेति दीर्घापत्तेः, अत्र नुडागमे कर्त्तव्ये स्थानिवत्त्वं तु वक्तुमशक्यं पञ्चमीसमासस्यानित्यत्वात् क्नौल्लुप्तमिति निषेधात्, परपदस्थाजादेशःस्थानिवन्नेत्यर्थेन नपदान्तेति निषेधाच्च, ये तु प्रत्ययत्वविशिष्टाम्त्वस्य सुप्त्वव्याप्यत्वमङ्गीकृत्य नलोपस्यासिद्धतया नुडागममेवात्र निराकुर्वन्ति ते, जलपतितरामित्यादिषु नुडागमव्यावृत्तये यस्येतिचेति लोपं तद्धितञ्चानुवर्त्त्य नुडादिवारणपरभाष्यविरोधादेवोपेक्षणीयाः, नलोपः सुबित्यस्य सुब्वृत्तिविषयताप्रयोजकविधावित्यर्थे तु दण्डीयतेः क्विपि दण्डियामित्यत्रेयङि कर्त्तव्ये नलोपस्यासिद्धत्वेन तदनापत्तेरित्याहुः ॥ननु नदीत्येवा

स्तु नुड्विधायके नडितिकरणेनैव सर्वत्र निर्वाहादि-
तिचेन्न चौराणांस्तुतित्वेत्यादौ षष्ठ्याआक्रोश इत्य
लुकि ततो विहितस्यक्त्वाप्रत्ययस्योदितोवेतिवैकल्पि
केडागमानापत्तेः, नन्वचोऽभावेऽपि सकलेष्टसिद्धेः
किन्तेनेतिचेन्न चतुर्णामित्यादौ दीर्घापत्तेः, ॥
नन्वङ्गग्रहणाभावेऽपि चर्म्मणामित्यादावर्थवद्ग्रहणे
प्रत्ययाप्रत्यययोरितिपरिभाषाभ्यामस्य नाम्नो ऽग्रह-
णे न दोष इतिचेन्नातोभिसऐसित्यत्राङ्गग्रहणस्य
ब्राह्मणभिस्सेति प्रत्युदाहरणदानपरभाष्यप्रामाण्येना
ङ्गाधिकारे तयोरप्रवृत्तेः, नच प्रत्ययग्रहणपरिभाष
या तदादेरुपस्थित्याऽजन्ततदादेरेव दीर्घविधाना
न्नोक्तस्थलआपत्तिः सम्भवतीतिवाच्यसुगितश्चेति
सूत्रस्थभाष्यप्रामाण्येनोक्तपरिभाषायाः प्रत्ययमात्र
ग्रहण एव प्रवृत्त्यभ्युपगमेन नामः प्रत्ययमात्रस्य
ग्रहणाभावेनात्र तदप्रवृत्तेः, नच नोपधाया इति
सूत्रबलात्सुप एव नाम्नो ग्रहणमितरथा पञ्चानामि
त्यत्रापि नलोपे नलोपः सुप्स्वितिनियमान्नलोपस्या
सिद्धत्वाभावेनानेनदीर्घे तद्वैयर्थ्यं स्पष्टमेवेति वाच्यं
तत्राप्यङ्गग्रहणानुवृत्तौ नमतेः क्विप्यनुनासिकस्य

क्विन्निति दीर्घे चर्म्मन्नामोः समभिव्याहारे हेत्रम्मा-न्नामितिसिद्धये तस्य चारितार्थ्यात्, यत्तु अङ्गा-धिकारेऽर्थवत्परिभाषाप्रवृत्त्यभ्युपगमे देवदत्तनामि-ति प्रत्युदाहरणमुक्तं तन्न प्रत्ययाप्रत्यययोरिति परि भाषया तत्रापि दीर्घस्याप्रवृत्तेः, ॥ नन्वामीति न्या सेऽपि रामाणामित्यादौ परत्वान्नुटि ततो दीर्घे तस्य सिद्धौ निरर्थकमेव नकारोच्चारणमिति चेन्न नित्यत्वाद्दीर्घे नुड्प्रवृत्तेः, ननु ह्रस्वग्रहणबलात्सा-म्प्रतिकाभावे भूतपूर्वगतेर्नुटः सिद्धिः, नच नृचे तिदीर्घविकल्पे नृणामित्यत्र नुडर्थं तच्चरितार्थमि-ति वाच्यं नह्येकमुदाहरणमितिभाष्यान्नृनद्याप इति न्यासेनापि तत्र निर्वाहात्, नापि तिसृणामित्यत्र नुडर्थं तत्, षट्चतुर्भ्य इत्यत्र त्रेस्त्रयइत्यतस्त्रेरित्यनु-वृत्त्या तत्सिद्धेः, नह्येकमुदाहरणमितिभाष्यविरो-धादृन्नद्याप इति न्यासे न भाष्यकृतस्तात्पर्य्यम्, नचैवं प्रियतिसृणामित्यादौ नुडागमो न स्यात्षट् चतुर्भ्य इत्यत्र बहुवचननिर्देशेन प्राधान्ये तत्प्र-वृत्तेरिति वाच्यं तिसृभ्यो जस इत्यादौ बहुवचन निर्देशात्तथाकरणस्य सूत्रकृच्छैलीसिद्धतया गौणे

प्रवृत्तिविरहे मानाभावात्, ननु ह्रस्वग्रहणाभावे नृ शब्दादामि दीर्घे कृतेऽपि स्थानिवत्त्वेन नृशब्दत्वा न्नुडागमापत्तिः ह्रस्वग्रहणसत्त्वे तु नृचेतिदीर्घे यणि न्राम्, तदभावे नृणामिति फलभेदः स्यादिति चे न्नोक्तन्यासेऽपि येन ना प्राप्तन्यायेन नुडागमं बाधित्वा दीर्घे पुनस्तस्याप्रवृत्तेः । यत्तु नृशब्दऋश ब्दयोः समासे पूर्वान्तवत्त्वेन नृशब्दत्वान्नुडागमापत्तिरित्युक्तं तन्न ह्रस्वग्रहणसत्त्वेऽपि पञ्चमीसमासेन स्थानिवत्त्वान्नुट एवेष्टत्वात्, ॥ यदपि नृशब्द दीर्घऋशब्दयोः समासे पूर्वान्तवत्त्वेन नुडागमापत्तिः, ह्रस्वग्रहणसत्त्वे तु तदभावान्न नुडागमप्रवृत्तिरित्युक्तं तदपि न पञ्चमीसमासेन स्थानिवत्त्वादिदानीमपि तदप्रवृत्तेः, एवं त्रिशब्दऋशब्दयोः समासे पूर्वान्तवत्त्वेन त्रिशब्दत्वातिदेशान्नुडापत्तिर्वक्तुमशक्या पञ्चमीसमासेन स्थानिवत्त्वात्, केचित्तु नृशब्दादाचारक्विबन्तात्कर्त्तरि क्विपि ह्रस्वस्येति तुकि नृतामित्यत्र, यदागमन्यायेन नृशब्दत्वान्नुडागमापत्तिः, एवं त्रिशब्दादाचारक्विबन्तात्कर्त्तरि क्विपि ह्रस्वस्येति तुकि त्रितामित्यत्रोक्त

रीत्या षट्चतुर्भ्य इति नुडागमापत्तिरित्याहुस्तद-
सम्यग्यंन रोचते, सूत्रद्वयस्य नद्यावन्तचतुस्साहचर्ये
ण झलन्ते प्रवृत्तेरनभ्युपगमात्, छन्दस्युभयथेति
दीर्घविकल्पे धातॄणामित्यत्र नुडर्थं तु न तत्, तत्र
च्छन्दसि दृष्टानुविधिरिति वचनेनैव निर्वाहात्,
ननु वारीणामित्यत्र वारिआमितिस्थिते नुडागमं
बाधित्वाऽऽमीतिदीर्घः प्राप्त स्तं बाधित्वा नुमागमः
प्राप्तस्तंबाधित्वानुमचिरेतिनुडागमः प्राप्तस्तमपिबा
धित्वाऽऽमीतिदीर्घः प्राप्त एवं रीत्या चक्रकापत्ति
रिति चेन्न वारिआमितिस्थिते नुडागमं बाधित्वा
एतद्भाष्यप्रामाण्यात्पूर्वविप्रतिषेधेन नुमागमं बाधि-
त्वाऽऽमीति दीर्घे ह्रस्वान्तत्वाभावान्नुडागमप्रवृत्ते
र्वक्तुमशक्यतया चक्रकापत्तेरसम्भवात्, ननु नृचे-
त्यस्य प्राप्तविभाषात्वेनाभावमात्रबोधकत्वान्नृचेति
दीर्घाभावे नृणाम्, दीर्घपक्षे नॄणामिति स्यात्, सि-
द्धान्ते तु नॄणामित्येवसमानाकारकं रूपं जायत इति
चेन्न नृन्नद्याप इति न्यासेन दोषाभावात्, नच
तपरसूत्रे अणित्यस्य सम्बन्धान्नुरणत्वाभावेन तत्प्र-
वृत्तिर्न स्यादिति वाच्यं तत्राणित्यस्यासम्बन्धात्

गुणा अभेदका इति वद्धटकतया ऽण्ग्रहणेऽपि तत्प्र
वृत्तेश्च, अतएव सूत्रकृताचित्रगुशब्दं णिद्धावनिवा-
रणार्थं गोतोणिदित्यत्र तपरकरणमभ्युपगतम्, अन्ये
तु ह्रस्वग्रहणसत्त्वे आमीति न्यासे, नृणां, नॄं, ति-
सृणां, त्रयाणामिति रूपं, तदर्थं नद्यापोनुट्, ततो
नुर्वा इति न्यस्य नद्याप इत्यत्र त्रेरित्यनुवर्त्त्योक्त
रूपद्वयं शब्दद्वयं संसाध्य आमि,नृच, नतिसृचतसि-
ति च सूत्राणि निराचिकीर्षन्ति, धातॄणां धातृणा-
मितिरूपद्वय सिद्धये, छन्दस्युभयथेत्यस्यत्र नुड्वि-
धायकत्वमप्यभ्युपगच्छन्ति, कतीनामित्यत्र दीर्घा-
यामानिवक्तुमशक्यं कतरामीति न्यासेन सिद्धेः न
च ह्रस्वग्रहणसत्त्वे आमीत्युक्तौ गम्लृआमितिस्थिते
लृकारस्थानेदीर्घे ॠकारे यणि गम्रामिदानीं सूत्रा-
भावे गम्लामिति फलभेदः स्यादिति वाच्यं कतरा-
मीत्यत्रैव लृकतरामीति न्यासेन सकलेष्टसिद्धेरित्याहुः।
ननु सर्वादीनीत्यत्र संज्ञोपसर्जन प्रतिषेध इति वा
र्त्तिकं पूर्वपरेतिसूत्रे ऽसंज्ञायामिति योगं विभज्यानु-
पसर्जनादित्यत्राकारान्तौ यावकाराकारौ तावनु-
पसर्जनस्येत्यर्थकमनुपसर्जन अअअदितिच्छि-

त्वा प्रत्याख्याय, अथवाङ्गाधिकारे यदुच्यते गृह्यमाणविभक्तेस्तद्भवतीति प्रोच्य षड्भ्योलुगित्यत्र षड्भ्यो विहितयोर्जश्शसोर्लुगित्यर्थापत्तौ ष्णान्ते त्यत्र संख्यापदेन लोके गणनायां प्रसिद्धामेवग्रहणात्परमपञ्चेत्यत्र समुदायस्य षट्त्वाभावादवयवस्य षट्त्वेऽपि ततो विहितत्वाभावाल्लुग्नस्यादित्याशङ्क्य षट्प्रधान एषसमास इति समाहितम् एतद्भाष्यस्य संख्याप्रकारकसंख्येयमुख्यविशेष्यकबोधजनकेत्यर्थादुक्तस्थले लुकः सिद्धिः, ष्णान्तेत्यत्र संख्यापदेन लोके गणनायां प्रसिद्धानामेव ग्रहणे मानाभावात्, प्रियपञ्चान इत्यत्र संख्याप्रकारकसंख्येयमुख्यविशेष्यकबोधजनकत्वाभावेन न लुक्, एवं षट्चतुर्भ्य इत्यत्राप्युदितार्थापत्तौ प्रियतिसृणामित्यादि प्रयोगानापत्ति रितिचेन्नोक्त भाष्यस्याङ्गतरादिभ्यः, षड्भ्योलुगिति सूत्रद्वयमात्र विषयत्वात्, न चाङ्गाधिकारे यदुच्यत इत्यत्र विरुद्धाविभक्तित्वादिति हेतुः प्रदर्शितः, तस्यहेतोः षट्चतुर्भ्यश्चेत्यत्राप्यङ्गस्येधिकारात्पश्चम्यन्तेनान्वयायोग्यत्वात्सत्त्वादितिवाच्यम् तस्यहेतोरेकदेशयु-

क्तित्वेनादोषात्, नन्वत्रमपि पदां दत्तामित्यत्रापि भूतपूर्वहृस्वान्तत्वमादाय नुडागमापत्तिरितिचेन्न हृस्वत्वन्नाम मात्राकालिकात्त्वं तत्र विशेषणी भूत मात्राकालपूर्वत्यात्याश्रयणेऽपि विशेष्यीभूतेऽन्त्वांशे तदाश्रयणे मानाभावात्, एवञ्च न कारोच्चारणं नोप धायाइत्युत्तरार्थं तन त्वर्म्मणामित्यत्र नदीर्घइतिनव्याः प्राञ्चस्तूक्त भाष्यबलेनाङ्गाधिकारे पञ्चम्या यदुच्यते गृह्यमाणविभक्तेस्तद्भवतीति भाष्यस्य सूत्रद्वयमात्र विषयकत्वे सर्वादिसूत्रे तदुपन्यासस्य वैफल्येन भा ष्यकृतो भ्रान्तत्वापत्तिः, संज्ञोपर्जनप्रतिषेध इति वार्तिकं प्रत्याचिख्यासोरतिसर्वाय, परम सर्वस्मा विति प्रयोगद्वयमन्यथैव साधयतोमहर्षे र्गीषु प्रया सान्तरसूत्रकाथवेति पदस्वारस्यभङ्गापत्तिश्च, तस्य भाष्यस्य सर्वनाम्नः स्मा इति सूत्रविषयकत्वेऽपि परमसर्वस्मा इत्यत्रवातिसर्वायेत्यत्र स्मायादेशाप त्तिः सर्वादिसूत्रे तदन्तविधेः सत्त्वेन समुदायस्य सर्वनामत्वात् मन्मतेतु सर्वनामार्थ गतसंख्याभिधा यिनोङः स्मायादेश इत्यर्थाभ्युपगमेन परमसर्व स्माइत्यत्रादेशोऽतिसर्वायेत्यत्रन, षड्भ्योलुगित्य-

त्रापि षडर्थगतसंख्याभिधायिनोज्जश्शसोर्लुगित्य-
र्थात्परमपञ्चेत्यादौ जश्शसोर्लुक् प्रियपञ्चानइत्यत्रा-
न्यपदार्थगतसंख्याभिधायित्वेन तयोर्लुग्न,नचैवं षट्-
चतुर्भ्य इत्यत्रापि षडाद्यर्थगतसंख्याभिधायिन आ
मोनुडित्यर्थापत्तौ प्रियतिसृणामित्याद्यर्थं ह्रस्वग्रहणं
चरितार्थमिति वाच्यम् ऋन्नद्याप इति न्यासे भाष्य
कर्तुराशयात् तेनैवोक्तप्रयोगाणां साधुत्वसम्भवा-
त् एवंच धातॄणामित्याद्यर्थं छान्दसत्वाश्रयणमपि न
साम्प्रतंवक्तुं, त्रेरित्यनुवृत्त्यासिद्धमिति भाष्यस्य
तिसृणामित्येतन्मात्रफलकत्वे त्रेरित्यानुवृत्त्या सि-
द्धमित्यर्थे तात्पर्य्यात्, नैकमुदाहरणं योगारम्भं प्र-
योजयतीति भाष्यस्यैकजातीयमुदाहरणं सामान्य-
योगारम्भं न प्रयोजयतीत्यर्थाद्वत्व दुच्चरितस्यासम
दुच्चरितस्य च नृणामित्यस्य भेदात्सिद्धान्तेऽप्यु-
क्तार्थस्यावश्यकत्वात्, किञ्च, ष्णान्ताषडित्यस्य
संख्याप्रकारक संख्येयमुख्य विशेष्यक बोधजनका
षान्तानान्तेत्यर्थाभ्युपगमे राजान इत्यत्रापिषट्त्वा
ज्जशोर्लुगापत्तिः, सन्मतेतुसंख्यापदेन लोके गण-
नायां प्रसिद्धानामेव ग्रहणा द्राजन्नित्यस्यतत्त्वाभा-

वात्, अर्थ घटकविशेष्यताया निरवच्छिन्नाया ग्र- हणे बहुत्वनिष्ठप्रकारतानिरूपित राजनिष्ठविशेष्य- ताया राजत्वावच्छिन्नत्वाद्दोषविरहेतु त्रिदण्डि- न इत्यत्र दण्डिन इवत्रय इति विग्रहे त्रित्व संख्या निष्ठ प्रकारतानिरूपित संख्येयनिष्ठ विशेष्यतायाः सावच्छिन्नाया अपिग्रहणात्समुदायस्य षट्त्वाज्जसो लुगापद्येत, मन्मतेतुलोके गणतायां प्रसिद्धानामेव ग्रहणान्नदोषः, किञ्च स्वंरूपमित्यत्राशब्दसंज्ञा- याः प्रत्याख्यानावसरे शब्दशास्त्रीयसंज्ञायां स्वंरूप मित्यस्योपस्थितौ स्वरूपग्रहणादेव षडित्यादौ ष- ड्भ्योलुगिति लुक्सिद्धौ षान्तस्य संज्ञाविधानं मु- धैवेत्युदितं भाष्ये, त्वद्रीत्या परमषड़ित्यादौ तस्य चारितार्थेन भाष्यासंगतिः स्पष्टैव, न च षड्भ्योलु गित्यादौ स्वरूपस्य ग्रहणात्परमषड़ित्यस्य षट्त्वेऽ- पि लुकोऽप्राप्त्या फलाभावेन षान्तस्य षट्संज्ञावि- धानं व्यर्थमेवेतिवाच्यम् उभयगतिरिति परिभाष- या षट्संज्ञकस्य स्वरूपस्य च ग्रहणात्परमषपित्यस्य षट्त्वेलुगादिफलकत्वेन षान्तस्य षट्संज्ञाविधानस्य चारितार्थ्यात्, मन्मते तु षडित्यत्रेव परमषडित्य-

त्रापि षट्त्वाभावेऽपि षडर्थगतसंख्याऽभिधायितया जसोलुगितिनोक्तभाष्यविरोध इत्याहुः ॥ अत्र नवीनानुयायिनः, अथ वाऽङ्गाधिकार इति भाष्यस्यैकदेश्युक्तित्वं त्वयाप्यभ्युपगन्तव्यमेव, अन्यथाऽङ्गाधिकारे सर्वनाम्नः स्मा इत्यादावुक्तरीत्यादोषोद्धारेऽपि परमसर्वत्रेवातिसर्वे इत्यत्र त्रलापत्तिः, भाष्येऽङ्गाधिकार इत्युक्त्याऽन्यत्र सर्वनामार्थगत संख्याऽभिधायिन इत्यर्थेन वारणासम्भवात्, किञ्च स्वंरूपमित्यत्र षान्तस्य षट्संज्ञाविधानसामर्थ्येन शब्दशास्त्रे संज्ञावाचकशब्दे स्वरूपस्य ग्रहणं नेति वदत एकदेश्युक्तित्वं, षड्भ्योलुगित्यत्रावृत्त्याश्रयणे, नोभयोर्ग्रहणं सम्भवति आवृत्त्याश्रयणे गौरवात्, यदपि त्रिदण्डिन इत्यत्र दूषणमुपपादितन्तदपि न संख्यानिष्ठप्रकारतानिरूपितसंख्येयमुख्यविशेष्य—तायाः पूर्वपदपर्य्याप्तप्रयोजकतानिरूपितप्रयोज्यत्वाभाववत्या ग्रहणेनोक्तस्थले त्रित्वसंख्यानिष्ठ प्रकारतानिरूपित निरवच्छिन्न संख्येयमुख्यविशेष्यतायास्त्रिपूर्वपदपर्य्याप्तप्रयोजकतानिरूपित —प्रयोज्यतावत्त्वात्षट्संज्ञाया अप्राप्त्या जसो लुग-

प्रवृत्तेः, षड्भ्यो लुगित्यस्य षडर्थगतसंख्याभिधायिनोर्जश्शसोर्लुगित्यर्थाभ्युपगमे तु पञ्च ब्राह्मणा इत्यत्र ब्राह्मणपदोत्तर जसो लुगापत्तिः, तस्यापि षडर्थगत संख्याभिधायित्वात्; यदि तु षडर्थगतसंख्याभिधायिनोःषडव्यवहितोत्तरयोरित्यर्थस्तदा प्रियपञ्चानः पञ्चेत्यत्र जस उत्तर पञ्चपदार्थगतःसंख्याभिधायित्वस्य षड्व्यवहितोत्तरत्वस्य च सत्त्वाज्जसो लुगापत्तिः, स्वार्थगतसंख्याभिधायित्वस्वाव्यवहितोत्तरत्व सम्बन्धाभ्यां षड्विशिष्टयोर्जश्शसोरित्यर्थे स्वपदेन सम्बन्धद्वये पूर्वपञ्चशब्दस्योत्तरपञ्चशब्दस्य वैकस्यैवग्रहणे सम्बन्धद्वयविरहाद्दोषाभावेऽपि वर्त्तिपदार्थेतरपदार्थयोरेकत्वे प्रियपञ्चानः पञ्चेत्यत्र पूर्वपञ्चार्थगतसंख्याभिधायित्वस्यापि सत्त्वेन जसो लुगापत्तिरित्याहुः॥ अत्र प्राचीनानुयायिनः अथवा, अङ्गाधिकार इति भाष्यस्य यथाऽङ्गाधिकार इति दृष्टान्तपरतया व्याख्यानेनान्यत्रापि सप्तम्यास्त्रलित्यादौ सर्वनामार्थगतसंख्याभिधायि सप्तम्यन्तात्त्रलित्यर्थसम्भवेन, नातिसर्वे इत्यत्र त्रलः सम्भवः, नचोपसर्ज्जनेऽथवेत्यादि भाष्येण सर्वनामप्रयुक्तकार्य्यवारणेऽपि संज्ञायां कार्य्यवारणश

कमेवेति वाच्यं पूर्वपरेतिसूत्रे संज्ञायामिति योग-
विभागेन संज्ञायां सर्वनामप्रयुक्तकार्य्यमात्रस्य भा-
ष्यकृतैव निराकृतत्वात् ष्णान्ताषडिति षान्तस्य ष-
ट्संज्ञाविधानबलेन शब्दशास्त्रसंज्ञाबोधकशब्दे स्व-
रूपस्य षट्संज्ञकस्यच बोधाभ्युपगमेनावृत्तिप्रयोज-
नाभावेनास्य भाष्यस्यैकदेशयुक्तित्वे मानाभावात्,
वर्त्तिपदार्थान्यपदार्थयोरेकत्वे प्रियपञ्चानः पञ्चे-
त्यत्रलुगापत्तिर्वक्तुमशक्या, स्वार्थगतसंख्याभिधा-
यित्वस्य स्वप्रयोज्यविशेष्यतानिरूपितसंख्यानि-
ष्ठप्रकारताप्रयोजकत्वरूपार्थाभ्युपगमेन तत्र स्वान्त-
पर्य्यामशक्तिप्रयोज्यविशेष्यतानिरूपितप्रकारत्वा—
सामानाधिकरण्यरूपमुख्यत्वस्य विशेष्यतायां प्रवे-
शेनात्र तादृशप्रकारतासामानाधिकरण्यस्यैव स-
त्त्वेनादोषादिति वदन्ति ॥

रषाभ्यां नो णः समानपदे,

नन्वत्र सूत्रे पदग्रहणसामर्थ्यादेकत्वसंख्याया
विवक्षया निमित्तनिमित्तिनोरेक पदवृत्तित्वे नस्य
णो भवतीत्यर्थलाभेन प्रातर्नमनमित्यादिव्यासे ण-
त्ववारणसम्भवात्समानग्रहणं विफलं, न चापदे कु-

र्वन्नित्याद्यनुकरणे णत्ववारणाय पदग्रहणमिति चेन्न अपदं न प्रयुञ्जीतेति भाष्यात्कुर्वन्नित्यादेरनुकरणस्य प्रयोक्तुमशक्यत्वात्, भूसत्तायामित्यादिनिर्देशात्तुवक्तुमशक्यं तस्यापरिनिष्ठितन्न प्रयुञ्जीतेत्यर्थात्कुर्वन्नित्यस्य परिनिष्ठितत्वादिति वाच्यं परिनिष्ठितान्तस्य नस्य णो नेत्यर्थेन पदान्तस्येत्यनेनैव तत्र णत्व निषेधसम्भवात्, एवं च समानग्रहणं यत्समानमेव [अखण्डमेव) पदं तत्र यथा स्यात् यत्समानमसमानं च पदं तत्र माभूत्, ननु किमखण्डत्वमिति चेदुच्यते निमित्तानधिकरणनिमित्तमत्पदाघटितत्वम्, तत्र तदनधिकरणं निमित्तमच पदस्य विशेषणम् आद्यविशेषणाभावे रामेणेत्यादिषु निमित्तमतः प्रत्ययस्यापदत्वात्समुदायस्य निमित्तमत्पदरूपत्वाच्चाखण्डत्वसम्भवेऽपि सुपर्णेत्यादौ निमित्तमत्पदघटितत्वेन तत्वानापत्तेः तदनधिकरणत्वं च तदनवयवकत्वम्, द्वितीयविशेषणाभावे रामेणेत्यादिषु निमित्तानधिकरणोदासीनपदाघटकत्वेनापि तत्व निर्वाहे सुपर्वणा मातृभोगीण इत्यादिषु निमित्तानधिकरण सु-भोग-पदघटि

तत्वात्तत्वानापत्तेः, निमित्तानधिकरणं निमित्तिम-द्यत्तदघटितत्वमित्येवं क्रियमाणेऽपि सर्वत्र निर्वाहेऽलं पदनिवेशनेति वक्तुमशक्यं मातृभोगीण इत्यादौ समुदायस्य निमित्तानधिकरणनिमित्तिमद्भोगीन घटितत्वादखण्डत्वानापत्तेः। तन्निवेशेतु केवलभोगीनेत्यस्य प्रत्ययमात्रस्य वा निमित्तिमत्पदत्वाभावेनोदासीन निमित्तिमत्पदाघटितत्वेन तत्त्वं सुलभम्, अथ लक्षणकुक्षिनिक्षिप्तं पदं स्वशास्त्रसङ्केतितं गृह्यते, उतार्थवन्मात्रम्, आद्ये रामं नमतीति-विग्रहे कर्म्मण्यणि गतिकारकोपपदानामिति सुबुत्पत्तेः प्राक् समासे नामेतिकृदन्तस्य पारिभाषिकपदत्वाभावेनोदासीन तादृशनिमित्तिमत्पदाघटितत्वेन तत्त्वापत्तेः, अन्त्ये रामेण, मातृभोगीण इत्यादावपि प्रत्ययमात्रस्यार्थवत्त्वेन तादृशनिमित्तिमत्पदघटितत्वेन तत्वानापत्तेरिति चेदुच्यते विभक्तीतरानपेक्षया लोकेऽर्थविषयकबोधजनकमेव तत्, अभावद्वयनिवेशफलमर्थवत्सूत्रोक्तरीत्या बोध्यं, मातृभोगीण इत्यत्र भोगीनेत्यस्य प्रत्ययमात्रस्य वा तादृशनिमित्तिमत्पदत्वाभावेनोदासीननिमित्तिम-

पदाघटितत्वेन तत्त्वसिद्धेर्वक्तुं शक्यत्वात् अतएव गन्धर्वगानमित्यादौ सुबुत्पत्तेः प्राक् समासे निमित्तरेफानधिकरणनिमित्तिमद्गानपदघटितत्वान्न तत्त्वम् रामस्य नाम रामनामेति समासे समुदायस्य निमित्तरेफानधिकरणनिमित्तिमन्नामपदघटितत्वेन तत्त्वाभावात्, न च नाथरघुणेत्यादौ निमित्तरेफानधिकरण निमित्तिमन्नाथपदघटितत्वाण्णत्वानापत्तिरिति वाच्यं निमित्तानधिकरणनिमित्तिमदुत्तरपदाघटितत्वमित्यङ्गीकारेणादोषात्; नच सुन्दरनवीनप्रासादो देवदत्त इत्यादौ सुन्दरो नवीनः प्रासादो यस्येति त्रिपदबहुव्रीहौ नवीनस्य निमित्तरेफानधिकरणनिमित्तिमदुत्तरपदत्वाभावेन उदासीनतादृशनिमित्तिमदुत्तरपदाघटितत्वेनाखण्डत्वापत्तिरिति वाच्यमुत्तरपदशब्दस्य समासचरमावयवतामङ्गीकुर्वतां सतां मतमत्र विजहतामुत्तरञ्च तत्पदमित्यर्थकमुत्तरपदमावेशयतामस्माकं नये दोषाभावात्, नच गीर्नाथरघुणेत्यादौ निमित्तरेफानाधिकरण निमित्तिमन्नाथपदघटितत्वेन तत्त्वानापत्तिरिति वाच्यं करिष्यमाणणत्वनिमित्तीभूतरेफानधिकरणस्यैव निमि-

त्तिमत उत्तरपदस्य तेन ग्रहणात् गिरवयवरेफानधिकरण निमित्तमन्नाथपदघटितत्वेऽपि णत्वनिमित्तरेफावयवरेफानधिकरणनिमित्तमदुत्तरपदाघटितत्वेनाखण्डत्वस्य सत्त्वात्, न च सुवर्णनामेत्यादौ निमित्तसुवर्णावयवरेफानधिकरणनिमित्तिमन्नामपदघटितत्वेन तत्त्वानापत्तिरिति वाच्यं कृते णत्वे सह नाम्ना समासाद्दोषाभावात्, न च सर्वनरेणेत्यादौ निमित्तरेफानधिकरणनिमित्तमत्पदाभावेनोदासीननिमित्तिमत्पदाघटितत्वादाद्यनकारस्य णत्वापत्तिरिति वाच्यम् रषाभ्यामित्यत्र वैशिष्ट्यार्थकपञ्चमीस्वीकारेणादोषात् वैशिष्ट्यं च स्वोत्तरत्व-स्वाघटितपदाघटकत्वसम्बन्धाभ्याम् । समानपदग्रहणञ्चात्रार्थे तात्पर्य्यग्राहकम्, सर्वनरेणेत्यत्राद्यस्य नस्य णत्ववारणायाद्यः, रामनामेत्यत्रणत्ववारणायद्वितीयः; न च ब्रीहिवापाणीत्यादौ प्रातिपदिकान्तेत्यादेरसिद्धत्वादट्कुप्वाङ्नुमिति नित्यं णत्वं स्यादिति वाच्यं स्वानधिकरणपदघटितसमुदायनिरूपितावयवत्वाभावव्वत्त्वरूपतृतीयसंसर्गस्यापि वैशिष्ट्यनियामकस्याङ्गीकारेणादोषात्, नुमस्ताद्दृशसमुदाय-

निरूपितावयवत्वसत्त्वात्, न च वारिणिशय इत्यादौ नुमस्तादृशसमुदायनिरूपितावयवत्वेन णत्वानापत्तिरिति वाच्यं तृतीयसम्बन्धपदे स्वानधिकरणपदघटितसमुदायनिष्ठोद्देश्यतानिरूपितावयवत्वावच्छिन्नविधेयतानाश्रयत्वस्य निक्षेपेणादोषात्, सम्बन्धघटकस्वपदेन यं निमित्तीकृत्य णत्वं चिकीर्षितं स एव ग्राह्यो न तु तज्जातीयो द्वितीयोऽपि तेन सर्वनरेणेत्यत्र पूर्वस्य नस्य न णत्वम्, यत्तु निमित्तिविशिष्टनिमित्तघटितत्वमेवाखण्डत्वंवैशिष्ट्यं च स्वानुत्तरत्व स्वाघटितपदाघटकत्वसम्बन्धाभ्यां प्रथमसम्बन्धनिवेशात्सर्वनरेणत्यत्र पूर्वस्य नस्य न णत्वम् द्वितीयसम्बन्धनिवेशाद्रामनामेत्यत्र न णत्वमेवं क्रियमाणे न कुत्रापि दोष इत्युक्तं तन्न मातृभोगीण इत्यादौ णत्वानापत्तेः, केचित्तु निमित्तिविशिष्टपदाघटितत्वमेवाखण्डत्वम्, वैशिष्ट्यं च स्वघटितत्वस्वानुत्तरनिमित्ताघटितत्वसम्बन्धाभ्यां रामनामेत्यत्र निमित्तिनकारानुत्तररामावयवरेफाघटितोदासीनपदाघटितत्वेनाखण्डत्ववारणाय प्रथमसम्बन्धनिवेशः, सर्वनरेणेत्यादिषु णत्वसिद्धये

द्वितीयसम्बन्ध निवेशः, यत्तु निमित्तवत्पदभिन्न पदत्वाभाववत्त्वमेवाखण्डत्वं रामेण-मातृभोगीण इत्यादौ निमित्तरेफादिमत्पदभिन्नपदत्वाभाववत्वसत्त्वादित्युक्तं तन्न रामनामेत्यादावुत्तरपदत्वे चेति प्रत्याख्यानरीत्याऽतिव्याप्तेः सुबुत्पत्तेः प्राक् समासे गन्धर्वगानमित्यादावतिव्याप्तेश्च, सर्वनरेणेत्यत्र पूर्वस्य नस्य णत्वापत्तेश्च, निमित्तस्य निमित्तिमत्पदस्थत्वमेव समानपदत्वमित्यपि न रामनाम-गन्धर्वगानमित्यादावतिव्याप्त्यापत्तेरन्यथा मातृभोगीण इत्यादावव्याप्तेश्च, सर्वनरेणेत्यत्र पूर्वस्य नस्य णत्वापत्तेश्च, रेफषकागनधिकरण समभिव्याहृतपदावृत्तित्वमपि न तत् सर्वनरेणेत्यत्र पूर्वनकारस्य णत्वापत्तेश्च, ननु पूर्वपदात्संज्ञायामग इति सूत्रारम्भसामर्थ्यात्पूर्वपदस्थान्निमित्तात्परस्य नस्य यदि णत्वं स्यात्तर्हि संज्ञायामेवेति नियमान्न रामनामेत्यत्र णत्वप्राप्तिः शङ्कया, प्रातिपदिकान्तनुम् विभक्तिषु चेति सूत्रन्तु प्रातिपदिकान्तनुम् विभक्तिभिन्नस्येति नस्य विशेषणदानेनापि चरितार्थमिति चेन्न शोभनप्रियनायिक इत्यत्र णत्वापत्तेः, पूर्वपद शब्दस्य समासस्य प्रथमावयवे रुढित्वादितिज्ञेयम्,,

प्रत्ययलोपे प्रत्ययलक्षणम्

ननु हरिरित्यत्र प्रत्ययस्य जसो ऽभावाज्जसि चेति गुणापत्तिः, नापि शास्त्रकर्तृक प्रत्ययलोपे प्रत्ययलक्षणाभ्युपगमेन निर्वाहो हरिप्रिय इत्यत्र ङसोऽभावसत्त्वाद् घेर्ङितीति गुणापत्तिरिति चेन्न यस्याःप्रकृतेर्विहितस्य यत्प्रत्ययस्याभावः शास्त्रकर्तृकस्तस्याः प्रकृतेस्तत्प्रत्ययनिमित्तकं कार्य्यमित्यर्थाभ्युपगमान्न दोषः, प्रत्युच्चारणं शब्दानामभिन्नत्वेन ङसः प्रकृतिभूतस्य हरेर्लुप्तप्रत्ययाव्यवहितपूर्वतया नलुमतेति निषेधात्, नचैवंराज्ञ इत्यत्र नलोपापत्तिः राजेत्यत्र शास्त्रकर्तृकप्रत्ययाभावसत्त्वादिति वाच्यं प्रत्युच्चारणं शब्दानां भिन्नतया ङस्प्रकृतिराजशब्दात्सुप्रकृतिराजशब्दस्य भिन्नत्वात् अतएव प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकभेदवत्तां धियं प्रति प्रतियोगिवृत्तित्वाभाववत्त्वेनानुयोगितावच्छेदकधर्मस्य निमित्तत्वमङ्गीकुर्वतो नये घटो न द्रव्यमिति प्रतीत्यभाववद्राज शब्दाद्भिन्नो राजशब्द इति न प्रतीत्यभावः, सुमभिव्याहृतङस्समभिव्याहृतयोस्तयोरन्यत्वात् समभिव्याहृतत्वं च, शब्दविशि-

ष्टत्वं वैशिष्ट्यञ्च स्वपूर्वत्व स्वोत्तरत्वान्यतरसम्बन्धे-
न, लोपनं लोपो भावे घञ् प्रत्ययस्य लोपः प्रत्यय
लोपः, लक्ष्यते येन तल्लक्षणम् प्रत्ययोलक्षणंयस्यत-
त् प्रत्ययलक्षणम् यस्य च भावेन भावलक्षणमित्य-
नेनात्र सप्तमी, सप्तम्यधिकरणे चेति विहितसप्त
म्यभ्युपगमे तु लुप्तप्रत्ययाऽव्यवहितपूर्वस्य कार्य्या
भावात्प्रत्ययलक्षणं न स्यादभावस्य पौर्वापर्य्यविर-
हात् वौद्धपौर्वापर्य्यमताङ्गीकारे ऽस्य यथाकथञ्चि-
त्साधुत्वे ऽपि प्रत्ययस्थादिति सूत्रे बहुपरिव्राजका
दिषु ककाराऽव्यवहितपूर्वस्यास्य कार्य्यस्य कर्त्तव्यत
या प्रत्ययलक्षणाप्रवृत्तावसुब्ग्रहणस्य वैयर्थ्यापत्तेः,
वोभवीतीत्यादिषु प्रत्ययलोपाऽव्यवहितपूर्वस्य का-
र्य्याभावाद् यङोवेतीडागमानापत्तेश्च, ननु प्रथमप्रत्य
यग्रहणं मास्तु नच पियावित्यादावपिपूर्वकादीयतेः
क्विपि भागुरिमतेऽपेरल्लोपे प्रत्ययलक्षणेनानेकाच्त्वा
दरनेक.च इ.ति यणापत्तिरिति वाच्यमुदिय.वित्या
दौ यणो निवृत्तये कि.ञ्चिद्धात्ववयवपूर्वकस्यैव तेन
यणविधानेन प्रकृते तदप्रवृत्तेः, नच ननन्देत्यादा
विकारलोपे प्रत्ययलक्षणेनानेकाच्त्वप्रयुक्तः कास्प्र

त्ययादिति ।विहित आम् स्यादिति वाच्यमनुबन्धरहि तस्यानेकाचो ग्रहणस्य कास्ग्रहणबलेन ज्ञापितत्वात्। न च ग्रामणिकुलमित्यादौ प्रत्ययलक्षणेन ह्रस्वस्येति तुगापत्तिःकृते तु प्रत्ययग्रहणे तत्सामर्थ्यात्प्रत्यये सति यत्कार्य्यं प्राप्नोति तल्लोपे सति भवतीत्यर्थकल्पना न्न तुगागम इति वाच्यमन्तरङ्गे तुकि कर्त्तव्ये बहि-रङ्गस्य ह्रस्वत्वस्यासिद्धत्वेन तत्र दोषस्य वक्तुमश-क्यत्वात् प्रत्ययग्रहणसामर्थ्याडुक्तार्थकल्पनायां ज-गदित्यत्र द्युतिगमिजुहोतीनां द्वे चेति गमेः क्विप्य-न्तरङ्गत्वात्पूर्वं विलोपे तुगनापत्तिः, एवञ्च प्रत्यय ग्रहणं प्रत्ययत्वपर्य्याप्त्यधिकरणे प्रत्ययलक्षणं यथा स्यादित्येवमर्थम्, नागेशभट्टास्तु पूर्वोक्तस्थले दोषा त् परिजिहीर्षवः पूर्वसूत्रात्प्रत्ययग्रहणमनुवर्त्तयन्ति ते ऽन्यतरच्छक्यमकर्त्तुमिति भाष्यविरोधादुपेक्ष्याः, अन्ये तु प्रत्ययस्येत्यनुवृत्त्यैतस्य, प्रत्ययस्य प्र-त्यासत्त्याऽनु पश्चाद्वृत्त्या सम्बन्धेनेत्यर्थकरणेन भाष्यविरोधं परिहरन्ति, तेनाशीयेत्यदावाङ्पूर्वका द्धन्तेर्लिङ्स्थानिकस्यैटोऽदादेशे गमहनेत्युपधालोपे ऽनुदात्तोपदेशेत्यादिना नानुनासिकलोपः, न चात्र

सकारस्याप्रत्ययत्वान्न प्रत्ययलक्षणं भवितुमर्हतीति वाच्यमिदमेव प्रत्ययग्रहणं प्रत्ययावयवे प्रत्ययत्वव्यवहार इति ज्ञापयति तेनेदुदुपधस्येत्यादिषु न लक्षणाश्रयणमिति नागेशः, न चानुदात्तोपदेशेति सूत्रे वनसाहचर्य्यादनुपधालोपिनोऽनुदात्तोपदेशस्यानुनासिकान्तस्य लोपविधानाङ्गीकाराडुक्तफलस्योपधालोपितयानुनासिकलोपो न प्राप्नोतीतिवाच्यं साहचर्य्यपरिभाषाया अनित्यत्वात्, वस्तुतस्तु साहचर्य्यपरिभाषायाः प्रवृत्तिविषयतैवात्र नास्ति, तथा हि वनसाहचर्य्याज्झलादौ क्ङित्यनुपधालोपिनोऽनुनासिकान्तस्य झलादौ क्ङितित्यर्थस्य शब्दमर्य्यादया न लाभः झलादि क्ङितस्तन्त्रादौ विनिगमकाभावादाघ्नीयेत्यादौ झलादिक्ङितिलोपाभावाच्च, किन्तु अजादिक्ङित्येव गमहनेत्युपधालोपेन झलादौ क्ङित्यनुपधालोपित्वमेव, न चानुपधालोपिनोऽनुनासिकान्तस्य झलादौ क्ङिति लोप इति सामान्यार्थस्वीकारादाघ्नीयेत्यादावुपधालोपित्वेन न दोष इति वाच्यं सामान्यतोऽनुपधालोपिनोऽनुनासिकान्तस्य लोप इत्यर्थाश्रयणे हि हतो हथ इत्यादावप्यनुनासिक

लोपानापत्तेरजादौ क्ङित्युपधालोपित्वात्, किञ्च रामिधेनि फलं बोध्यन्तत्र हि समिधमिच्छतीति क्यजन्तात्क्विप्यल्लोपयलोपयोस्ततष्टाविभक्तौ प्रत्यय लक्षणेनाकारान्तत्वबुद्धौटाङसिङसामितीनादेशाप- त्तेः, ननु प्रत्ययावयवे प्रत्ययत्वव्यवहारे येन विधि रिति सूत्रस्थभाष्यविरोधः, तत्र हि यस्मिन्विधिरि- तिपरिभाषां खण्डयन् अचिश्नुवितिसूत्रेणयङ् श्रियै भ्रुवाइत्यत्रैव स्यान्न तु श्रियो भ्रुवइत्यत्रेति भाष्यकृ दवोचत्, पूर्वोक्तज्ञापने तु केवलस्याप्यस्याजन्तप्रत्य यत्वाद्भाष्यासङ्गतिः स्पष्टैवेति चेन्नाकारस्य प्रत्यय- त्वसत्त्वेऽप्यजन्तत्वविरहात्तत्त्वञ्चाज्विशिष्टत्वं वैशि ष्ट्यञ्च स्वघटितत्व स्वध्वंसाधिकरणक्षणवृत्तिवर्णाघ- टितत्व सम्बन्धाभ्याम् असोऽकारस्याच्त्वात्तद्घटित त्वाभावात् व्यपदेशिवद्भावस्य तु नायं विषयोऽसहा यत्वविरहात् तत्त्वं च मुख्यधर्म्मवद्घटकत्वे सति मुख्यधर्म्मवद्घटितत्वे सति मुख्यधर्म्मवदसमभिव्या हृतत्वम् अकारस्य मुख्यधर्म्मवतोऽसोघटकत्वात्, किञ्चाङ्गसंज्ञानिमित्तकेऽजन्तप्रत्यय इत्यर्थाश्रय- णादकारमात्रस्याजन्त प्रत्ययत्वेप्यङ्गसज्ञानिमित्तक-

त्वाभावात्, न च राममित्यादौ मकारस्यापि सुप्त्वव्यवहारापत्त्या सुपिचेति दीर्घापत्तिरिति वाच्यं प्रत्ययत्वव्यवहार इत्यस्य प्रत्ययत्वावच्छिन्ना विषयता यत्र तत्रैवेत्यर्थात् सुप्त्वावच्छिन्नविषयता-यास्तत्र सत्त्वे मानाभावात् अतिदिश्यमानधर्म्मसम-नियतधर्म्मनिमित्तकं कार्य्यं नेति प्रसिद्धमेव सा-मान्यातिदेशे विशेषानतिदेशात, न च महिषीश-ब्दाङ्गोयुगाचि कृते वान्तादेशापत्तिरिति वाच्यम् गव्यु गाचि कर्त्तव्ये ओकारोच्चारणारम्भा न्नस्यात् न-चाखनिकवकइत्यादौ ककारस्येत्संज्ञा स्यात् फलाभा वादित्संज्ञाऽभावो वक्तुमशक्यो गमहनेत्युपधालोप स्य फलस्य विद्यमानत्वादिति वाच्यम् अवयत्वन्यू नवृत्तिधर्म्मावच्छिन्नविषयताऽनिरूपिता प्रत्ययत्वाव च्छिन्ना विषयता प्रत्ययावयवे गच्छतीत्यर्थस्यैव प्रत्ययग्रहणेन कल्पनीयत्वात्, तथा सति लशक्वि त्यस्य प्रत्ययादिभूता लशकवर्गाइतः स्युरित्यर्थेन तत्रत्यप्रत्ययप्रयोज्यप्रत्ययत्वावच्छिन्नविषयताया अ वयवत्वन्यूनवृत्त्यादित्वधर्म्मावच्छिन्नविषयतानिरू-पितत्वात्, किञ्च तत्रत्यादिग्रहणसामर्थ्याच्छ्रूयमाण

प्रत्ययविशिष्टप्रत्ययपदप्रयोज्यप्रत्ययत्वावच्छिन्नावि षयताऽवयवेऽपि गच्छतीत्यर्थस्यैव कल्पनीयत्वात्, वैशिष्ट्यञ्च स्वतादात्म्य स्वेतरपदप्रयोज्यविषयता निरूपितविषयत्वाप्रयोजकत्व सम्बन्धाभ्यामेवञ्च तत्रत्यप्रत्ययपदस्य स्वेतरादिपदप्रयोज्यविषयतानि रूपित विषयताप्रयोजकत्वस्यैव सत्त्वेन न दोषः, केचित्तु येनविधिरिति सूत्रस्थभाष्यविरोधपरीहाराय षष्ठ्यन्तपदप्रयोज्याविषयता यत्र तत्रैवास्य प्रवृत्ति मभ्युपगच्छन्ति, अचिश्निवत्यत्र षष्ठ्यन्तपदप्रयोज्य विषवतायाअभावात् न च लशक्कित्यादौ षष्ठ्यन्त पदप्रयोज्यविषयतायास्सत्त्वेनावयवेऽपि तत्त्वव्यवहा रः स्यादितिवाच्यम् षष्ठ्यन्तपदप्रयोज्या यत्र मुख्या विषयता तत्रैव प्रवृत्त्यङ्गीकारात् मुख्यत्वञ्च स्वावयवनिष्ठविशेष्यतानिरूपितप्रकारत्वासामानाधिकरण्यम्प्रत्ययस्य स्वावयवनिष्ठविशेष्यतानिरूपितप्रकारतासामानाधिकरण्यान्न दोष इत्याहुः। अन्ये तु ज्ञापकसाजात्यात्सूत्रघटकप्रत्ययपदप्रयोज्य विषयताया एवातिदेशेनाङ्गाक्षिप्त प्रत्ययपदप्रयोज्य विषयतायाअनतिदेशान्न दोष इति ब्रुवन्ति, ननु

नियमस्य सङ्कोचरूपत्वेन तदाकारस्यात्र विघटनान्न साम्प्रतम्प्रत्ययपदस्य नियमार्थत्वं वक्तुमितिचेन्न सामान्यतः श्राव्यमानस्य प्रत्ययपदस्यावयवत्वानव- च्छिन्नत्वेन विशेषपरत्वमात्रबोधनात्, ननु ग्रामा- वयवे दग्धेऽपि ग्रामो दग्धइति लौकिकप्रतीतिव- च्छास्त्रेऽपि प्रत्ययावयवलोपे प्रत्ययलोपव्यवहारादिद मेवेत्यादिकथनमयुक्तमिति चेन्नास्य लोकसिद्धस्यै वानुवादकत्वात्, केचित्तु यदागमपरिभाषया लिङ वयवे सीयुटि लोकविदितप्रतीतिवत्प्रत्ययत्वव्यव- हारेऽपि सकारे तदभावदर्शनेनावयवेऽपीत्यस्याव- यवावयवेऽपीत्यर्थस्यावश्यकत्वादित्याहुः। ननु स्था निवत्सूत्रेण सिद्धे प्रत्ययलोपसूत्रं निरर्थकमतृणे- डित्यत्रमागमार्थन्तु वक्तुमशक्यं तृणहइमिति सूत्रे नाभ्यस्तस्येति सूत्रादचि नेति पदद्वयमनुवर्त्य तृणहानीत्यादिस्थले दोषाभावात् नापितत्सूत्रं मित्रशीरित्याद्यर्थमपि युज्यते वक्तुं शासइदित्यत्र हलोऽकरणात्, शासइत्, अङीति योगद्वयं विभ- ज्याङीतियोगबलादजादौ चेत्तर्ह्यङ्येवेति नियमेना- शासाते इत्यादौ न दोषः ननु सर्त्तिशास्तीत्यत्रो-

त्तरार्थं परस्मैपदेष्विव्त्यस्य सम्बन्धेन शासुअनुशिष्टा-
वित्यस्मादेवाङः सम्भवात्तत्साहचर्य्येण हलादिक्
ङितोरपि तस्मादेवविहितयोर्ग्रहणान्नाशास्त इत्या-
दौ दोष इदानीमङीत्यस्याभावे शासोरुभयोरपि
ग्रहणापत्तावित्वापत्तिरिति चेन्न आशासः क्वावुप
संख्यानमिति वार्त्तिकारम्भसामर्थ्यादाङः शास
इत्वंचेत्तर्हि क्वावेवेतिनियमान्न दोषः, न च वर्णा
श्रयत्वेन प्रत्ययलक्षणाभावादाशीरित्यादि सिद्धये
तस्य चारितार्थ्येन कथं नियमार्थत्वमिति वाच्यं शा
स इतिसूत्रानन्तरं क्वौ, आङ्इति योगद्वयकरणेनो-
त्तरयोगबलादाङः शासश्चेदित्वंतर्हिक्वावेवेतिनियमेन
न दोषः,क्षियाशीः प्रैषेष्वित्यादिनिर्द्देशादाशीरित्यादि
सिद्धौ वार्त्तिकप्रत्याख्यानपरभाष्यप्रामाण्येन शासु-
अनुशिष्टावित्यस्यैवग्रहणाच्च, यत्तु क्वित्साहचर्य्यान्
ङितोऽपि परस्मैपदिनो विहितस्य ग्रहणादित्युक्तन्त
दसत् व्यतिशशासे इत्यादौ ङितोऽपि प्रत्ययस्य स-
म्भवात्, एवं सति प्रत्ययस्यासाधारणं रूपं यत्रा-
श्रीयते तदेव कार्य्यं प्रत्ययलोपे सति भवति न तु
प्रत्ययाप्रत्ययसाधारणमिति मनोरमायाम्,अत्रासा-

धारणत्वम् प्रत्ययवृत्तित्वे सति तदितरावृत्तित्वम्, प्र-
त्ययस्यासाधारणमित्यादिस्तु न सूत्रनियमः किन्तु
प्रत्ययलोपे तल्लक्षणमिति न्यासेन सिद्धे द्वितीयप्र-
त्ययग्रहणसामर्थ्यात्प्रत्ययत्वव्याप्यधर्म्मावच्छिन्ननि
मित्तताककार्य्ये एव प्रवृत्त्यभ्युपगमादित्येवंशब्दरत्न
ग्रन्थाशयः, नन्वत्र नियमाकाराप्रवृत्तिस्तथाहि व्य-
र्थशास्त्रीयोद्देश्यतावच्छेदकव्यापकं व्यर्थताप्रयोजक-
शास्त्रीयोद्देश्यतावच्छेदकव्याप्यं यद्रूपं तद्रूपावच्छि-
न्नातिरिक्तत्वेन व्यर्थताप्रयोजकशास्त्रीयोद्देश्यता-
वच्छेदकावच्छिन्ने सङ्कोचः क्रियते, यथा कृत्तद्धिते
ति सूत्रे समासग्रहणं व्यर्थताप्रयोजकशास्त्रीयोद्दे-
श्यतावच्छेदकावच्छिन्नेऽर्थवच्छब्दस्वरूपे व्यर्थशा-
स्त्रीयोद्देश्यतावच्छेदकसमासत्वव्यापकव्यर्थताप्रयो-
जकशास्त्रीयोद्देश्यतावच्छेदकार्थवत्त्वव्याप्यपूर्वभाग-
पदघटितसंघातत्वावच्छिन्नातिरिक्तत्वेन सङ्कोचय-
ति, प्रकृते व्यर्थताप्रयोजकशास्त्रीयोद्देश्यतावच्छेद-
कावच्छिन्नआदेशे व्यर्थशास्त्रीयोद्देश्यतावच्छेदक
प्रत्ययलोपत्वव्यापकस्य कस्य चिद्धर्म्मस्याभावात्त-
द्धर्म्मावच्छिन्नातिरिक्तत्वेन सङ्कोचो न भवेत्, स्व-

समानाधिकरणात्यन्ताभावाप्रतियोगित्व स्वाभावा-धिकरणनिरूपितवृत्तित्व सम्बन्धाभ्यां स्वविशिष्टत्व रूपस्यैव व्यापकत्वेन स्वस्यात्र स्वव्यापकत्वं व-क्तुमशक्यमतएवार्थवत्सूत्रेऽपि न समासातिरिक्त-त्वेन सङ्कोचः, तथासति वाक्यस्य पूर्वसूत्रेण संज्ञा-दुर्वारैव स्यात्, नच नियम्यनियामकयोरुभयोरपि शास्त्रयोरुद्देश्यविधेययोर्व्यत्यासं परिकल्प्य, प्रत्ययत्व व्याप्यधर्म्मावच्छिन्ननिमित्तताकङ्कार्य्यम्प्रत्ययलोप-निमित्तकम्भवति, स्थानिवृत्तिधर्म्मावच्छिन्ननिमि-त्तताककार्य्यवदादेशो भवतीत्येवं नियम्यनियामक-शास्त्रयोर्बोधे व्यर्थताप्रयोजकशास्त्रीयोद्देश्यताव-च्छेदकावच्छिन्ने स्थानिवृत्तिधर्म्मावच्छिन्ननिमित्त-ताककार्य्यवति व्यर्थशास्त्रीयोद्देश्यतावच्छेदकप्रत्य-यत्वव्याप्यधर्म्मावच्छिन्ननिमित्तताककार्य्यत्वव्याप-कव्यर्थताप्रयोजकशास्त्रीयोद्देश्यतावच्छेदकस्थानिवृ-त्तिधर्म्मावच्छिन्ननिमित्तताककार्य्यत्वव्य,प्यप्रत्य--यवृत्तिधर्म्मावच्छिन्नकार्य्यत्वावच्छिन्नातिरिक्तत्वेन सङ्कोचे, नासङ्गतत्वमिति वाच्यं रामायेत्यादावपि दीर्घस्य प्रत्ययवृत्तिधर्म्मावच्छिन्ननिमित्तताकका-

र्थत्वेन स्थानिवत्त्वानापत्तेरिति चेन्न नियामकशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्नआदेशे नियम्यशास्त्रीयोद्देश्यतावच्छेदकप्रत्ययत्वव्याप्यधर्म्मावच्छिन्न निमित्तताककार्य्यप्रयोजकप्रत्ययलोपत्वव्यापकसामान्यप्रत्ययलोपत्वावच्छिन्नातिरिक्तत्वेन सङ्कोचात्, सामान्यतो लोपत्वावच्छिन्नातिरिक्तत्वेन सङ्कोचस्तु वक्तुमशक्यो दामन्शब्दादाचक्षाणण्यन्तात् क्विपि दामः समीपमुपदाममित्यत्र स्थानिवद्भावेनान्नन्तत्वादनश्चेतिटचीष्टस्योपदाममित्यस्यासिद्ध्यापत्तेः तेन शोभनादृषदोऽस्य सुदृषत्प्रासाद इत्यत्र स्थानिवत्त्वेनासन्तत्वादत्वसन्तस्येति दीर्घोनेति दीक्षितः, नन्वतुसाहचर्य्याच्छ्रूयमाणासन्तस्यैव दीर्घविधानादत्र दीर्घप्राप्त्यभावेन फलकथनमयुक्तमिति चेन्न साहचर्य्यपरिभाषायाअनित्यत्वस्याप्यनेन ज्ञापनात्, । केचित्तु मतिमच्छब्दादाचक्षाणण्यन्तात्क्विपि स्थानिवद्भावेनात्वन्तत्वात्सौ परे दीर्घदर्शनान्न तत्साहचर्य्यसम्भवइत्याहुस्ते उपेक्ष्याः सूत्रेऽतुलुप्तषष्ठ्यन्त।निर्देशा.न्निर्दिश्यमानपरिभाषयाऽतुपदीयनिर्दिश्यमानावयवोपधायादीर्घविधानेन प्रकृतेऽतुश-

ब्दस्याभावेन तदवयवोपधाया असत्त्वेन दीर्घाप्रवृत्तेः। अन्ये तु पत्वच्छब्दादाचक्षाणण्यन्तात्क्विपि विन्मतोरिति मतुब्लुकि प्रत्ययलक्षणेनमतुप्रत्ययान्ततया सौदीर्घदर्शनान्न साहचर्य्यसम्भवइति वदन्ति, तन्न रोचते, उक्तयुक्तेः अचश्चेतिपरिभाषोपस्थिते रुपधाया अचो दीर्घविधानाच्च, वस्तुतस्तु पत्वच्छब्दादाचक्षाणण्यन्तात्क्विपि, मतुब्लुकि सौ प्रत्ययलक्षणेनात्वन्तत्वे दीर्घदर्शनेन साहचर्य्यस्य वक्तुमशक्यत्वात्, यत्तु यशस्वीत्यादिषु विनिप्रत्ययलाभायास्मायामेधास्रजइति सूत्रेऽसन्ततदादेरित्यर्थसम्पादनायानिनस्मन्ग्रहणानीति परिभाषया वर्णत्वातिदेशेनासोवर्णरूपत्वेनाल्त्वव्याप्यतया स्थानिवत्वासम्भव इत्युक्तन्तदपि स्थवीयः, उपदाममितिप्रदर्शित प्रयोगस्य पयश्शब्दादाचक्षाणण्यन्तात्क्विपि स्थानिवद्भावेनासन्तत्वाद्विनिप्रत्यये पयवीति प्रयोगस्य चासिद्ध्यापत्तेः बहुदण्डिन्शब्दादाचक्षाणण्यन्तात्क्विपि संयोगान्तलोपे बहुदन्नित्यत्र स्थानिवत्त्वेनेन्नन्तत्वात्प्रासस्येनः स्त्रियामिति कपोराजन्शब्दादाचक्षाणण्यन्तात्क्विपि राजः समीपसुपरादित्यत्र

स्थानिवद्भावेनाऽनन्तत्वात्प्रामस्यानश्चेति टचो वो-भवीतीत्यादौ स्थानिवत्त्वेन ङित्त्वादनुदात्तङितइति विहितस्यात्मनेपदस्य च वारणाय नियमस्यावश्य-कत्वादित्याहुः, । यत्तु सुदृषत्प्रासाद इत्यत्र मास्तु दीर्घाभावः फलम् अस्मायामेधास्रजइत्यादिना वि-हितो विनिप्रत्ययो दुर्वारएवेति तदपि न तत्रापि मायादिसाहचर्य्यादसन्नसन्नवर्णघटितस्यैवासन्तस्यग्र हणात्, नन्वनॄणेडित्यादौ प्रत्ययेतरपदार्थनिष्ठ विशेष्यतानिरूपितविशेषणतानाश्रयत्वरूपप्रत्ययप्रा धान्यस्याश्रवणादनल्विधावितिनिषेधादिमः सिद्ध-ये प्रत्ययलोपसूत्रस्य विध्यर्थकतावादिमतेऽपि ह-लादित्वं निमित्तीकृत्य विहितस्येमागमस्य वर्णा-श्रयत्वात्प्रत्ययलक्षणन्नस्यादितिचेन्न वर्णाश्रये ना-स्तीत्यादेः वर्णप्राधान्यविषयकत्वेनात्राप्रवृत्तेः, वर्ण-स्य तत्त्वञ्च प्रत्ययनिष्ठविशेषणतानिरूपितविशेष्य-ताश्रयत्वम् इतरपदार्थनिष्ठविशेष्यतानिरूपितवि-शेषणतानाश्रयत्वञ्च तत्राद्योदाहरणम् टिड्ढाणञिति सूत्रेऽणो योऽकारइति व्याख्यानस्य फले चित्रायां जाता चित्रेत्यादौ जातार्थकस्याणो लुकि स्त्रीप्रत्य-

यस्यापि लुकि प्रत्ययलक्षणेनाणन्तत्वान्ङीम्न, प्रत्ययनिष्ठविशेषणतानिरूपितविशेष्यताश्रयत्वेन वर्णप्राधान्यात्, अन्त्योदाहरणं गोहितमित्यादावेचोऽयवायावइति सूत्र एच इतरपदार्थनिष्ठविशेष्यतानिरूपितविशेषणतानाश्रयत्वेनवर्णप्राधान्यादवादयो न, नन्वत्र न लुमतेति निषेधादेवादेशाभावसिद्धौ कथमेतस्यफलमुक्तमिति चेन्न लुप्तप्रत्ययनिमित्ताङ्गस्यकार्य्ये एव तेन निषेधात्, न च लुप्तप्रत्ययनिष्ठविषयतानिरूपिताङ्गनिष्ठविषयतानिरूपके कार्य्ये कर्त्तव्ये प्रत्ययलक्षणन्नेत्यर्थाद्गोहितमित्यत्रापर्य्याप्ताङ्गनिष्ठविषयतानिरूपकेऽवादेशे कर्त्तव्ये प्रत्ययलक्षण निषेधात्फलमयुक्तमिति वाच्यं लुप्तप्रत्ययाव्यवहितपूर्वत्वावच्छिन्नाङ्गत्वप्रतियोगिकपर्य्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगिताकपर्य्याप्तिविषयतानिरूपकङ्कार्य्यन्नेत्यर्थस्याङ्गीकारात् अतएवोत्क्रामेत्यादौ क्रमः परस्मैपदेष्विति दीर्घः सिद्धोऽन्यथा तत्रापि निषेधप्रवृत्तौ सद्दुर्लभः स्यात्, ननु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमित्यादिभाष्येण शब्दानां नित्यत्वाभ्युपगमादेचोऽयवायाव इत्यस्या-

जव्यवहितपूर्वत्वविशिष्टैज्घटितोच्चारणेच्छाधामया-दिघटितउच्चारणीयस्तेनैवार्थो बोद्धव्यःसएव साधु-रित्येवं बोधे गोहितमित्यादावपि लुप्तप्रत्ययाव्यव-हितपूर्वत्वावच्छिन्नाङ्गत्वपर्य्याप्तविषयताकं कार्य्यम-स्त्येवेति चेन्न गोधनावित्यादावौकाराव्यवहितपूर्व-त्वविशिष्टगोधनादिबुद्धिप्रसङ्गेऽवादिघटितबुद्धिवार-णायाचीत्यस्यैचोविशेषणत्वेनादोषात्, लुप्तप्रत्यया-व्यवहितपूर्वत्वेन साक्षादवच्छिन्नायाएवाङ्गत्वपर्य्याप्त-विषयतायाग्रहणाद् गोशब्दनिष्ठविषयताया लुप्तप्र-त्ययाव्यवहितपूर्वत्वेन साक्षादवच्छिन्नत्वाभावात्, नन्वेवं निर्ज्जरपुत्र इत्यादौ जरायाजसि सूत्रेऽजादि-विभक्तावित्यस्य निर्दिश्यमानविशेषणत्वेन लुप्तप्र-त्ययाव्यवहितपूर्वत्वेन साक्षादवच्छिन्ननिर्दिश्यमा-नजराशब्दनिष्ठायाअङ्गत्वपर्य्याप्तत्वाभावान्निषेधाप्र-वृत्तौ प्रत्ययलक्षणेन जरसादेशः स्यादिति चेन्न स्वाव्यवहितपूर्ववृत्तित्वेन साक्षादवच्छिन्नविषयता-निरूपकत्वस्वाव्यवहितपूर्वत्वावच्छिन्नाङ्गत्वपर्य्याप्त-विषयतानिरूपकत्व सम्बन्धाभ्यां लुप्तप्रत्ययविशिष्टं कार्य्यन्नेत्यर्थकरणेनादोषात्, अन्ये तु लुप्तप्रत्यय-

विशिष्टविषयताकं कार्य्यन्नेत्यर्थः वैशिष्ट्यञ्च स्वाऽव्यवहितपूर्वत्वेन साक्षादवच्छिन्नत्व स्वनिमित्ताङ्गसंज्ञानिरूपितपर्य्याप्तधर्मेण साक्षात्परम्परयावाऽवच्छिन्नत्व सम्बन्धाभ्याम् "एवञ्च न दोषः, ननु प्रत्ययलोपे प्रत्ययवादित्येवास्तु लक्षणग्रहणेनालमिति चेन्न प्रत्ययनिमित्तकमेव कार्य्यं भवेन्न तु प्रत्ययस्थानिकामिति बोधनार्थं तस्यावश्यकत्वात् तेन नखभिन्न इत्यादावैसादिकन्नेति नागेशभट्टः, नन्वत्र प्रत्ययोत्तरपदयोरिति सूत्रज्ञापितान्तरङ्गानपीति न्यायस्यान्तरङ्गनिमित्तविनाशकस्य लुकः प्राबल्ये प्रवृत्तेरभ्युपगमादप्रवृत्तावन्तरङ्गत्वात्पूर्वमैसादेशे प्रत्ययलक्षणेनापि तस्याप्रवृत्तौ फलकथनमसङ्गतमेवेति चेन्न सर्वस्याहितं सर्वाहितमित्यादावुक्तरीत्या पूर्वोक्तन्यायाप्रवृत्तौ कृते स्याटि सुब्लुक्यपि स्याटः श्रवणापत्तिः, केचित्तु प्रत्ययस्य लुगिति शास्त्रेण प्रत्ययत्वावच्छिन्नकर्म्मकादर्शनत्वस्यैव लुक्पदार्थतावच्छेदकतया सर्वाहितमित्यत्र स्याडागमे सति यदागमपरिभाषया विशिष्टस्यैव प्रत्ययत्वाल्लुङ्न्नप्राप्नुयादित्याहुस्तन्न सुपोधातुरित्यत्र

तदन्तविधिना सुबन्तस्य लुक्प्रसक्त्या निर्द्दिश्यमानपरिभाषाया अवश्याश्रयणीयतया पुनरप्युक्तदोषापत्तेः, लुक्पदमहिम्नैव तदन्तविधेर्न्निर्द्दिश्यमामानपरिभाषायाश्च बाधः स्वीक्रियत इत्यपि न तत्पदमहिम्ना संज्ञाशास्त्रे भूतपूर्वप्रत्ययग्रहणकल्पनाया एवोचितत्वात् शास्त्रबाधकल्पनापेक्षया तत्कल्पनाया एव न्याय्यत्वात् उच्चारणप्रसङ्गरूपषष्ठ्यर्थाभावादिति तु न युक्तं निर्ज्जरसावित्यादौ स्थानिवद्भावेन तद्बुद्धावपि उच्चारणप्रसङ्गरूपषष्ठ्यर्थाभावेन जरसादेशानापत्तेः ननु प्रत्ययोद्देश्यककार्य्यस्य प्रवृत्तावपि प्रत्ययस्थानिककार्य्यस्याभावेन नागेशग्रन्थोऽसङ्गत एवेति चेन्न अवकोकिलेनेत्यत्रावक्रुष्टः कोकिलयेति विग्रहेऽवादयः क्रुष्टाद्यर्थे इति समासे गोस्त्रियोरिति ह्रस्वविधानात्पूर्वमिनादेरप्रवृत्तौ कृतेतस्मिन्निनादेशापत्तेः, एकया खट्वया क्रीत इति विग्रहे तद्धितार्थेति समासे ठको लुकि लुक्तद्धितलुकीति स्त्रीप्रत्ययस्यलुकि प्रत्ययलक्षणेन भिस ऐसापत्तिश्च, टाङसिङसामित्यादीनामदन्तादृादीनामित्याद्यर्थंविहायादन्ताद्विहितानां टादीना

मित्यर्थमभ्युपगच्छतां यैस्तैरित्याद्यसिध्द्यापत्तेः, त्यदादीनामइत्यत्रापि वैषयिकसप्तम्यभ्युपगमे त्वनेषकेत्यादयो न सिध्येयुः, समासात्पूर्वं त्यदाद्यत्वे टाप्याप: सुप्परत्वाभावेनेत्वापत्तेरितिदिक्

उत्तरपदत्वे चापदादिविधौप्रतिषेधः, ।

उत्तरस्य पदत्वे उत्तरपदशब्दपरोऽत्रोत्तरशब्दः । पदैकदेशलोपात् एवं चोत्तरपदस्य पदत्वव्यपदेशे कर्त्तव्ये प्रत्ययलक्षणन्नेत्यर्थः, तेन परमवाचा गोदुहा श्वलिहेत्यादौ प्रत्ययलक्षणप्रतिषेधात्कुत्व घत्वढत्वादीनि नेति केचित्, नागेशभट्टस्तु उत्तरेति लुप्तषष्ठीकं पृथक्पदं तच्च बहुच्पूर्वस्यापदादिविधौ प्रतिषेध इति वार्त्तिकारम्भसामर्थ्यादुत्तरपदे लाक्षणिकं तस्य च समासचरमावयवे रूढत्वान्नार्द्र चर्म्मेत्यत्र प्रत्ययलक्षणप्रतिषेधः आर्द्रचर्म्मेत्यत्र नलोपस्तु समुदायोत्तरजायमान विभक्तिप्रयोज्यपदत्वानिमित्तकः, पदव्यवायेऽपीत्यत्र सप्तमीसमासाश्रयणेनातद्धित इति वार्त्तिकप्रत्याख्यानपरभाष्य प्रामाण्येनात्र पदत्वपदं तत्प्रयोज्ये कार्य्ये लाक्षणिकम् उत्तरपदनिष्ठोद्देश्यताके पदत्वप्रयोज्ये कार्य्ये कर्त्तव्ये प्र-

त्ययलक्षणन्नेत्यर्थस्तेन माषकुम्भवापेनेत्यत्र पदव्यवायेपीति णत्वनिषेधसिद्धिरित्यवोचत्, ननु पूर्वदण्डिप्रिय इत्यत्र नलोपसिद्धये स्वघटकप्रादिपदिकावधिकपूर्वत्व स्वघटकप्रातिपदिकावधिकोत्तरत्व संबन्धाभ्यां वृत्तिविशिष्टत्वरूपमध्यमपत्वानाक्रान्तत्वस्यैवोत्तरपदत्वं प्रकृते वृत्तिविशिष्टत्वेन मध्यमपदत्वात् सम्बन्धघटकपूर्वोत्तरत्वयोरव्यवहितोत्तरत्वेन विशेषणान्न परमक्रोम्निचरइत्यादौ दोषइति चेन्न यणादिपरमित्यादिनिर्द्देशेन यद्वृत्त्यारब्धकसुब्निमित्तकपदसंज्ञा चिकीर्षितातद्वृत्तिघटकार्थवदव्यवहितपूर्वत्वे सति तद्वृत्तिघटकाऽर्थवदव्यवहितोत्तरत्वस्यैव मध्यमपदत्वेन तत्त्वाभावात् प्रत्यङर्थकृतमित्यादौ ङमुटोऽभावाय यणादिपरमित्यादिनिर्द्देशेन पूर्वपदाघटकत्वविशिष्ट मध्यमपदत्वानाक्रान्तत्वस्यैवोत्तरपदत्वं वदन् माषकुम्भवापेनेत्यत्र कार्प्पित्वनिवेशफलं साधु मन्यमानो राघवेन्द्राचार्य्य उक्तवार्त्तिक प्रत्याख्यानेन फलभेदं निराचिकीर्षुरुक्तनिर्द्देशेन तत्पक्षेऽपि प्रत्यङर्थमित्यादौ ङमुडभावं कल्पयति, न चैवं कर्म्मधारयपूर्वपदके पर-

म दण्डिप्रियइत्यादिबहुव्रीहौ नलोपानापत्तिरिति वाच्यं परमदण्डीति समुदायगतपदत्वमादाय त-त्सिद्धेः, नन्वतद्धितइति वार्त्तिकं प्रत्याचक्षाणस्य पदे व्यवाय इति सप्तमीसमासं सूत्रे विधायार्द्रगोमयेणे-त्यादिप्रयोगं साधयतो भाष्यकृतः कार्य्यित्वानिवेशे माषः कुम्भः पो यस्येति त्रिपदबहुव्रीहावुत्तरपदत्वे चेतिनिषेधात्पदत्वाभावेन निषेधाप्रवृत्तौ णत्वे, कु-म्भेत्यस्योत्तरपदत्वाभावेन निषेधाप्रवृत्तौ प्रत्ययलक्ष-णेन पदत्वे पदव्यवायेऽपीति निषेधे च फलभेदं निराकुर्वद्भिर्ज्जनैरवश्यं पदपदं पदत्वयोग्यपरमुन्नेय मिति नात्र कार्य्यित्वनिवेशस्य फलमितिचेन्न पदत्वयोग्यत्वस्य दुर्वचत्वात्, न तावत्प्रातिपदिक संज्ञकत्वं पिवभवेति यस्यां क्रियायां पिवभवा, सुन्दरा पिवभवा येषां सुन्दरपिवभवानामित्यादौ पिवेत्यादेः प्रातिपदिकत्वाभावेन पदव्यवायेऽपी-ति निषेधानापत्तेः, एतेन पदसंज्ञासम्पादक सुब्वि ध्युद्देश्यतावच्छेदकाक्रान्तत्वमापितत्त्वं निरस्तं प्रा-तिपदिकत्वसुबन्तत्वैतदन्यतराश्रयत्वन्तु गौरव ग्रस्तमित्यपि सआह ॥ अन्ये तु कार्य्यित्वनिवेशा

भावे गोचेत्यादौ गतिकारकोपपदानामित्यस्यानि-
त्यत्वेन सुबुत्पत्त्यनन्तरसमासे स्थानिवत्त्वेनावङ्गा
पत्तिः पदेऽन्त इति सप्तमीसमासाश्रयणेनोत्तरपदत्वे
चेति निषेधाच्चेत्यस्य पदत्वाभावेन न पदान्तेति
निषेधस्य वक्तुमशक्यत्वादत्र पदपदस्य पदत्वयो-
ग्योपलक्षकत्वन्तु न युक्तमुक्तयुक्त्या तत्त्वस्य दुर्व-
चत्वादित्याहुः, वयन्तु स्वप्रयोजकसुब्विध्युद्देश्य-
तावच्छेदकाक्रान्तत्व स्वप्रयोजकप्रत्ययनिष्ठचरमा
वयवतानिरूपकत्वान्यतरसंसर्गेण पदविशिष्टत्वस्यैव
तत्त्वेन नोक्तयोः स्थलयोः कार्य्यित्वनिवेशफलमि-
ति ब्रूमः, यत्तु परमश्चासावटश्चेति परमाटस्तस्मादा-
चारक्किबन्तात्क्तिच्यल्लोपे परमाट्तिरित्यत्र प्रत्या-
ख्यानपक्षे नपदान्तेति निषेधस्येष्टत्वेन तेन सहैक्या-
यारम्भपक्षेऽपि न पदान्तेतिनिषेधाय वार्त्तिके कार्य्यि-
त्वनिवेशस्यावश्यकत्वात् एवं न अः, अनः सङ्गवा-
चचार अनाञ्चकारेत्यत्र निर्द्दिश्यमानपरिभाषयाऽ
कारमात्रस्य लोपे प्रत्याख्यानपक्षेऽसर्वनामस्थान
इति निषेधाभावेन पदत्वान्ङमुटइष्टत्वेन तेनैक्याया
रम्भपक्षेऽपि पदत्वात्प्राप्तस्य ङमुटोभावाय कार्य्यित्व

निवेशस्यावश्यकत्वादित्युक्तं तन्न लेढीति विग्रहइगुपधलक्षणे के परमश्चासौ लिहश्चेति कर्म्मधारये परमलिहशब्दादाचारक्किबन्ताल्लिपि परमलिहेत्यत्रारम्भप्रत्याख्यानयोः फलभेदाभावायासर्वनामस्थाने यचीत्यत्र सर्वनामस्थानपदस्य स्वाद्यतिरिक्तप्रत्ययमात्रपरत्वेन तत्र प्रत्याख्यानपक्षेऽपि पदत्वस्य वक्तुमशक्यत्वात्, ये तु परमहरे गच्छसीत्यत्र कार्य्यित्वनिवेशादेवोत्तरपदत्वे चेति निषेधाभावेन प्रत्ययलक्षणेन पदत्वात्तिङ्ङतिङइति निघातस्वरसिद्धिरित्यवोचन् तेऽतीवमन्दाः समुदायगतपदत्वमादायापि तत्सिद्धेः, नन्वेवं कार्य्यित्वनिवेशो व्यर्थएवेति चेदत्रोच्यते, याजभवतीत्यत्र याजयोः समासे याजइवाचर याज, आचारक्किबन्तात्लस्थानिकस्य हेरतो हेरिति लुकि ततः परस्य भवतीत्यस्य निघातस्वरे कर्त्तव्येऽजस्यपदत्वान्निघातसिद्धिः कार्य्यित्वानिवेशे सानस्यात्, प्रातिपदिकादेव क्किपो विधानेन समुदायस्य सुब्निमित्तकपदत्वाभावात्, तिङ्निमित्तकपदत्वस्य तु प्रकृतावनुपयोगित्वात्, तत्र पदपदस्य पदत्वयोग्यपरत्वे यामजतीतिकर्म्मण्यण्युपपदसमा-

से याजशब्दादाचारक्किवन्ताद्धेर्ड्ढंकि पदत्वयोग्यत्व सत्त्वात्ततः परस्य भवतीत्यस्य निघानापत्तेः, सूक्ष्म दर्शिनस्तु अत्र कार्य्यित्वनिवेशाभावे परमदण्डिना वित्यादावुत्तरपदत्वे चेति निषेधात्पदत्वाभावेन स्व तो ङमोह्रस्वादचीत्यस्याप्रवृत्तौ ङमुटोऽभावायाजा देः पदस्येत्यर्थस्य वक्तुमशक्यत्वात् प्रत्यङ्ङैदित्या दौ ङमुटः सिद्धिः, तन्निवेशे तूत्तरपदत्वइत्यनेन निषेधाभावेनोञ्चि च पदइत्यतः पदइत्यस्यानुवृत्तौ प्रकृतेऽक्चस्तन्मध्यपातितत्वाभावेन तेन पदत्वाला भान्ङमुड्नस्यादित्याहुः। ननु कार्य्यित्वानिवेशे परमा-द्रिूतःअनाञ्चकारेत्यत्रोक्तयुक्त्याष्टुत्वङमुडभावौ न स्याताम् उत्तरपदत्वेचेति प्रत्ययलक्षणप्रतिषेधादिति चेन्नाद्येऽनामिति पर्य्युदासेन नामशब्दावयवभिन्न नामशब्दावयवसदृशस्यैव ष्टुत्वविधानात्तिजवयव-भिन्नत्वेन सादृश्यात् द्वितीये ऽजादेः पदस्य ङमु-डित्यर्थेनादोषात्, केचित्तूक्तवार्त्तिके कार्य्यित्वनिवे शे परमकविरिवाचरति परमकवयतीत्यादावेङः पदा न्तादिति पूर्वरूपापत्तिः, प्रत्याख्यानपक्षे तु स्वाद्यति रिक्तेप्रत्यये पूर्वस्य पदत्वनिषेधान्न पूर्वरूपादेः सम्भ

व इत्याहुः। यत्तु कार्य्यित्वानिवेशे सन्नन्त इत्यत्र इमुडनापत्तिरित्युक्तं तन्न तत्र नित्यग्रहणस्य व्यवस्थितनित्यत्वबोधनार्थत्वरूपविस्पष्टार्थत्वेनेकोयणचीत्यादिनिर्द्देशेन ङमनुबन्धाव्यवहितोत्तरजायमानस्याजादिपदस्याचो ङमुडिति व्यवस्थाया एव वक्तव्यत्वेनात्र ङमुडभावस्यैव वक्तुं शक्यत्वात्। अतएव यङन्त इत्यत्र न, वस्तुतस्तु सुगण्णीश इत्यादिषु ङमुटो दर्शनेन कार्य्यित्वानिवेशस्यैवेष्टत्वात्। ननु मघोरपत्यानि मघव इत्यत्राणो लुकि प्रत्ययलक्षणेन पदत्वादेङः पदान्तादिति पूर्वरूपापत्तिः, उत्तरपदशब्दस्य समासचरमावयवे रूढत्वेन वार्त्तिके न प्रत्ययलक्षणनिषेधाप्रवृत्तेः, एतद्वार्त्तिकप्रत्याख्यानेतु सर्वनामस्थाने यचीति योगेनाजादावसि पदत्वनिषेधान्न पूर्वरूपप्रवृत्तिरित्यारम्भप्रत्याख्यानयोः फलभेदः, एवमत्रयोऽङ्गिरस इत्यादावपि वार्त्तिकसत्त्वे पूर्वरूपत्वे स्यातामिष्यते च तयोरभाव एवेति चेन्न उत्तरपदशब्देन वृत्तिचरमावयवस्यैव ग्रहणादत्रापि तद्धितरूपाया वृत्तेः सम्भवान्न तयोः फलभेदः, ननु पञ्चानां गवां समाहारः पञ्चगवमित्यत्र गोस्तद्धि

तद्धकीति टचः समासान्तत्वेनावयवत्वाद्गोशब्द-
स्य वृत्तिनिरूपितचरमावयवत्वाभावेन प्रत्ययलक्षणे
न पदान्तत्वादवङापत्तिः, न च पदान्त इत्यत्र प-
देऽन्त इति समासेनादोषः एतेनावङोऽकारस्य य-
स्येतिचेति लोपेनावङि दोषाभावेऽपि तदभावे पूर्व
रूपाद्यापत्तिदोषतादवस्थ्यमिति परास्तमिति वाच्यं
पञ्चगवमित्यत्र लोपः शाकल्यस्येतिवलोपापत्तेर्दु
र्वारत्वादिति चेन्न वृत्तिघटकार्थवन्निरूपितपूर्वत्वा-
भाववत्त्वस्यैवोत्तरपदत्वात्, पञ्चगवधन इत्यत्र दो
षवारणाय वृत्तिघटकार्थवन्निरूपिताव्यवहितपूर्वत्वा
भाववत्त्वस्यैवतत्त्वाभ्युपगमात्, नन्वेवं राजत्यादौ
नलोपानापत्तिरितिचेन्न उक्तलक्षणे वृत्तिघटकत्वे
सतीति विशेषणदानेनादोषात् नन्वेवमप्यतिराजेत्य
त्र नलोपो न स्यादिति चेन्न प्रत्यासत्त्योत्तरपद
प्रकृतिकप्रत्ययप्रयोज्यप्रत्ययलक्षणस्यैवानेन निषेधेन
समुदायोत्तरजायमानविभक्त्यैव पदत्वासिद्धेः, अथ
परमलोम्निचरः, दधिसेचिशयः परमवाचिशय इ-
त्यादौ वृत्तिघटकार्थवदिकारनिरूपितपूर्वत्वेन निरु-
क्तोत्तरपदत्वाभावेन नलोपकुत्वे स्याताम् न च

वृत्तिघटकार्थवन्निष्ठोद्देश्यतानिरूपितविधेयताश्रयभि न्नाऽव्यवहित पूर्वत्वाभाववत्त्वस्यैवोत्तरपदत्वान्नदो षइति वाच्यं परमदण्डिबहुपाचक इत्यत्र पाचकनि ष्ठोद्देश्यतानिरूपित विधेयताश्रय बहुज्भिन्नोदासी नाव्यवहितपूर्वत्वाभाववत्त्वेनोत्तरपदत्वापत्त्या परम दण्डिनो नस्य लोपानापत्तेः, न चात्र परत्वावच्छि न्न विधेयतायाग्रहणे, न दोष इति शङ्क्यं दण्डीय तीत्यादौ प्रत्ययलक्षणनिषेधेन नलोपो न स्यात्, न च नः क्य इति पदत्वेन निर्वाहोऽत्र तादृशपद त्वेन नलोपसाधनेऽपि राजकाम्यतीत्यत्र प्रदर्शितो त्तरपदत्वसमन्वयेन न लोपानापत्तेरितिचेदुच्यते, स्ववृत्तित्व स्वघटकेत्तरवृत्तित्व सम्बन्धाभ्यां स्व- विशिष्टोद्देश्यतानिरूपित विधेयताश्रयभिन्नाव्यवहि तपूर्वत्वाभाववत्त्वमेवोत्तरपदत्वम् राजकाम्यतीत्य- त्र काम्यज् निष्ठविधेयतानिरूपितोद्देश्यताया रा- जन् घटकेतरावृत्तित्वेन स्वविशिष्टत्वाभावात् ति- निष्ठविधेयतानिरूपितोद्देश्यताया राजवृत्तित्वात्तद् घटकेतरकाम्यज्वृत्तित्वाच्च स्वविशिष्टत्वेन तन्निरू- पितविधेयताश्रयातिभिन्नकाम्यजव्यवहितपूर्वत्वेनानु-

त्तरपदत्वात्, दण्डीयतीत्यत्रापि निरुक्तोत्तरपदत्वाभावेन प्रत्ययलक्षणेनैवपदत्वे सिद्धे नः क्यइति नियमार्थं तेन गव्यतीत्यादौ न लोपः, स्वपदेन यस्योत्तरपदत्वं चिकीर्षितं तदेव; पूर्वदाण्डिबहुपाचक इत्यत्रोत्तरपदत्वेनाभिमतं पूर्वदाण्डिन्निति तद्विशिष्टाया उद्देश्यताया अभावेन बहुचःस्वविशिष्टोद्देश्यतानिरूपितविधेयताश्रयभिन्नत्वेन तदव्यवहितपूर्वत्वेन तस्योत्तरपदत्वाभावान्नलोपसिद्धिः, परमलोम्निचर इत्यादाविकारनिरूपिताया लोपनिष्ठाया उद्देश्यतायाः स्वघटकेत्तरपरमवृत्तित्वात्, स्वविशिष्टत्वेन तन्निरूपितविधेयताश्रयङिभिन्नाव्यवहितपूर्वत्वाभावेनोत्तरपदत्वान्निषेधः, उद्देश्यता चापर्य्याप्त्या गृह्यते, एवं स्थिते कार्य्यित्वनिवेशो मध्यमपदत्वानाक्रान्तेति विशेषणं मास्तु माषकुम्भवापेनेत्यत्र तादृशविधेयताश्रयभिन्न वापाव्यवहितपूर्वत्वेनोत्तरपदत्वाभावात्, पूर्वदण्डिप्रिय इत्यत्र स्वविशिष्टोद्देश्यतानिरूपित विधेयताश्रयभिन्न प्रियाव्यवहितपूर्वत्वेनोत्तरपदत्वाभावात्, नन्वेवं मघव इत्यत्र जस्निष्ठविधेयतानिरूपितोद्देश्यतायाः स्ववृत्तित्वेऽपि स्व

घटकेतरवृत्तित्वाभावेन स्वविशिष्टत्वाभावात्, स्ववि-
शिष्टोद्देश्यतानिरूपितविधेयताश्रयभिन्नजसव्यवहि
त पूर्वत्वेनोत्तरपदत्वाभावात्प्रत्ययलक्षणेन पदत्वा
त्पूर्वरूपापत्तिः, अणमादाय कथञ्चिदुत्तरपदत्वस
त्त्वेऽपि राजकाम्यतीत्यत्र स्वघटकेतरावृत्तित्वेन स्व
निष्ठोद्देश्यतानिरूपित विधेयताश्रयत्वस्य काम्यचि
सत्त्वेनोत्तरपदत्वं स्यात्, ननूत्तरपदत्वेनाभिमतं य
त्तद्वृत्तिसुप्त्वानवच्छिन्नोद्देश्यतानिरूपित विधेय
ताश्रयभिन्नाव्यवहितपूर्वत्वाभाववत्त्वमेवोत्तरपदत्व-
मस्तु राजकाम्यतीत्यत्र काम्यज्निष्ठविधयतानिरूपि-
तोद्देश्यतायाः सुप्त्वानवच्छिन्नत्वाभावेन न दोषः,
परमलोम्निचर इत्यत्रापि सुप्त्वानवच्छिन्नोद्देश्यता
निरूपितविधेयताश्रयाङ्भिन्नाव्यवहितपूर्वत्वाभाव
वत्त्वेनोत्तरपदत्वात्, मधव इत्यादौ सुप्त्वानवच्छि-
न्नोद्देश्यतानिरूपितविधेयताश्रयजस्भिन्नघटादि-
निरूपिताव्यवहितपूर्वत्वाभाववत्त्वेन तत्त्वान्निषेध-
सिद्धिः, राजेत्यादौ निषेधापत्तिस्तु न सुपोधातवि
ति लुकः प्रत्ययलक्षणस्यैव टेन निषेधाभ्युपगमात्,
एवं च कार्य्यित्वनिवेशो मध्यमपदत्वानाक्रान्तत्व

मिति च मास्त्विति चेन्न बहुदण्डिका, बहुचर्म्मिके त्यादौ सुप्त्वानवच्छिन्नोद्देश्यतानिरूपितविधेयताश्रय कविभिन्नोदासीनाऽव्यवहितपूर्वत्वाभाववत्त्वेनोत्त रपदत्वान्नलोपानापत्तेः, न च विधेयताया अवयव-त्वानवच्छिन्नत्वेन विशेषणत्वान्न दोष इतिवाच्यं पञ्चगवमित्यादौ नलोपापत्तेः, न च बहुदण्डिके-त्यादौ स्वादिष्विति पदत्वेन न दोषः तेन तदादेः पदत्वविधानेऽपि तस्य प्रातिपदिकत्वा-भावात्, कपः समासान्तत्वेनागमत्वात्तद्विशिष्ट-स्यैव प्रातिपदिकत्वात्, न च प्रातिपदिकावय-वो यः पदान्तो नस्तस्य लोप इत्यर्थेनादोष इति वाच्यं पचेरन् यजेरन् ययोऽर्यापारयोः पचेरन् यजे रानावित्यत्र नलोपापत्तेः, अत्र केचित् वृत्तिविशि ष्टत्वमुत्तरपदत्वं वैशिष्ट्यञ्च स्वघटकत्व स्वोत्तरभ संज्ञाप्रयोजकप्रत्ययभिन्नप्रत्ययनिरूपितपूर्वत्वाभाव-वत्त्व सम्बन्धाभ्यां बहुदण्डिकेत्यादौ स्वोत्तरभसंज्ञा-प्रयोजकप्रत्ययभिन्नकप्रत्ययनिरूपितपूर्वत्वेनोत्तरपद त्वाभावादित्याहु स्तदपिन परमलिह्वेत्यादौ वनिपो भसंज्ञाप्रयोजकप्रत्ययभिन्नत्वेन प्रत्ययलक्षणेन पद-

त्वाद्धत्वापत्तेः, येऽप्युक्तसम्बन्धस्थाने मघव इत्यादि-सिद्धये स्वोत्तराजादिप्रत्ययभिन्नप्रत्ययनिरूपितपूर्व-त्वाभाववत्त्वमित्यूचुस्तउक्तप्रयोगासिद्ध्यैव परास्ताः, वयन्तु वृत्तिविशिष्टत्वं तत्त्वं वैशिष्ट्यञ्च स्वघटक-त्व स्वविशिष्टपदानिरूपिताऽव्यवहितपूर्वत्वाभाववत्त्व सम्बन्धाभ्यां, सम्बन्धघटकवैशिष्ट्यञ्च स्व.निष्ठोद्दे-श्यतानिरूपितविधेयताश्रयाभिन्नत्व स्वनिष्ठोद्देश्यता-निरूपितावयवत्वावच्छिन्नाजादि प्रत्ययनिष्ठविधेय-ताश्रयभिन्नत्व सम्बन्धाभ्यां, पदं च शक्तमेव गृह्यते प्रथमसम्बन्धनिवेशान्न मघव इत्यादौ दोषः, अजा-दिप्रत्ययपदनिवेशाद्बहुदण्डिकेत्यादौ नलोपसि-द्धिः, परमलिङ्केत्यादौ सम्बन्धघटकद्वितीयसम्बन्ध-सत्त्वेऽप्युभयसम्बन्धेन तादृशविधेयताश्रयभिन्नोदासी-नपदाऽव्यवहितपूर्वत्वाभाववत्त्वेनदोषाभावादितिब्रूमः॥

प्रातिपदिकार्थलिङ्गपरिमाण वचनमात्रेप्रथमा,

प्रातिपदिकनिष्ठशक्तिनिरूपकोऽर्थः प्रातिपदिकार्थः, सच स्वार्थो जातिरूपः अनेकव्यक्तीनां वाच्यत्वे गौरवाल्लाघवेनतस्यैव वाच्यतौचित्यात ननु व्रीही

तवहन्ति, पशुमालभेत, गामानय, ब्राह्मणोनहन्त-
व्य इत्यादिवाक्यानामनुपपत्तिः, नह्याकृतिरवहन्तु
मालब्धुमानेतुं वाशक्यतेनित्यत्वादमूर्त्तत्वाच्चेतिचे-
न्न सामान्यस्योपलक्षणत्वात् येयमाकृतिकासागौ-
रिति सामान्यमुपक्षणीकृत्य शब्दार्थशिक्षा योयं शु
क्लवासाः सदेवदत्तइतिवत्, स्वाश्रयत्वसंसर्गेण वा व्य
क्तेरेवानयनादेः सम्भवात्, नह्याकृतिपदार्थस्य द्रव्यंन
पदार्थ इति भाष्याज्जातिद्रव्ययोरेव वाच्यत्वात्,
शक्तिज्ञाने विषयतयाऽवच्छेदकं जातिरूपमेकमुपल-
क्षणं कृत्वेत्यर्थादानन्त्येऽपि हि भावानामेकं कृत्वोप-
लक्षणमित्यनेनाप्यविरोधात्, वागादिशब्दाट्टाबादि
समभिव्याहारमन्तरेणापि स्त्रीत्वप्रतीतेर्लिङ्गमपीति
प्राञ्चः, नव्यास्तु संख्याकारकञ्च, अतएव स्वा-
र्थोद्रव्यं च लिङ्गञ्च संख्याकर्म्मादिरेवच अमी प-
ञ्चैवनामार्थास्त्रयः केषां चिदग्रिमा इति शाब्दिका
नां कारिकापि सङ्गच्छते, ननु संख्याकारकयोः
प्रातिपदिकार्थत्वेकिम्मान मितिचेच्छृणु यथाटाबा-
दिसमभिव्याहारं विनापि वागादिशब्देन लिङ्ग-
भानदर्शनात्तत्समभिव्याहारेऽपि रमादिशब्दजन्य-

बोधेप्रकृत्यर्थे विशेषणतया लिङ्गभानाच्च लिङ्गे प्रातिपदिकशक्तिः कल्प्यते, तथा दधिपश्यतीत्यादौ विभक्तिमन्तरेण कारकादेवबोधदर्शनात्, घटोस्तीत्यादौ तत्समभिव्याहारे प्रत्ययार्थेविशेषणतया भानदर्शनाच्च संख्यादेस्तदर्थत्व कल्पनं, संख्यादेः प्रत्ययार्थत्वे तु घटोऽस्तीत्यादौ प्रकृत्यर्थे विशेषणतयैव भानस्यावश्याभ्युपगन्तव्यतया प्रत्ययार्थप्राधान्यनियमभङ्गापत्तिश्च, तदतिरिक्तत्वेनसङ्कोचेतु तदपि गौरवमापद्येत, अस्माकन्तु द्योत्यार्थस्य विशेषणतैवेति नियमस्य सत्त्वेन नियमभङ्गविचारोनेत्याहुः; प्रातिपदिकार्थमारभ्य वचनान्तानामितरेतरयोगद्वन्द्वंविधाय विभाषाधिकारान्मयूरव्यंसकादयश्चेत्यस्यवैकल्पिकत्वेऽप्यन्तरमात्रशब्दयोर्नियतवृत्तिविषयकत्वेनात्रमात्रशब्देन सह नित्यसमासमभिप्रेत्य प्रातिपदिकार्थादीन्येवतन्मात्रमित्येवकारेणास्वपदविग्रहो मयूरव्यंसकादित्वात्समास इत्यवोचन्मनोरमाकारः सङ्केतश्च मात्रशब्दस्येतरस्मिन् योगेव्यवच्छेदेच, इतरस्य च भेदे आश्रये च शक्तिः प्रातिपदिकार्थस्य प्रतियोगितयाभेदेऽन्वयस्तस्य स्व

रूपेणाश्रये, योगः सम्बन्धः सचात्र विषयतानिरूपकबोधजनकत्वरूपः, आश्रयस्य प्रतियोगितया सम्बन्धे, व्यवच्छेदोऽभावस्तस्मिन् स्वनिष्ठप्रतियोगिताकत्वेन सम्बन्धस्य, तस्य स्वरूपेण प्रातिपदिके, इतरयोगव्यवच्छेदे च न सङ्केतः सर्वत्रभेदाश्रयसम्बन्धस्यैव सत्त्वेन तदभावस्याप्रसिद्धेः, नापीतरयोगे व्यवच्छेदेच विनिगमनाविरहेणेतरयोगत्ववि-शिष्टाभावत्वस्याभावत्वविशिष्टेतरयोगत्वस्यच शक्यतावच्छेदकत्वे गौरवात्, तस्य च प्रत्येकं योगः नीवह्योर्न्नेतिवार्त्तिकात्साहित्येद्वन्द्वविधानाच्च द्वन्द्वान्ते द्वन्द्वादौ वा श्रूयमाणस्य पदस्य प्रत्येकं सम्बन्धात्, तथाच प्रातिपदिकार्थप्रतियोगिकभेदाश्रयनिष्ठविषयतानिरूपक बोधजनकत्वरूपसम्बन्धनिष्ठ प्रतियोगिताका भाववत्प्रातिपदिकात्प्रथमेत्यर्थः, नन्वेवमनेकघटतात्पर्य्येण घटाइत्यादौ प्रथमानस्यात् तद्व्यक्तिभेदमादाय भेदाश्रयप्रतियोगिकाभावव-त्त्वविरहादितिचेन्न प्रातिपदिकार्थतावच्छेदकावच्छिन्नप्रतियोगिताक भेदग्रहणेनादोषात् नच प्रमे

यत्वावच्छिन्न प्रतियोगिताकभेदस्याप्रसिद्धत्वेन प्र- मेयशब्दात्प्रथमानस्या दितिवाच्यम् अप्रसिद्धप्र- तियोगिकाभावस्यापिवैयाकरणमते स्वीकारेणादो- षात्, वस्तुतः सर्वत्राभावोऽप्रसिद्धप्रतियोगिकएव यद्यत्र भूतले घटोनास्ती त्यत्रैतद्भूतलवृत्तिघटकर्तृ- कसत्ताऽभावइति बोधस्त स्यैतद्भूतलवृत्तिघटकर्तृ- कसत्ताया असत्त्वेनतत्प्रतियोगिकाभावस्याप्यप्रसिद्ध प्रतियोगिकत्वात्। अन्येतु स्वनिष्ठशक्ति ज्ञानाधीनो- पस्थितिप्रयोज्यत्व स्वनिष्ठशक्ति ज्ञानाधीनोपस्थि- ति प्रयोज्य शाब्दबो धीयत्व सम्बन्धाभ्यां प्रातिपदि- क विशिष्टनिरवच्छिन्न विषयता प्रतियोगिकभेदव- न्निरवच्छिन्नविषयत्वाप्रयोजकात्प्रातिपदिकात्प्रथमे- त्यर्थमभ्युपगम्य प्रमेयत्वनिष्ठनिरवच्छिन्नविषयता प्र तियोगिकभेदो घटत्वनिष्ठ विषयतायां सत्त्वात्तादृश- भेदाश्रयवृत्तिनिरवच्छिन्नविषयत्वाप्रयोजकात्प्रमेया- देःप्रथमा। प्रमेयवानित्यादौ प्रमेयनिष्ठविषयतायां स- म्बन्धद्वयसत्त्वेऽपि निरवच्छिन्नविषयत्वविरहादिति वदन्ति, परेतु स्वार्थविषयकबोधजनकत्वस्वाभाव- वत्त्व सम्बन्धाभ्यां प्रातिपदिकविशिष्टप्रातिपदिका-

त्प्रथमेत्यर्थः, अभावीयप्रतियोगितावच्छेदकः सम्बन्धश्च स्वार्थप्रतियोगिक भेदवद्विषयकबोधनिष्ठजन्यतानिरूपितजनकत्वरूपः, प्रमेयादेरुक्तसम्बन्धस्याप्रसिद्धत्वेन तादृशाप्रसिद्ध सम्बन्धावच्छिन्नप्रतियोगिताकाभाववत्त्वसत्त्वात्प्रथमा सिद्धेति ब्रुवन्ति, अथ वीरः पुरुषइत्यादौ समानाधिकरण्याद्विशेषण विशेष्य भावस्याधिकस्य प्रतीतौ प्रथमा न प्राप्नोतीत्याशङ्क्य तस्य वाक्यार्थत्वेन दोषं परिहृत्य तिङ्कृत्तद्धितसमासैरभिहिते प्रथमेति पक्षान्तरेणापि समाधाय वृक्षइत्यादिष्वध्याहृताया अस्ति क्रियायाः सत्त्वेन दोषाभावेऽपि प्रासादआस्तइत्यत्र प्रथमाप्राप्तिमुद्भाव्य तिङ्समानाधिकरणे प्रथमेति समाहितं भाष्यं पर्य्यालोच्यावोचत भाष्यवित् "इदमपि सूत्रंक्रिया योगएव प्रवर्त्ततइति" तस्य क्रिया निष्ठ विशेष्यतानिरूपितप्रकारता प्रयोजकात्प्रथमेत्यर्थेराहोः शिर इत्यत्र राहुशिरसोरैक्येन राहुपदादपि सा दुर्वारैव, नापि क्रिया निष्ठविशेष्यतानिरूपित साक्षात्प्रकारताप्रयोजकात्प्रथमेत्यर्थः घटोऽस्तीत्यादौ सत्तानिष्ठविशेष्यतानिरूपितसाक्षात्प्रकारता

प्रयोजकत्वस्य तिवर्थएवसत्त्वेन तदनापत्तेः, । अत्र केचित् क्रियानिष्ठविशेष्यतानिरूपिताधेयत्वसम्बन्धावच्छिन्न प्रकारतावच्छेदकीभूताश्रयत्वावच्छिन्न विशेष्यतानिरूपितसाक्षात्प्रकारताप्रयोजकात्प्रथमे--त्यर्थाद्राहुपदस्य तथात्वविरहेण न प्रथमा, यद्यपि नीलोघटोऽस्तीत्यादौ तादृशप्रकारताप्रयोजकत्वस्य घट एव सत्त्वेन तत एव भवेन्न नीलपदात्तथापि कटं भीष्मं कुर्विवितिवन्नीलपदार्थस्यापि क्रियायां साक्षादेव धर्म्मिपारतन्त्र्येणान्वयात्प्रथमोपपत्तिरित्याहुः, । अन्येतु क्रियानिष्ठविशेष्यतानिरूपिताधेयत्वसम्बन्धावच्छिन्नप्रकारतासमानाधिकरणप्रकारताप्रयोजकात्प्रथमेत्यर्थान्नीलोघटोऽस्तीत्यादौ नीलादेरपि प्रकारतासामानाधिकरण्ये नादोषात् प्रकारतायां संसर्गावच्छिन्नत्वस्यापिनिवेशान्न राहोः शिर इत्यत्र राहोस्तदापत्तिरितिवदन्ति, । परेतु क्रियानिष्ठविशेष्यतानिरूपिताधेयत्वसम्बन्धावच्छिन्नप्रकारतासमानाधिकरणविशेष्यतया साक्षात्परम्परया संसर्गावच्छिन्नप्रकारताप्रयोजकात्प्रथमेत्यर्था न्नीलोघटोऽस्तीत्यादावाश्रयत्वावच्छिन्न प्रकारता समानाधि-

करणाश्रयनिष्ठविशेष्यतया परम्पराप्रकारतानीलेस त्वात्ततः प्रथमा सिद्धेति ब्रुवन्ति ननु लिङ्ग-स्यापि प्रातिपदिकार्थत्वात्तेनैव निर्वाहे तदुपादानं व्यर्थमेवेतिचेन्न नियतोपस्थितिकस्यैव प्रातिपदि-कार्थत्वात् नियताउपस्थितिर्यस्येति विग्रहः, व्या-पकत्वविशिष्टोपस्थितिनिरूपित विषयताश्रयोऽर्थ-स्समासार्थः, यद्विषयकोपस्थितिर्व्यापकत्वविशिष्टे-ति विग्रहार्थः, यस्मिन् प्रातिपदिके उच्चारिते यस्या र्थस्य नियमेनोपस्थितिः स तदर्थइति नागेशः, स-प्तम्यर्थो निरूपितत्वं, षष्ठ्यर्थो विषयत्वं, नियच्छते र्व्यापकत्वमर्थः, इत्थंभूतलक्षणइत्यनेन विहिताया स्तृतीयाया वैशिष्ट्यमर्थः, तच्च स्वरूपसम्बन्धेन, सप्तम्यन्तयत्पदार्थस्योच्चारितत्पदार्थेऽभेदनान्वयस्त स्याभेदेन प्रातिपदिकपदार्थे, तस्य सप्तम्यर्थनि रूपितत्वेन व्यापकत्वपदार्थे, तस्य स्वरूपणोपस्थि-तौ, यत्पदार्थस्य वृत्तित्वेन षष्ट्यर्थविषयत्वे, तस्य निरूपितत्वेनोपस्थितौ, यदभिन्नोच्चारिताभिन्न प्रा-तिपदिकनिरूपितव्यापकत्वविशिष्टा यन्निष्ठविषय-तानिरूपकोपस्थितिः सतदर्थः, व्यापकत्वञ्च स्वस

मानाधिकरणात्यन्ताभावाप्रतियोगित्वं तस्य च व्याप्यत्वांशे नित्यसाकाङ्क्षत्वाद्व्याप्यतानिरूपिताया व्यापकतायाग्रहणात्, व्याप्यत्वं च स्वाभावाधिकरणनिरूपितवृत्तित्वाभाववत्त्वम् आश्रयत्वं क्तप्रत्ययार्थः, तत्र स्वरूपेणविषयताया अन्वयः, तथा च यदभिन्नोच्चारिताभिन्नप्रातिपदिकनिष्ठव्याप्यतानिरूपितव्यापकता वदुपस्थितिनिरूपित विषयताश्रयोऽर्थइति फलितोऽर्थः, न च घटस्य समवायेनाकाशनिष्ठतयोपस्थितेरात्मनिष्ठतया चोभयोः सामानाधिकरण्यविरहादुपस्थितेर्व्यापकता वक्तुमशक्येति वाच्यं स्वविषयकश्रावणप्रत्यक्षसमवायित्व सम्बन्धावच्छिन्नव्याप्यतायाः प्रातिपदिकनिष्ठाया अभ्युपगमेनात्मनि तत्सम्बन्धेन घटपदस्य घटत्वावच्छिन्नविषयकोपस्थितेश्च सत्त्वेनादोषात्, नापि प्रतिबन्धकवशादुपस्थित्यभाववत्यात्मनि निरुक्तसम्बन्धेन पदस्य सत्त्वमुपस्थितेश्चासत्त्वं वक्तुं शक्यं स्वजन्योपस्थिति सामानाधिकरण्यस्यापि संसर्गांशे निवेशनीयत्वात्, न च पुनर्लिङ्गग्रहणं व्यर्थं, तटादिशब्दानां लिङ्गत्वोपलक्षितधर्मावच्छिन्ने त-

टत्वाद्यवच्छिन्ने च शक्तेः सत्त्वेन लिङ्गत्वोपलक्षित धर्म्मावच्छिन्नस्तटत्वाद्यवच्छिन्नश्च तटादिपदशक्य इत्याकारकसमूहालम्बनात्मकशक्तिज्ञानसम्भवे न ताहृशशक्तिज्ञानोत्तरं पुंस्त्वत्वावच्छिन्नः स्त्रीत्वत्वावच्छिन्नः क्लीबत्वत्वावच्छिन्नस्तटादिपदशक्यइत्याकारकशक्तिज्ञानस्यैव सम्भवात्ततो लिङ्गत्रयादिविषयकोपस्थितेरेव सम्भवेन लिङ्गादिविषयकोपस्थितेरपि तटादिपदव्यापकत्वापत्त्या तामुपस्थितिमादाय लिङ्गस्यापि प्रातिपदिकार्थत्वं स्यादिति वाच्यं लिङ्गग्रहणसामर्थ्यादेवोपस्थितिशब्दस्य शाब्दबोधपरत्वात्, शाब्दबोधस्य न तटादिपदव्यापकत्वं तत्र तात्पर्य्यज्ञानस्य कारणतया सर्वलिङ्गविषयकबोधस्यैकशब्दादेकदाऽसम्भवेन पुंस्त्वविषयकबोधेच्छयोच्चरिततटादिपदाद्यधिकरणे स्त्रीत्वविषयकबोधस्य, स्त्रीत्वविषयकबोधेच्छयोच्चरिततटादिपदाद्यधिकरणे पुंस्त्वविषयकबोधस्याभावात् सर्वस्यबोधस्याभावप्रतियोगित्वान्न बोधस्य व्यापकत्वापत्तिः, न च तटादिपदजन्यलिङ्गविषयकबोधस्य व्यापकत्वाभावात्तट तटत्वसमवायादीनामपि प्रातिपदिकार्थत्वं न स्यात्तटा

दिपदजन्यशब्दबोधे तटादिपदनिरूपितव्यापकत्वाभावादितिवाच्यं तटादिपदाद्यधिकरणे आत्मनि, तटत्वावच्छिन्नविषयकबोधो नास्तीत्याकारकाभावस्य वक्तुमशक्यतयातटादिपदजन्य तटत्वावच्छिन्नविषयकबोधे व्यापकत्वस्य सौलभ्यात्तटादेः प्रातिपदिकार्थत्वं सुलभम् ॥ न चोपस्थितिशब्दस्य शाब्दबोधपरत्वे शाब्दबोधे तात्पर्य्यज्ञानस्य कारणतया तात्पर्य्यज्ञानाभाववति श्रोतुरात्मनि निरुक्तसम्बन्धेनोच्चरितप्रातिपदिकस्य सत्त्वेन शाब्दबोधस्य च तत्रासत्त्वेन तटत्वाद्यवच्छिन्नविषयकत्वेनापि शाब्दबोधे उच्चरितप्रातिपदिकनिरूपितव्यापकत्वस्य वक्तुमशक्यतया तटत्वादीनां प्रातिपदिकार्थत्वं न स्यादतो व्याप्यतावच्छेदकसम्बन्धांशे स्वविशेष्यकतात्पर्य्यज्ञानसामानाधिकरण्यस्यावश्यनिवेशनीयतया स्त्रीत्वत्वावच्छिन्नविषयकबोधजनकत्वप्रकारकतात्पर्य्येणोच्चारितप्रातिपदिकव्यापकत्वस्य तटत्वाद्यवच्छिन्नविषयकबोधे स्त्रीत्वत्वाद्यवच्छिन्नविषयकत्वेनापि सम्भवेन लिङ्गस्यापि तटादिपदप्रातिपदिकार्थत्वं स्यादिति वाच्यं स्ववृत्तिश्रावणप्रत्यक्ष

विषयतावच्छेदकधर्म्मावच्छिन्नविशेष्यताकतात्पर्य्यं ज्ञानस्योक्तसम्बन्धघटकत्वेन तेन सम्बन्धेन स्त्रीत्व विषयकबोधजनकत्वेनाप्युच्चारितस्य तटादिपदस्य पुंस्त्वादिविषयकबोधेऽपि सत्त्वेन व्यापकत्वविरहात्, नन्वेवमभ्युपगमेऽपि भेकत्वावच्छिन्नविषयकबोधे-च्छयोच्चरितहरिपदनिष्ठविषयताव्यापकत्वस्येन्द्रत्वा-वच्छिन्नविषयताया अभावेनेन्द्रत्त्वावच्छिन्नविष-यताकबोधेच्छयोच्चरितहरिपदनिष्ठविषयताव्यापक त्वस्य भेकत्वावच्छिन्नविषयताया अभावेन च चालिनिन्यायेन हरिशब्दवाच्यानां कासामपि विषयतानां हरिपदजन्यबोधे व्यापकत्वविरहेण प्रातिपदिकार्थत्वं न स्यादिति चेन्न प्रातिपदि कनिष्ठशक्तिविशिष्टविषयताश्रयत्वस्यैव प्रतिपदि-कार्थत्वात् वैशिष्ट्यं च स्वज्ञानाधीनोपस्थितिप्रयो-ज्यत्वस्वज्ञानाधीनोपस्थितिप्रयोज्यशाब्दबोधीयवि-षयतात्वावच्छिन्नव्याप्यतानिरूपितव्यापकतावत्त्व-सम्बन्धाभ्यां, हरिपदनिष्ठविष्णुत्वावच्छिन्ननिरूपि-तशक्तिज्ञानाधीनपुंस्त्वत्वविष्णुत्वादिविषयकोपस्थि तिप्रयोज्यत्वस्य, तादृशशक्तिज्ञानाधीनोपस्थितिप्र-

योज्यपुंस्त्वत्वावच्छिन्नप्रकारतानिरूपितविष्णुत्वाव-
च्छिन्नविशेष्यतानिरूपकशाब्दबोधीयविषयताव्याप
कत्वस्यविष्णुत्वादीनां सर्वासां विषयतानां सत्त्वात्त-
दाश्रयत्वेन पुंस्त्वादीनां प्रातिपदिकार्थत्वं सुलभम्
न च निरवच्छिन्नविषयतायाआश्रयभेदादेव भेदस्य
सर्वैरङ्गीकृतत्वेनान्यघटवृत्तिघटत्वनिष्ठ विषयताव्या-
पकत्वस्यैतद्घटनिष्ठ विषयतायाअभावेन केषामपि
घटादीनां प्रातिपदिकार्थत्वं न स्यादिति वाच्यं स्व
ज्ञानाधीनोपस्थितिप्रयोज्यत्व स्वज्ञानाधीनोपस्थिति
प्रयोज्यशाब्दबोधनिष्ठभेद प्रतियोगितानवच्छेदकत्व
सम्बन्धाभ्यां प्रातिपदिकनिष्ठशक्तिविशिष्टविषयता
श्रयत्वस्य तत्त्वात्, हरिपदनिष्ठ विष्णुत्वावच्छिन्न
निरूपितशक्तिविषयक पुंस्त्वत्वावच्छिन्नविष्णुत्वा
वच्छिन्नहरिपदशक्यज्ञानाधीन पुंस्त्वत्वविष्णुत्वादि
विषयकोपस्थितिप्रयोज्यत्वस्य विष्णुत्वावच्छिन्न-
निरूपितशक्तिज्ञानाधीनोपस्थितिप्रयोज्य पुंस्त्वत्वा
वच्छिन्नप्रकारतानिरूपित विष्णुत्वावच्छिन्नवि-
शेष्यताकशाब्दबोधनिष्ठ पटत्वनिष्ठविषयतावान्नेत्या
कारकभेदीयप्रतियोगितानवच्छेदकत्वस्य च पुंस्त्व

त्वविष्णुत्वादिविषयतानां सत्त्वेन तत्त्वं सुलभम्, तटादिपदप्रातिपदिकार्थत्वन्तु न लिङ्गस्य, तटादिपदनिष्ठशक्तिज्ञानजन्योपस्थितिप्रयोज्यबोधे पुंस्त्व विषयके, स्त्रीत्वविषयतावान्नेत्याकारकस्य, स्त्रीत्व विषयके पुंस्त्वविषयतावान्नेत्याकारकस्य च भेदस्य चालिनिन्यायेन सम्भवेन तन्निष्ठविषयतानामुक्तभेदीयप्रतियोगितावच्छेदकत्वस्यैव सत्त्वेनोक्तरूपतत्त्वाभावात्, यत्तूक्तस्थले दोषवारणाय द्वितीयसंसर्गपदे स्वज्ञानाधीनोपस्थितिप्रयोज्यशाब्दबोधीयप्रवृत्तिनिमित्तनिष्ठविषयतात्वावच्छिन्नव्याप्यतानिरूपितव्यापकतावत्त्वमेव निवेश्य नियतलिङ्गपटादि शब्दवाच्य पुंस्त्वनिष्ठविषयतायाः पटत्वादिप्रवृत्ति निमित्तनिष्ठविषयताव्यापकत्वस्याक्षतत्वेन स्वस्मिन्नपि स्वव्यापकत्वमितिरीत्या पटत्वादिनिष्ठविषयतायां तादृशविषयताव्यापकत्वस्याबाधितत्वेन च तादृशविषयताश्रयत्वात्प्रवृत्तिनिमित्तलिङ्गानां तत्त्वम् अनियतलिङ्गतटादिशब्दवाच्यलिङ्गस्य न तत्त्वमुक्तयुक्त्या पुंस्त्वादिनिष्ठविषयतायां तटत्वादिप्रवृत्ति निमित्तविषयताव्यापकत्वस्याभावादित्युक्तं तन्न

वारिघनरसशब्दयोरेकप्रवृत्ति निमित्तकत्वेन घनरस शब्दस्य पुंस्त्वक्लीबत्वोभयबोधकत्वेनानियतलिङ्गकत्वात् घनरसशब्दजन्यपुंस्त्वविषयकबोधे वारिशब्दप्रयोज्यजलत्वप्रवृत्तिनिमित्तनिष्ठविषयतायाः सत्त्वेन जलत्वप्रवृत्तिनिमित्तनिष्ठविषयताऽव्यापकत्वस्य वारिशब्दप्रयोज्यक्लीबत्वविषयतायां बाधितत्वेन नियतलिङ्गवार्य्यादिशब्दप्रातिपदिकार्थत्वस्य क्लीबत्वादेर्दुर्घटत्वात्, न च पटादिपदजन्यबोधे पटत्वादि विषयके पटत्वविषयतावत्यनुमितिर्नेत्याकारकभेदस्य सत्त्वेन निरवच्छिन्नविषयताया अनुमितिशाब्दयोधीयाया ऐक्यात्पटत्वादिविषयताया अपि पटनिष्ठशक्तिज्ञानाधीनोपस्थितिप्रयोज्यशाब्दबोधनिष्ठभेदप्रतियोगितावच्छेदकत्वेन तत्त्वं न स्यादिति वाच्यं स्वज्ञानाधीनोपस्थितिप्रयोज्यशाब्दबोधनिरूपितानु-योगितानिरूपितशाब्दबोधनिष्ठप्रतियोगितानवच्छेदकत्वस्य द्वितीयसम्बन्धपदे निवेशेनोक्तप्रतियोगितायाअनुमितिनिष्ठतया पटत्वादिनिष्ठविषयतायास्तादृशप्रतियोगितावच्छेदकत्वेऽपि तादृशानुयोगितानिरूपितशाब्दबोधनिष्ठप्रतियोगितानवच्छेदकत्वेन क्षत्य

भावात्, न च वस्तुपदजन्यपटत्वविषयताावच्छेदवो धोनेत्याकारकभेदमादाय पटत्वादिविषयताया स्तादृशप्रतियोगितावच्छेदकत्वेन तत्त्वानापत्तिरिति वाच्यं स्वज्ञानाधीनोपस्थितिप्रयोज्यशाब्दबोध निष्ठभेदप्रतियोगितावच्छेदकतापर्य्याप्त्यधिकरणत्वाभाववत्त्व--- स्य तत्र निवेशेनोक्तभेदीयप्रतियोगितावच्छेदकताया वस्तुपदजन्यत्वपटत्वविषयतात्वोभयपर्य्याप्तत्वेन तादृशपर्य्याप्त्यधिकरणत्वाभाववत्त्वस्य पटत्वविषयतायां सत्त्वेन तत्त्वस्यसौलभ्यात्, न च तत् पदानिष्ठशक्तिज्ञानाधीनोपस्थितिप्रयोज्यबोधे घटविषयके पटत्वविषयतावान्न, पटत्वविषयके च तादृशबोधे घटत्वविषयतावान्नेत्याकारकभेदस्य परस्परसद्भावात्तादृशशक्तिविशिष्टविषयतायाः कस्याश्चिदप्यभावे न तत्पदप्रातिपदिकार्थत्वं कस्य चिदपि न भवेदिति वाच्यं प्रातिपदिकनिष्ठशक्तिविषयकज्ञानविशिष्टविषयताश्रयत्वस्यैव तत्त्वात् वैशिष्ट्यं च स्वाधीनोपस्थितिप्रयोज्यत्व स्वाधीनोपस्थितिप्रयोज्यशाब्दबोधनिष्ठभेदप्रतियोगितावच्छेदक तापर्य्याप्त्यधिकरणत्वाभाववत्त्वसम्बन्धाभ्यां तथाच घटत्वावच्छिन्नो

लिङ्गत्वोपलक्षितधर्म्मावच्छिन्नः संख्यात्वोपलक्षित धर्म्मावच्छिन्नश्च तत्पदशक्य इत्याकारकशक्ति ज्ञानविशिष्टविषयताया घटत्वादिनिष्ठत्वात्तत्त्वम् न च घटत्वावच्छिन्नः पटत्वावच्छिन्नश्च तत्पदश-क्य इत्याकारकसमूहालम्बनात्मकशक्तिज्ञानात्काल भेदेनोभयविषयकबोधस्योत्पद्यमानत्वात्तादृशज्ञानप्र योज्यघटविषयकबोधनिष्ठभेदप्रतियोगितावच्छेदक-त्वस्य पटादिविषयतायां पटविषयकबोधनिष्ठभेदप्र तियोगितावच्छेदकत्वस्य घटादिविषयतायां च स-त्त्वेन घटपटविषयतयोस्तत्पदप्रातिपदिकार्थत्वाना पत्तिरिति वाच्यं प्रातिपदिकनिष्ठशक्तिविशिष्टविष यताश्रयत्वस्यतत्त्वात् वैशिष्ट्यंच स्वज्ञानाधीनोपस्थि तीयविषयताप्रयोज्यत्व स्वाभाववत्त्व सम्बन्धाभ्याम् अभावीयप्रतियोगितावच्छेदकः संसर्गश्च स्वप्रयोज्य धर्म्मितानिरूपितप्रकारतारूपत्व स्वज्ञानाधीनोपस्थि तिप्रयोज्यशाब्दबोधनिष्ठभेदप्रतियोगितावच्छेदक-त्वोभयरूपः लिङ्गनिष्ठविषयतायां स्वज्ञानाधीनोप स्थितिप्रयोज्यशाब्दवोधनिष्ठभेदप्र तियोगितावच्छे दकत्वस्य सत्त्वेन स्वाभाववत्त्वस्य विरहात्, तत्पद

प्रयोज्य घटनिष्ठविषयतायां स्वज्ञानाधीनोपस्थिति प्रयोज्यशाब्दबोधनिष्ठभेदप्रतियोगितावच्छेदकत्वस्य सत्त्वेऽपि स्वप्रयोज्यधर्म्मितानिरूपितप्रकारतारूपत्वाभावेनैकसत्त्वे द्वयं नास्तीति प्रतीत्या निरुक्तोभयसम्बन्धावच्छिन्नप्रतियोगिताकस्वाभाववत्त्वस्य सत्त्वेन तत्पदप्रातिपादिकार्थत्वस्यसौलभ्यात्, हर्य्यादिशब्देत्विन्द्रादिनिरूपिततत्तच्छक्तिमादायेन्द्रादिनिष्ठाविषयतायां स्वविशिष्टत्वस्य सत्त्वेन तदाश्रयत्वात्तत्त्वम्, न च यत्रैकस्तच्छब्दो नीलत्वावच्छिन्नविषयकबोधजनकत्वेनोच्चरितो द्वितीयश्च घटत्वावच्छिन्नबोधजनकत्वेनोच्चरितः, अभेदश्चाकांक्षाभास्यः, तत्र नीलनिष्ठविषयतायामुक्तोभयसम्बन्धावच्छिन्नप्रतियोगिताकस्वाभाववत्ताविरहेण तत्त्वानापत्तौ ससइति वाक्यस्य प्रामाण्यानापत्तिरिति वाच्यं स्वप्रयोज्यधर्म्मितानिरूपित संसर्गावच्छिन्न प्रकारतारूपत्वनिवेशनाभेदस्य संसर्गताविरहेण तदवच्छिन्नाया नीलत्वावच्छिन्नप्रकारतायाः संसर्गावच्छिन्नप्रकारतारूपत्वविरहात्, न च स्वत्वादि सम्बन्धेन राजविशिष्टपुरुष इत्येतत्तात्पर्य्येणोच्चरि

तत्तत्पदप्रातिपदिकार्थत्वं राजपदार्थस्य न स्यात् राजत्वावच्छिन्नविषयतायामुक्तोभयसम्बन्धावच्छिन्नप्रतियोगिताकस्वाभाववत्त्वविरहादिति वाच्यमुक्तप्रकारतायामाकांक्षाभास्यसंसर्गावच्छिन्नत्वनिवेशेनात्र स्वत्वस्य शक्तिभास्यत्वेनादोषात्, न च पुंस्त्वनिष्ठविषयतायां स्वप्रयोज्यतटत्वावच्छिन्नधर्म्मितानिरूपिताकांक्षाभास्य संसर्गावच्छिन्नप्रकारतारूपत्वाभावेन निरुक्तोभयसम्बन्धावच्छिन्नप्रतियोगिताक स्वाभाववत्त्वसत्त्वेन पुंस्त्वादीनां न टादिपदप्रातिपदिकार्थत्वं स्यादिति वाच्यं स्वनिरूपितापदार्थसम्बन्धावच्छिन्नप्रकारतारूपत्वानाश्रयत्व स्वनिरूपितापदार्थसम्बन्धावच्छिन्नप्रकारतावृत्त्यवच्छेद्यतानिरूपितत्वानाश्रयत्वोभयसम्बन्धावच्छिन्नप्रतियोगिताक स्वप्रयोज्यधर्म्मित्वाभाववत्त्व सम्बन्धनिवेशेन पुंस्त्वादिनिष्ठविषयतायां स्वप्रयोज्यतटत्वावच्छिन्नधर्म्मितानिरूपिततादृशप्रकारतावृत्त्यवच्छेद्यतानिरूपितत्वेनोभयसम्बन्धावच्छिन्नप्रतियोगिताकधर्म्मित्वाभाववत्त्वस्य सत्त्वेनस्वाभाववत्त्वस्य विरहात्, ननु यत्र देवदत्ततात्पर्य्ये-

ण स इत्युच्चरितं धनतात्पर्य्येण तदिति तत्र देवदत्तत्वावच्छिन्नविषयतायां तत्पदनिष्ठशक्तिप्रयोज्यधनत्वावच्छिन्नधर्म्मितानिरूपितस्वत्वरूपापदार्थसंसर्गावच्छिन्नप्रकारतारूपत्वस्य सत्त्वेन तादृशप्रकारतारूपत्वानाश्रयत्वस्य वक्तुमशक्यतया एकसत्त्वे द्वयं नास्तीति रीत्या तादृशधर्म्मित्वाभाववत्वस्य सत्त्वेन स्वज्ञानाधीनोपस्थितिप्रयोज्यशाब्दबोधनिष्ठभेदप्रतियोगितावच्छेदकत्वस्य च सत्त्वेन निरुक्तोभयसम्बन्धावच्छिन्नप्रतियोगिताकतत्पदनिष्ठशक्त्यभाववद्विषयताश्रयत्वाभावाद्देवदत्तस्य तत्पदप्रातिपदिकार्थत्वं न स्यादिति वाच्यमपदार्थसंसर्गावच्छिन्नेत्यत्रापदार्थत्वं न पदप्रयोज्यसंसर्गाभाववत्त्वमपि तु पदशक्यत्वाभाववत्त्वमेवञ्च तत्पदस्य सकलार्थनिरूपितशक्तिमत्त्वेन स्वत्वसंसर्गे तत्पदशक्यत्वस्यैव सत्त्वेन देवदत्तत्वावच्छिन्नविषयतायां तादृशप्रकारतारूपत्वानाश्रयत्वस्य तादृशप्रकारतावृत्त्यवच्छेद्यतानिरूपितत्वानाश्रयत्वस्य च सत्त्वेनोक्तोभयसम्बन्धेन तादृशधर्म्मित्वाभाववत्त्वस्यासत्त्वादेकसत्त्वे द्वयं नास्तीति रीत्या तादृशशक्य-

भाववद्विषयताश्रयत्वस्य सौलभ्यात्, न च घटादि-
तात्पर्य्येणोच्चरिततत्पदप्रातिपदिकार्थत्वं पुंस्त्वादी
नां भवेत्, पुंस्त्वादिप्रतियोगिकस्वरूपसम्बन्धस्योक्त-
रीत्या तत्पदार्थत्वेन पुंस्त्वावच्छिन्नविषयतायास्त-
त्संसर्गावच्छिन्नायाः स्वप्रयोज्यघटत्वाद्यवच्छिन्न
धर्म्मितानिरूपितापदार्थसंसर्गावच्छिन्नप्रकारतारू-
पत्वानाश्रयत्वेन तादृशप्रकारतावृत्त्यवच्छेद्यतानिरू-
पितत्वानाश्रयत्वेन चोक्तोभयसम्बन्धेन तादृशधर्म्मि
त्वाभावविरहादुक्तयुक्त्या तादृशधर्म्मित्वाभाववत्त्व-
स्वज्ञानाधीनोपस्थितिप्रयोज्यशाब्दबोधनिष्ठभेदप्रति
योगितावच्छेदकत्वसम्बन्धाभ्यां शक्त्यभाववद्वि-
षयताश्रयत्वादिति वाच्यम् अभावीयप्रतियो-
गितावच्छेदकसम्बन्धघटकप्रकारतायां स्वाप्रयोजक-
पदाप्रयोज्यत्व स्वनिरूपित्वसम्बन्धाभ्यां स्वविशिष्ट-
त्वस्य निवेशेनपुंस्त्वादेरप्रातिपदिकार्थत्वात्, घन-
त्वावच्छिन्नधर्म्मिता निरूपितदेवदत्तत्वावच्छिन्नप्र
कारतायाः स्वाप्रयोजकतत्पदप्रयोज्यत्वेन निरुक्तप्र-
कारतानाश्रयत्वस्य देवदत्तत्वावच्छिन्नविषयतायां
सत्त्वेन तादृशधर्म्मित्वाभाववत्त्वस्य वक्तुमशक्यत-

यैकसत्त्वे द्वयं नास्तीति प्रतीत्या निरुक्तोभयसम्बन्धावच्छिन्नप्रतियोगिताकशक्त्यभवाद्विषयताश्रयत्वविरहात्, पुंस्त्वादेस्तत्पदप्रातिपादिकार्थत्वंतु वक्तुमशक्यम् अनियतलिङ्गास्तु लिङ्गमात्राद्याधिक्यस्येति ग्रन्थेन तत्पदस्य लिङ्गोदाहरणस्यैव सर्वेषामभिप्रेतत्वात्, । नन्वत्र लक्षणे तद्व्यक्तिगत लिङ्गानामानन्त्याद्घटादिपदजन्यबोधे एकत्वादिविशिष्टघटादिविषयके सर्वघटगत लिङ्गभानाभावेन लिङ्गनिष्ठविषयतायां स्वज्ञानाधीनोपस्थितिप्रयोज्य बोधस्यानन्त्यादेतत्पुंस्त्वविषयतावान्नेत्यादिभेदीयप्रतियोगितावच्छेदकतायाः सत्त्वेन निरुक्तोयभसम्बन्धेन घटादिपदनिष्ठशक्तिविशिष्टविषयताया असत्त्वेन लिङ्गस्य तत्त्वं न स्यादिति चेन्न स्वज्ञाना धीनोपस्थितिप्रयोज्येत्यादिसम्बन्धंविहाय स्वज्ञाना धीनोपस्थितिप्रयोज्यशाब्दबोधनिष्ठभेदप्रतियोगिता निरूपितत्वस्वविषयीभूत विषयतावच्छेदकधर्म्मावच्छिन्नत्व विषयतात्वोभयधर्म्मावच्छिन्नावच्छेदकताक भेदप्रातियोगितानिरूपितत्वसम्बन्धाभ्यांस्वविशिष्टावच्छेदकताश्रयत्वस्य निवेशेनान्यपुंस्त्वादिनिष्ठवि-

षयतानिष्ठावच्छेदकतायांप्रथमसम्बन्धसत्त्वेऽपि घटादिपदनिष्ठशक्तिविषयीभूत पुंस्त्वादिविषयतावच्छेदक पुंस्त्वत्वाद्यवच्छिन्नत्वविषयतात्वोभयधर्म्मावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदप्रतियोगितानिरूपितत्वस्यासत्त्वेन निरुक्तस्वविशिष्टावच्छेदकताश्रयत्वस्यपुंस्त्वादीनामसत्त्वेनादोषात्, ॥ न च पुंस्त्वादिनिष्ठविषयतायां तटादिपदनिष्ठशक्तिज्ञानजन्योपस्थितीयविषयताप्रयोज्यशब्दबोधवृत्ति पुंस्त्वत्ववृत्तिविषयतावान्नेत्याकारकभेदीयप्रतियोगितानिरूपितत्वस्य तादृशपुंस्त्वत्वाद्यवच्छिन्नत्वविषयतात्वोभयधर्म्मावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदप्रतियोगितानिरूपितत्वस्याभावेनोभयसम्बन्धावच्छिन्नप्रतियोगिताकतटादिपदनिष्ठशक्त्यभावत्वस्य सत्त्वेन पुंस्त्वादीनां तटपदप्रातिपदिकार्थत्वं दुर्वारमेवेति वाच्यं स्वविशिष्टावच्छेदकताश्रयत्वघटकवैशिष्ट्यनियामकसम्बन्धे स्वानिरूपितत्व स्वनिरूपितावच्छेदकतानिरूपितत्वान्यतरसंसर्गेणोक्तभेदीयप्रतियोगिताविशिष्टत्वस्य निवेशेन पुंस्त्वादिविषयतायां द्वितीयसंसर्गेण तादृशावच्छेदकताश्र-

त्यवेन तत्प्रतियोगिकाभाववत्त्वविरहादिति ध्येयम् ॥ केचित्तु प्रातिपदिकनिष्ठशक्तिविशिष्टविषयताश्रयत्वं, प्रातिपदिकार्थत्वं. वैशिष्ट्यं च स्वज्ञानाधीनोपस्थितिप्रयोज्यबोधविषयत्वेन तात्पर्य्यविषयत्व स्वनिष्ठजनकतानिरूपितशाब्दबोधनिष्ठजन्यतावच्छेदकत्व स्वाभाववत्त्व सम्बन्धैः, अभावीयप्रतियोगितावच्छेदकः सम्बन्धश्च स्वज्ञानाधीनोपस्थितिप्रयोज्यबोधनिष्ठभेदप्रतियोगितावच्छेदकताश्रयत्वरूपः, इन्द्रतात्पर्य्येणोच्चरितहरिपदप्रातिपदिकार्थत्वमश्वादेर्वारणाय प्रथमः, सत्तानिष्ठविषयतायां सत्तानिष्ठविशेष्यतानिरूपितघटनिष्ठप्रकारताकबोधविषयत्वेन-तात्पर्य्यविषयत्वात्तत्त्ववारणाय द्वितीयः, पुंस्त्वादेस्तटपदप्रातिपदिकार्थत्ववारणाय तृतीयः, घटादिनिष्ठविषयतायां तादृशशक्तिविशिष्टत्वेन तत्त्वस्य सौलभ्यादित्याहुः, ॥ अन्ये तु स्वनिष्ठशक्तिविशिष्टविषयताश्रयत्वं प्रातिपदिकार्थत्वं, वैशिष्ट्यं च स्वज्ञानाधीनोपस्थितिजन्यत्वप्रकारकतात्पर्य्यविषयशाब्दबोधनिरूपितत्व स्वाविषयकयत्किञ्चिज्ज्ञानाभाववत्त्व सम्बन्धाभ्याम् अभावीयप्रतियोगितावच्छेद-

कः सम्बन्धश्च स्वविशिष्टशक्तिज्ञानजन्योपस्थितिजन्यशाब्दबोधनिष्ठभेदप्रतियोगितावच्छेदकत्वरूपः, स्व प्रयोज्योपस्थितीयप्रकारत्वासमानाधिकरणधर्मितानिरूपितप्रकारतारूपत्वोभयरूपः, अत्र वैशिष्ट्यं च स्वविषयशक्तिविषयकत्व स्वजन्यतानवच्छेदकीभूत शाब्दबोधनिष्ठविषयतात्वावच्छिन्नजन्यतानिरूपितजनकत्वाभाववत्त्व सम्बन्धाभ्याम् अश्वतात्पर्येणोच्चरितहरिपदप्रातिपदिकार्थत्वमिन्द्रादेर्वारणाय प्रथमः, घटत्वावच्छिन्नो लिङ्गत्वोपलक्षितधर्म्मावच्छिन्नश्च तत्पदशक्य इत्याकारकशक्तिज्ञानवैशिष्ट्यस्योक्तोभयसम्बन्धेन घटत्वावच्छिन्नो बुद्धिस्थत्वोपलक्षितधर्म्मावच्छिन्नश्च तत्पदशक्य इत्याकारक शक्तिज्ञाने सत्त्वेन तादृशशक्तिज्ञानप्रयोज्यपटादिविषयकशाब्दबोधनिष्ठभेदप्रतियोगितावच्छेदकत्वस्य घटादिविषयतायां सत्त्वेन तत्त्वाभाववारणायाभावीयप्रतियोगितावच्छेदकसम्बन्धे प्रयोज्यत्वं विहाय तादृशशक्तिज्ञानजन्योपस्थितिजन्यत्वनिवेशः, सम्प्रसारणपदस्य स्वपदप्रयोज्यत्वेयण्निष्ठस्थानिरूपितादेशताश्रये च खण्डशः शक्तेः सत्त्वेन सम्प्र-

सारणपदप्रयोज्यत्वनिष्ठविषयतायां यण्निष्ठस्थानि-
तानिरूपितेभिन्नादेशताश्रयस्सम्प्रसारणपदशक्य इ-
त्याकारकशक्तिज्ञानजन्योपस्थितिजन्यशाब्दबोध---
निष्ठसम्प्रसारणपदप्रयोज्यत्वविषयतावान्नेत्याकारक
भेदप्रतियोगितावच्छेदकत्वस्यैव सत्त्वेन तत्त्वाभा-
ववारणायाभावीयप्रतियोगितावच्छेदकस्सम्बन्धो
द्वितीयः, वृन्दाकरपदनिष्ठशक्तिज्ञानविशिष्टं देवत्वा
वच्छिन्नो लिङ्गत्वोपलक्षितधर्म्मावच्छिन्नश्च देवनाप
दशक्य इति ज्ञानं माभूदतोऽभावीयप्रतियोगिता
वच्छेदकसम्बन्धघटकः प्रथमः, घटत्वावच्छिन्नः
पटत्वावच्छिन्नश्च तत्पदशक्य इत्याकारके ज्ञाने का
लभेदेन घटपटोभयविषयकबोधजनके विशिष्टस्य त-
त्त्ववारणाय तद्घटको द्वितीयः, लिङ्गनिष्ठविषयतायां
निरुक्तोभयसम्बन्धावच्छिन्नप्रतियोगिताकाभाववत्त्व
विरहान्नतत्त्वमित्याहुः ॥ परे तु प्रातिपदिकनिष्ठ
शक्तिविशिष्टविषयताश्रयत्वं तत्त्वं, वैशिष्ट्यं च स्व
प्रयोज्यत्व स्वविशिष्टविषयताभिन्नत्व सम्बन्धाभ्या
म् अत्र वैशिष्ट्यं च स्वप्रयोज्यविषयताव्यापकत्व
स्वविशिष्टत्व सम्बन्धाभ्याम् अत्र वैशिष्ट्यं च स्व

प्रयोज्यापदार्थसंसर्गावच्छिन्नविशेष्यतानिरूपितप्रकारतात्वस्वप्रयोज्यापदार्थसंसर्गावच्छिन्न विशेष्यतानिरूपितप्रकारतावच्छेदकतात्वसम्बन्धाभ्यां, घटादिनिष्ठविषयतायां तादृशशक्तिविशिष्टत्वेन तत्त्वम्. इदंच खण्डशः शक्त्यभ्युपगमे, विशिष्टशक्त्यभ्युपगमे तु प्रातिपदिकनिष्ठशक्तिविशिष्टविषयताश्रयत्वं तत्त्वं वैशिष्ट्यं च स्वप्रयोज्यत्व स्वविशिष्टविषयताभिन्नत्व सम्बन्धाभ्याम् अत्र वैशिष्ट्यं च स्वप्रयोज्यविषयत्वाव्यापकत्व स्वप्रयोज्यनिरवच्छिन्नमुख्यविशेष्यतानिरूपितप्रकारत्वाभाववत्त्व स्वप्रयोज्यनिरवच्छिन्नमुख्यविशेष्यतानिरूपित साक्षात्परम्पराप्रकारतावच्छेदकतात्वाभाववत्त्वसम्बन्धैः, पुंस्त्वादीनांतटपदप्रातिपदिकार्थत्व वारणाय मुख्यस्य निवेशः, पशुशब्ददोषवारणाय साक्षात्परम्परेत्यस्य निवेशः, लक्षणसमन्वयः स्वयमूहनीय इत्याहुः॥

सूक्ष्मदर्शिनस्तु प्रातिपदिकविशिष्टत्वं प्रातिपदिकार्थत्वं वैशिष्ट्यं च स्वप्रयोज्यबोधविषयत्वेनतात्पर्य्यविषयत्व स्वाभाववत्त्व सम्बन्धाभ्याम् अभावीयप्रतियोगितावच्छेदकः सम्बन्धश्च स्वप्रयोज्यधर्म्मिता

निरूपितप्रकारताश्रयत्व स्वज्ञानाधीनोपस्थितिप्रयोज्यशेषनिष्ठभेदप्रतियोगितावच्छेदकत्वोभयरूपः अश्वादेर्विष्णुतात्पर्येणोच्चरितहरिपदप्रातिपदिकार्थत्ववारणाय प्रथमः, पुंस्त्वादे स्तटपदप्रातिपदिकार्थत्व वारणाय द्वितीयः, घटादिनिष्ठविषयतायां प्रातिपदिकविशिष्टत्वेन तत्त्वमित्याहुः॥ प्रवृत्तिनिमित्तं तदाश्रयश्च प्रातिपदिकार्थ इति नागेशः, प्रवृत्तिनिमित्तत्वं च वाच्यत्वे सति वाच्यवृत्तित्वे सति वाच्योपस्थितिप्रकारत्वमिति केचित्, आकाशादिशब्दस्य स्वरूपतः शब्दाश्रये शक्तेः सत्त्वेन शब्दाश्रयत्वे प्रवृत्तिनिमित्तत्ववारणाय वाच्यत्वे सतीति प्राञ्चः, द्रव्यादिपदादपि घटत्वाद्युपलक्षितघटादौ शक्तिग्रहाद् घटत्वादिना घटादेरुपस्थितेः सत्त्वेन द्रव्यादिपदानां घटत्वादौ प्रवृत्तिनिमित्तत्ववारणाय वाच्यत्वे सतीति नव्याः, गवादिपदानां जात्याकृतिविशिष्टवाचकत्व मते तेषां संस्थाने प्रवृत्तिनिमित्तत्ववारणाय वाच्यवृत्तित्वे सतीति, न चावयवविशेषसंयोगरूपस्य संस्थानस्य स्वसमवायिसमवेतत्वसम्बन्धेन गवादौ वृत्तित्वात्तन्निवेशोऽप्यतिव्याप्तितादवस्थ्यमिति वाच्यं

साक्षात्सम्बन्धेन तद्विवक्षणात्, द्रव्यदधिपदादेः घटा दिरूपद्रव्येऽवयविरूपदध्यादौ च वाच्यत्वस्य सत्त्वात् तद्वाच्यात्मककपालादाववयवे दध्नि च वृत्तेश्च स त्त्वाद् घटदध्यादौ प्रवृत्तिनिमित्तत्ववारणाय वाच्यो पस्थितिप्रकारत्वमिति, तदर्थश्च अप्रमान्यशक्तिज्ञा नजन्या या उपस्थितिस्तन्मुख्यविशेष्यताकप्रकार ताश्रयत्वं, द्रव्यपदं द्रव्यवति शक्तमिति शक्तिभ्रम जन्योपस्थितिमादाय द्रव्यपदादेर्घटादावतिव्याप्ति तादवस्थ्याद्भ्रमान्येति, द्रव्यपदं द्रव्यवति लाक्षणि कमिति ज्ञानजन्योपस्थितिमादायोक्तातिव्याप्तिवा रणाय शक्तीति, मुख्यविशेष्यतानिवेशात्पशुपदादी नां शक्यतावच्छेदकतावच्छेदके लोमादौ नातिव्या प्तिरित्येतत्सर्वमन्यत्र द्रष्टव्यम्,। अन्ये तु प्रातिपदि कविशिष्टत्वं प्रवृत्तिनिमित्तत्वं, वैशिष्ट्यं च स्वप्रयो ज्योपस्थितीयमुख्यविशेष्यतानाश्रयत्व स्वविशिष्ट विषयतावत्त्व सम्बन्धाभ्याम् अत्र वैशिष्ट्यं च स्व प्रयोज्यत्व स्वप्रयोज्यलिङ्गवृत्तिविषयताभिन्नत्वस्वप्र योज्यलिङ्गत्वव्याप्यधर्म्मवृत्तिविषयताभिन्नत्वसम्ब- न्धैः, घटादेस्तत्त्ववारणाय प्रथमः, लिङ्गादेस्तत्त्व

वारणाय द्वितीयः घटत्वादेस्तथात्वात्तत्त्वमिति वद न्ति तन्मते केषां प्रातिपदिकार्थत्वं केषां नेति तद्ग्रन्थतोऽवसेयमित्यलमधिकेन ॥

कर्त्तुरीप्सिततमङ्कर्म्म ।

कृधातोरुत्पत्त्यनुकूलव्यापारोऽर्थस्तत्रोत्पत्तेरविवक्ष या व्यापारमात्रमत्रार्थो बहुलक्ष्यानुरोधाद्द्वितीया श्रितेत्यादि सामर्थ्याच्च अनन्यलभ्यो हि शब्दार्थ इति न्यायेन व्यापारस्य धातुना लाभेनाश्रयत्वमा त्रं तृजर्थः, आप्नोतेः सन्नन्तान्मतिबुद्धीति कर्म्मणि क्तः, ईप्सितशब्दश्च वारणार्थानामिति सूत्रे भाष्ये माषेभ्यो गावारयतीत्यादौ यस्य माषास्सन्ति न गाव स्तस्यमाषाईप्सिताअपि गोमतो माषा ईप्सिता न सन्तीत्यभिप्रेतपरत्वमीप्सितशब्दस्य विज्ञायापादा- नत्वाभावमाशङ्क्येप्सितशब्दस्य क्रियापरत्वं मनसि निधाय "तस्यापिमाषा एवेप्सिता यदेभ्यो गावारय- ति" इत्युक्तस्यवारणक्रियया परकीया अपि माषा वा रयितुराप्तुमिष्टा भवन्ति मानशन्नेते इत्येतेभ्योऽसौ गा वारयतीभिप्रायमभिदधानेन स्पष्ट एवोक्तः क्रि- यापरः कैयटेन, वस्तुतस्तु तमब्ग्रहणमेव क्रियापरत्वे

लिङ्गं भाष्यस्वरसात्क्रियापरत्वमयुक्तं, ततस्तस्याप्रतीतेः, न च सम्बन्धरूपकर्म्मणो धात्वर्थकुक्षौ प्रविष्टत्वे न धात्वर्थेनानुपसंग्रहादिति बलात्स्पर्द्धवदकर्म्मकत्वेन कर्म्मणि क्तो दुर्लभ इति वाच्यं शब्दस्य धात्वर्थेनोपसंगृहीतत्वादकर्म्मकत्वेऽपि बहिर्भूतपुत्रादिकर्म्मणोऽभावे मानाभावादिति नागेशैरुक्तत्वेनात्रापि बहिर्भूतपुत्रादिकर्म्मादाय कर्म्मणि क्तप्रत्ययस्यय सौलभ्यात्, तद्योगे क्तस्य च वर्त्तमान इति कर्त्तरि षष्ठी, तदर्थोव्यापाराश्रयत्वं, ननु कटं कृतवान् कटं करिष्यतीत्यादौ वर्त्तमानकालिकेच्छाविरहेण कर्म्मत्वानापत्तिरिति चेन्न क्तप्रत्यययोगात्तवर्त्तमानत्वस्याविवक्षितत्वेनादोषात्, नन्वेवमुक्तसूत्रेण षष्ठ्या अनुपपत्तिरिति चेन्न गमेरिडित्यत्र परस्मैपदग्रहणस्य तङानयोरभावपरत्ववत्तत्र वर्त्तमानपदस्य भूतभविष्यत्कालाबोधजनकपरत्वेन, वर्त्तमान इत्यधिकृत्य विहितस्य क्तस्येत्यर्थेन, तस्यापत्यमित्यत्र लिङ्गवचनयोरुपलक्षणतया भानेऽप्युद्देश्यतावच्छेदकविशेषणतया भानाभाववदत्राप्युपलक्षणतया वर्त्तमानत्वस्य भानेऽप्युद्देश्यतावच्छेदकविशेषणतया भानविरहेण वाऽदोषात् ॥

केचित्तु कर्म्मणि द्वितीयेति शास्त्रघटककर्म्मपदज-
न्यलक्ष्यधर्म्मिकसाधुत्वप्रकारकबोधानुपयोगिवर्त्तमा-
नविषयकबोधो जायतामिति पाणिनेरिच्छां कल्पयि-
त्वा कर्त्तृशब्दाद्द्विभक्तिमानीय ततः कटं कृतवान्
कटं करिष्यतीत्यादिलक्ष्यानुरोधेन कर्म्मणि द्विती-
येति शास्त्रघटककर्म्मपदजन्यलक्ष्यधर्म्मिकसाधुत्व-
प्रकारकबोधोपयोगिवर्त्तमानत्वाविषयकबोधोजाय-
तामित्युक्तमुनेरिच्छां कल्पयन्तो द्वितीयवाक्यार्थबो
धस्यैव लक्ष्यसंस्कारोपयोगित्वेनानुपपत्त्यभावादिति
वदन्ति, । परे तु कर्म्मपदशक्यतावच्छेदकतया क्त-
प्रत्ययोपात्तवर्त्तमानत्वस्याविवक्षितत्वात् तथा हि
तत्पदजन्यबोधविषयतात्वावच्छिन्नप्रकारताकभग-
वदिच्छीयबोधविषयतायां धर्म्मिपारतन्त्र्येण यद्विशे-
षणं तत्तत्पदशक्यतावच्छेदकमित्युच्यते, धर्म्मिपार-
तन्त्र्यं च स्वविशेष्ये यद्विशेषणं तन्निरूपितं यद्वि
शेषणं तत्, घटपदजन्यबोधविषयतावान् घटो भव-
त्वितीच्छायां स्वं घटत्वं तद्विशेष्यो घटस्तत्र विशे-
षणं बोधविषयता तन्निरूपितविशेषणत्वाद् घटस्य,
घटपदशक्यतावच्छेदकबोधविषयतायां धर्म्मिपारत-

न्त्र्येण यद्विशेषणं घटत्वं तदेव शक्यतावच्छेदकम्, अत एव गुणवत्त्वेन द्रव्यं बोद्धव्यमितीच्छायां गुणवत्त्वमेव शक्यतावच्छेदकं, बोधविषयत्वेतस्याव च्छिन्नत्वसम्बन्धेनान्वये धर्म्मिपारतन्त्र्येण बोधविषयत्वे विशेषणत्वात्, एवञ्च यथा बुद्धिविषयतावच्छेदकत्वोपलक्षित तत्तद्धर्म्मावच्छिन्नस्तत्पदजन्यबोध विषयतावान् भवत्वितीच्छायां बोधविषयत्वे धर्म्मि पारतन्त्र्येण विशेषणं तत्तद्धर्म्मविशेष एव शक्यतावच्छेदको, न तु बुद्धिविषयतावच्छेदकत्वं तच्चोपलक्षणमेव, तथा प्रकृतेऽपि कर्तृवृत्तिव्यापारविशिष्टफलवत्त्व प्रकारकवर्त्तमानकालिकच्छोद्देश्यं कर्म्मपदजन्यबोधविषयतावद्भवत्विति पाणिनेरिच्छायां बोधविषयत्वे तादृशेच्छोद्देश्यस्यैव वृत्तितयाविशेषणत्वेन धर्म्मिपारतन्त्र्येण तत्रोद्देश्यत्वस्य विशेषणत्वात्कर्म्मपदशक्यतावच्छेदकत्वं न तु वर्त्तमानत्वस्य, तस्य धर्म्मिपारतन्त्र्येण तत्राविशेषणत्वात्, किन्तु बुद्धिविषयतावच्छेदकत्वतदुपलक्षणत्वात्, ननु वर्त्तमानत्वस्य कर्म्मपदशक्यतानवच्छेदकत्वेऽपि कर्त्तुरीप्सिततमं कर्म्मेति शास्त्रजन्यशाब्दबोधात्मककर्म्म-

पदशक्तिज्ञानविषयतयाप्रवेशेन तादृशशक्तिज्ञाना-
द्वर्त्तमानत्वस्याप्युपस्थितेः कर्म्मणि द्वितीयेति शा-
स्त्राद्वर्त्तमानघटितस्यैव तादृशार्थस्यबोधेनोक्तलक्ष्या
सिद्धिर्दुर्वारैवेति चेन्न यथा तच्छब्दे बुद्धिविषयता-
वच्छेदकधर्म्मावच्छिन्नस्तत्पदशक्य इति सामान्येन
शक्तिज्ञाने जाते पश्चाद् घटत्वावच्छिन्नस्तत्पदश-
क्य इति विशेषेण जातं शक्तिज्ञानमेव शाब्दबोध
प्रयोजकं तथा प्रकृते कर्तृवृत्तिव्यापारविशिष्टफलव-
त्त्वप्रकारकवर्त्तमानकालिकेच्छोद्देश्यं कर्म्मपदशक्य-
मिति सामान्येन शक्तिज्ञाने जाते पश्चात्कर्तृवृत्ति-
व्यापारविशिष्टफलवत्त्वप्रकारकेच्छोद्देश्यं कर्म्मपद-
शक्यमिति जातं वर्त्तमानाद्यघटितं मानसिकश-
क्तिज्ञानमादायोक्तप्रयोगादेः सिद्धिरित्याहुः ॥ व-
स्तुतस्तु, प्रारब्धापरिसमाप्तिक्रियाश्रयत्वस्य वर्त्त-
मानत्वे व्यतीतेऽह्नि कृतस्य पाकस्य तात्पर्य्येणा-
पीदानीं पाकं करोतीति प्रयोगापत्तिस्तत्कालस्यापि
तथात्वादतः स्वोच्चारणसमानाधिकरणत्ववत्त्वस्व-
घटकधातुजन्यबोधविषयत्वेन तात्पर्य्यविषयप्रारब्धा
परिसमाप्तिक्रियाश्रयत्वसम्बन्धाभ्यां प्रयोगविशिष्ट-

त्वस्यैववर्त्तमानत्वेनोक्तस्थले प्रथमसम्बन्धविरहेण वर्त्तमानत्वविरहात्तत्कालतात्पर्य्येण नेदानीं पाकं करोतीति प्रयोगापत्तिः, एवं च क्तप्रत्ययोपात्तवर्त्तमानत्वस्य विवक्षायां कर्त्तृवृत्तिव्यापारविशिष्टफलवत्त्वप्रकारकवर्त्तमानकालिकेच्छोद्देश्यस्यैव कर्म्मत्वं भवेत्, क्तप्रत्ययार्थो वर्त्तमानश्च पाणिन्युच्चरितेप्सितप्रयोगकालएव पाणिन्युच्चरितेप्सितप्रयोगसमये कटकरणेच्छायां कटं करोतीति प्रयोगो भवेत्, तादृशवर्त्तमानकालिकेच्छाविरहेणास्मदाद्युच्चरिताः कटं करोतीत्यादिप्रयोगा नैवस्युरेवञ्च कटङ्करोतीत्यादिकमपहाय तेन कटं कृतवान् कटं करिष्यतीत्यादिसिद्धिरिति ग्रन्थकृतोक्तमयुक्तमेवेतिबोध्यम्। परे तु धातुसम्बन्धे प्रत्यया इत्यनेनात्र क्तप्रत्ययः, वर्त्तमानत्वं च द्विविधं स्वबोधकशब्दोच्चारणाधिकरणीभूतकालवृत्तित्वं, स्वसमभिव्याहृतप्रधानीभूतक्रियाधिकरणीभूतकालवृत्तित्वं च, भूतत्वं च निरुक्तकालवृत्तिध्वंसप्रतियोगिक्षणवृत्तित्वं, भविष्यत्त्वं च निरुक्तकालवृत्तिप्रागभावप्रतियोगिक्षणवृत्तित्वं, यथा वसन्ददर्शेत्यत्र ददर्शेतिश-

ब्दोच्चारणाधिकरणीभूतकालवृत्तिध्वंसप्रतियोगिक्षणवृत्तित्वरूपभूतकालिकत्वबोधः, लिटा स्वसमभिव्याहृतप्रधानीभूतक्रियाधिकरणत्वेन निश्चितो यो दर्शनाधिकरणीभूतः कालस्तद्वृत्तित्वमेव वासक्रियायां वर्त्तमानकालिकत्वं शता बोधयति वसन् ददर्शेत्यादौ भूते लड़ित्युक्तिस्तु चिन्त्यैव, प्रकृते क्तप्रत्ययोपात्तं वर्त्तमानत्वं न विवक्षितमित्यस्य स्वबोधकशब्दोच्चारणाधिकरणीभूतकालवृत्तित्वरूपं वर्त्तमानत्वं न विवक्षितमित्यर्थः धातुसम्बन्धे प्रत्यया इति सूत्रलभ्यवर्त्तमानत्वस्य विवक्षणेऽपि स्वसमभिव्याहृतप्रधानीभूता क्रिया "कर्म्म संज्ञं भवति" इत्यत्र भूधातूपस्थाप्या सत्ता रूपा तदधिकरणत्वेन निश्चितो यस्सत्ताधिकरणीभूतः कालस्तद्वृत्तित्वं सम्बन्धेच्छायां बोधयतिक्ते सत्यप्यदोषादिति ब्रुवन्ति,। न च वर्त्तमानत्वाविवक्षायां मानाभाव इति वाच्यं कर्म्मणि हन इत्यादेरेव प्रामाण्यात्, न च तृचाऽऽश्रय त्वस्योक्तत्वेनोक्तार्थानामप्रयोग इति न्यायेन तदर्थबोधिका षष्ठी दुर्लभैवेति वाच्यं तृचा कर्तृपदार्थव्यापारविशिष्टाश्रयत्वस्योक्तत्वेऽपि ईप्स-

धात्वर्थसम्बन्धप्रकारकेच्छानुकूलव्यापारविशिष्टाश्रयत्वस्यानुक्तत्योक्तार्थानामित्यस्य निर्विषयत्वेन तस्याः सौलभ्यात्, ननु व्यापाराश्रयस्य व्यापाराश्रयेऽभेदेनाऽन्वयो दुर्लभोऽभेदान्वयबोधश्च विरूपोपस्थितयोरेवेति नियमादिति चेन्न षष्ठ्या इच्छीयप्रकारताश्रयफलप्रयोजकव्यापाराश्रयो वाच्यः, कर्तृपदस्य व्यापाराश्रय इति सामान्यविशेष्ययोरभेदान्वये बाधकाभावात्, । नव्यास्तु प्रत्ययवाच्यतावच्छेदको धर्मो विलक्षण एव तदवच्छिन्ने प्रकृत्यर्थतावच्छेदकावच्छिन्नस्यान्वये क्षत्यभावादित्याहुः, । प्राञ्चस्तु यथा क्रियाजन्यफलशालित्वस्य कर्म्मत्वेन व्यापारफलयोर्द्धातुलभ्यत्वेन जन्यजनकभावस्याकांक्षाभास्यत्वेनाऽऽश्रयत्वमात्रं कर्म्मप्रत्ययार्थस्तथा व्यापाराश्रयत्वस्य कर्तृत्वेन व्यापारस्य धातुलभ्यत्वेनाश्रयमात्रं कर्तृप्रत्ययार्थः, एवञ्चाश्रयस्य व्यापाराश्रयेऽन्वयो निर्बाध एवेति वदन्ति, । अन्ये तु कर्तृपदार्थः स्वतन्त्रः, षष्ठ्यर्थो व्यापाराश्रय एवञ्च कर्तृपदवाच्यत्वषष्ठीवाच्यत्वयोर्विशेष्यतावच्छेदकप्रकारतावच्छेदकयोर्वैलक्षण्यात्तदाश्रययोरभवत्येवाभेदा,

न्वय इति ब्रुवन्ति,। परे तु अनन्यलभ्यो हि शब्दार्थ इति न्यायाद्व्यापाराश्रयस्य कर्तृपदलभ्यत्वादत्र षष्ठ्यर्थपरित्यागेनापि निर्वाहादित्याहुः,॥ आप्नोतेः सम्बन्धोऽर्थः स च कर्तृपदार्थविशेषणीभूतव्यापारघटितः, इच्छा सनर्थः, विषयताऽऽश्रयत्वं च क्तार्थः व्यापाराश्रयस्य वृत्तितया व्यापारे, तस्य वैशिष्ट्यनियामकाभ्यां स्ववाचकधातुवाच्यत्व स्वप्रयोज्यत्व सम्बन्धाभ्यां फलांशे, तस्य प्रकारितयेच्छायां, तस्या निरूपितत्वेन विषयतायां, तस्याः स्वरूपेणाश्रये तस्याभेदेन कारके, तस्याभेदेन कर्म्मणि, तथा च व्यापाराश्रयाभिन्नव्यापाराश्रयवृत्तिव्यापारविशिष्टफलवत्त्वप्रकारकेच्छानिरूपितविषयताश्रयाभिन्न कारकं कर्म्म भवतीत्यर्थः वैशिष्ट्यं च स्ववाचकधातु वाच्यत्व स्वप्रयोज्यत्व सम्बन्धाभ्यां, माषक्षेत्रेषु पुष्ट्यर्थमश्वबन्धने माषाणां कर्म्मत्ववारणायाद्यः, अग्नेर्म्माणवकं वारयतीत्यत्राग्नेः कर्म्मत्ववारणाय द्वितीयः, ननु तण्डुलं पचतीत्यादाविच्छीय विषयताश्रयत्वेनास्मदादीनामपि तत्त्वं स्यादिति चेन्न इच्छीयमुख्यविशेष्यताश्रयस्यैव तत्त्वाङ्गीकारेणा

स्मदादीनां तत्त्वविरहात् न च यस्य मद्वृत्तिव्यापारजन्या तण्डुलनिष्ठा विक्लित्तिर्भवतु तण्डुलनिष्ठविक्लित्तिजनकोमन्निष्ठव्यापारो भवतु तण्डुलनिष्ठविक्लित्तिजनकव्यापारवानहं भवेयमित्यादि नानेच्छा वर्त्तते तत्र फलाश्रयत्वप्रकारकेच्छाविरहेण तण्डुलस्यापि कर्म्मत्वं न स्यादिति वाच्यं निरुक्तनानेच्छास्थलेऽपि मद्वृत्तिव्यापारप्रयोज्यविक्लित्त्याश्रयस्तण्डुलो भवत्वितीच्छायाः सत्त्वेन इच्छीयविषयतायाः फलाश्रयनिष्ठाया एवग्रहणेनवादोषात्, ॥ ननु स्तोकं पचतीत्यादौ विक्लित्तिरूपे फले ऽभेदनान्वितस्य स्तोकस्य विक्लित्त्याश्रयत्वाभावेन कर्म्मत्वानापत्तिरिति चेन्न फलस्यापि व्यपदेशिवद्भावेन फलसम्बन्धित्वात्कर्म्मत्वे तत्समानाधिकरणेऽपि कर्म्मत्वसिद्धेः, न च मुख्यधर्म्मवदघटकत्वे सति मुख्यधर्म्मवद्घटितत्वे सति मुख्यधर्म्मवदसमभिव्याहृतत्वस्यासहायत्वे रामादेरपि जस्सादेशापत्तिरिति वाच्यम् अतिदिदीक्षितधर्म्मघटकमुखप्रविष्टधर्म्मवति सर्वेषां धर्म्माणां तयाऽतिदेशेन रामादेरतथात्वेनादोषात्, अत्र चाति-

द्दीक्षितफलाश्रयत्वधर्म्मघटक मुखप्रविष्टफलत्वध
र्म्मवतः स्तोकादेः कर्म्मत्वमिच्छेः, । अन्ये तु सर्वेषां
धातूनामुत्पत्तिघटितार्थकत्वेन पचेर्विक्लित्त्युत्पत्त्यनु
कूलव्यापारार्थकत्वेनोत्पत्तेः समवायेन विक्लित्तावभे
देनान्वितस्तोके सत्त्वात्तादृशफलाश्रयत्वप्रकारके
च्छोद्देश्यत्वेन तस्य कर्म्मत्वमित्याहुः। ननूक्तार्थाभ्यु
पगमेऽपि स्वजनकव्यापारवत्त्वसम्बन्धेन देवदत्तस्य
स्वाधिकरणकालवृत्तित्वसम्बन्धेन पाषाणस्य का-
लिकसम्बन्धेन सर्वेषामपि फलाश्रयत्वेन तत्त्वं दुर्वा
रमेवेति चेन्न समवायसम्बन्धेन फलाश्रयस्य विवक्ष
णेनादोषात् न च घटञ्जानातीत्यादौ विषयतास
म्बन्धेन फलाश्रयस्य घटस्य कर्म्मत्वं न स्यादिति
वाच्यं समवायविषयतान्यतरसम्बन्धेन फलाश्रयस्य
विवक्षणेनादोषात्, न च ग्रामं त्यजतीत्यादौ प्रति
योगित्वसम्बन्धेन विभागाश्रयस्य ग्रामस्य कर्म्मत्वं
न स्यादिति वाच्यं समयवायविषयताप्रतियोगित्वा
न्यतमसम्बन्धेन फलाश्रयस्य विवक्षणेनोक्तस्थलेष्व
न्यतमसम्बन्धेन फलाश्रयस्य सत्त्वेनादोषात्, सम
वायविषयताप्रतियोगित्वरूपसमुदायत्वावच्छिन्नप्रति

योगिताकभेदवद्भिन्नतत्रस्यैत्रान्यतमत्वे नैनेषामेवत-
त्त्वस्य सत्त्वेन जगतःप्रवेशस्याप्यभावादिति केचित्,
वस्तुतस्तु फलतावच्छेदकसम्बन्धेन फलाश्रयः कर्म्म
भवतीत्यर्थेनोक्तस्थलेषू क्तसम्बन्धेनफलाश्रयत्वेऽपि
फलतावच्छेदकसम्बन्धेनफलाश्रयत्वाभावात्कर्म्मत्वा
प्रवृत्तेः, पचेः फलतावच्छेदकः सम्बन्धस्समवायएव
स्तोकंपचतीत्यादिलक्ष्यानुरोधादभेदश्च इच्छत्यादी
नांविषयतैवताद्दृशःसम्बन्धःएवमन्येषामपीष्टलक्ष्यारो
धात्सऊहनीयः अन्यत्रान्यत्रान्यसम्बन्धेन फलाश्रय
स्य कर्म्मत्वे तत्तत्सम्बन्धस्यापि निवेशेऽनन्तसम्बन्ध
निवेशप्रसङ्गात्, ननु कोऽसौ फलतावच्छेदकः सम्ब
न्धः, यत्पचेः समवाय एव फलतावच्छेदकः न तु
कालिकस्वाधिकरणकालवृत्तित्वादय इति चेदत्रो-
च्यते फलतायाः कार्य्यतारूपत्वेन कार्य्यतावच्छेदको
यस्स एव फलतावच्छेदकः, स च याद्दृशाधिकरणं
मत्वा कार्य्यकारणभावस्ताद्दृशाधिकरणे कार्य्यं येन
सम्बन्धेन प्रतीयते स एव सम्बन्धः, तण्डुलादौ स
मवायेन विक्लित्तिम्प्रति स्वसमानकालिकत्वसम्बन्धे
न स्वाश्रयसंयुँक्तसंयुँक्तत्वसम्बन्धेन वा व्यापारस्य
कारणतया पचेः फलतावच्छेदकः समवाय एव,

कालादौ समवायसम्बन्धेन विक्लित्तेरसत्त्वेन न कालं पचतीत्यादयः प्रयोगाः, स्तोकं पचतीत्यादिलक्ष्यानुरोधेनाभेदेन विक्लित्त्यादिकं प्रति स्वसमानकालिकत्वादिसम्बन्धेन व्यापारस्यकारणत्वेनाभेदोऽपि सः, विषयतासम्बन्धेन ज्ञानं प्रति स्वसमानकालिकत्वादिसम्बन्धेन व्यापारस्य कारणत्वेन सोऽपि फलतावच्छेदक एवमन्येषामपि धातूनां कार्य्यतावच्छेदकसम्बन्धा ऊहनीयाः, ननु ग्रामंत्यजतीत्यत्रेव ग्रामाद्विभजत इत्यत्रापि ग्रामस्य कर्म्मत्वापत्तिः, त्यजेरिव विभजेरपि विभागानुकूलव्यापारार्थकत्वेन समवायेन विभागं प्रति स्वसमानकालिकत्वादिना व्यापारस्य कारणत्वेन फलव्यधिकरणव्यापारवाचकत्वरूपसकर्म्मकत्वसम्भवादिति चेन्न ग्रामंत्यजतीत्यत्रप्रतियोगित्वविशिष्टसमवायस्य फलतावच्छेदकत्वाङ्गीकारेणान्यत्रानुयोगित्वविशिष्टसमवायस्य तदनङ्गीकारेणचादोषात् ॥ नन्वेवमपि नरकं गच्छति कारागारं गच्छतीत्यादयः कथं प्रयोगाः स्युः, न हि कोऽपि नरकं कारागारं वा जिगमिषतीतिचेन्न ताहशफलवत्त्वप्रकारकेच्छोद्देश्यत्वेन वि

वक्षितं कर्म्म भवतीत्यर्थेन वक्तुः क्रियाकर्मभावसम्बन्धेन देवदत्तवृत्तिव्यापारविशिष्टसंयोगरूपफलाश्रयत्वप्रकारकदेवदत्तवृत्तीच्छोद्देश्याभिन्ननरकवृत्तिसंयोगानुकूलदेवदत्ताभिन्नाश्रयवृत्तिव्यापारविषयकबोधो भवत्वितीच्छायाः सत्त्वेन नरकादीनां तादृशेच्छोद्देश्यत्वेन विवाक्षितत्वात्कर्म्मत्वसिद्धिः, न च ग्रामन्न गच्छतीत्यादौ ग्रामादेः कर्म्मत्वानापत्तिः, तादृशफलाश्रयत्वप्रकारकेच्छोद्देश्यत्वेन विवक्षितत्वाभावादिति वाच्यं गमेः संयोगत्वेन संयोगानुकूलव्यापारे शक्तेः सत्त्वेन संयोगत्वेनारोपितसंयोगवास्तविकसंयोगयोर्ग्रहणेनारोपितसंयोगस्य नञ्द्योत्यत्वेन प्रकृते नञः सत्त्वेन तथात्वात्कर्म्मत्वासिद्धिः, ॥ अन्ये तु ग्रामं गच्छतीत्यादौ देवदत्तादेः कर्म्मत्ववारणाय परसमवेतत्वमेव कर्म्मत्वमित्यूचुस्तत्र परत्वं प्रकृत्यर्थप्रतियोगिताकभेदवत्त्वं, ननु प्रकृत्यर्थगततद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदवत्त्वं, प्रकृत्यर्थतावच्छेदकावच्छिन्नप्रतियोगिताकभेदवत्त्वं, वा, आद्ये सर्वत्रातिव्याप्तिः, द्वितीये मल्लोमल्लं गच्छतीत्यत्र कर्म्मत्वं न स्यादिति

चेन्न स्वानुकूलत्व स्वसमानाधिकरणभेदप्रतियोगि वृत्तित्व सम्बन्धाभ्यां फलविशिष्टव्यापाराश्रय इत्याद्यर्थेन स्वान्यसमवेतत्व स्ववृत्तिसंयोगजन कत्व सम्बन्धाभ्यां फलाश्रयविशिष्टव्यापाराश्रयेत्या द्यर्थेन वोक्तस्थलेष्वदोषादित्याहुः, ॥ ननु कर्तृवृत्ति व्यापारविशिष्टफलाश्रयः कर्म्मेत्यर्थेन कर्त्तुराप्ततमं कर्म्मेति सूत्रेण तण्डुलं पचतीत्यादौ तण्डुलादेः, ग्रामं गच्छन् तृणं स्पृशतीत्यादावनीप्सिततृणादेश्च कर्म्मत्वसिद्धौ कर्त्तुरीप्सिततमं कर्म्म तथायुक्तमिति सूत्रं च व्यर्थमेवेति चेन्न काशीं गच्छन् पथि मृत इत्यत्र काश्याः कर्म्मत्वार्थमीप्सिततममिति, तथा चानीप्सितसंग्रहार्थं तथायुक्तमिति च, न हि काश्याः संयोगरूपफलाश्रयत्वमस्ति, एवं तण्डुलं पिपक्षन् मृत इत्यादौ तण्डुलस्य फलानाश्रयत्वेन कर्म्मत्वा- नापत्तिः, ईप्सिततममित्युक्तौ तु फलसम्बन्धप्रकार केच्छाविषयत्वात्कर्म्मत्वासिद्धिरित्यवधेयम् ॥

लः कर्म्मणि च भावे चाकर्म्मकेभ्यः,

अत्र लः कर्म्मणि चेत्येकं वाक्यं, भावे चाकर्म्मकेभ्य इत्यपरं, चात्कर्त्तरि कृदित्यतः कर्त्तरीत्यनुकृष्यते,

पूर्वं च सकर्म्मकविषयस्य अकर्म्मकेषु कर्म्मणीत्यंशस्य वाधितत्वात्, भावे चेत्युत्तरवाक्येन तत्र विशेषविधानाच्च, ननु भावकर्म्मणोरात्मनेपदविधानात्, शेषात्कर्त्तरीति परस्मैपदविधानाच्च ज्ञापकाल्लकाराणां भावकर्म्मकर्त्तारोऽर्था अनुमातुं शक्यन्ते किमनेन सूत्रेण, मैवम् असत्यस्मिन् सूत्रे सकर्म्मकेभ्योऽपि घञादिवद्भावे लकारापत्तौ घटं क्रियते देवदत्तेनेत्यादिप्रयोगः प्रसज्येत तन्माभूदित्येतदर्थमेतत्सूत्रस्यावश्यकत्वात् , न चैव मकर्म्मकेभ्यो भावे ल इत्येव सूत्र्यतां भावेऽकर्म्मकेभ्य एवेति नियमार्थमिति वाच्यम् अकर्म्मकेभ्यो भाव एवेति विपरीतनियमापत्त्या कर्त्तरि तेभ्यो लकारानापत्तेः, तस्माद्भावे चेति च आवश्यकः, न चैवं भावे चाकर्म्मकेभ्य इत्येवास्त्विति वाच्यं भाव इव कर्त्तर्य्यप्यकर्म्मकेभ्य एवेति नियमापत्तौ सकर्म्मकेभ्यो भाव इव कर्त्तर्य्यपि लकारानापत्तेः, नन्वेवमपि लश्च भावे चाकर्म्मकेभ्य इत्येवास्तु चकारेण कर्त्तरीत्यनुकर्षणाल्लकाराः सकर्म्मकेभ्यः कर्त्तरि स्युकर्म्मकेभ्यो भावे कर्त्तरि च स्युरित्यर्थे

पर्य्यवसिते कर्म्मणि तूक्तज्ञापकाद्भविष्यन्ति किमने
न कर्म्मणीत्यंशेनेति चेन्मैवम् उत्तरसूत्रे तयोरित्य-
नेन कर्म्मणोऽपि परामर्शार्थं तस्यावश्यकत्वात्, न
नु भावकर्म्मणोरकर्म्मकादित्येवास्तु सामर्थ्यादकर्म्म-
कग्रहणं भावार्थं भविष्यति किमनेन सूत्रेणेति चे-
न्न शानजादेर्भावकर्म्माभिधायित्वेन कर्त्तरि तद-
नापत्तेः, सत्येतस्मिन् लस्थानित्वेन तस्य कर्तृवा-
चित्वस्य सौलभ्यात्, ननु भावकर्म्मणोरित्यस्य त-
द्विषये सावकाशतया कर्त्तरि कृदित्यस्य तृजादिषु
सावकाशतया चानस्य तूभयप्रसङ्गे परत्वात्कर्त्राऽ-
र्थो भविष्यति, नापि परस्मैपदिभ्यो धातुभ्यः शा-
नजादयः प्राप्नुवन्ति, अनुदात्तङित इत्यस्यानुदा-
त्तङितआत्मनेपदं नान्यस्मादित्येवं नियमार्थक-
त्वाभ्युपगमात्, भावकर्म्मणोरित्यत्र त्वनुवृत्त्या द्वि
तीयेन वाक्येनास्ते शेत इत्यादिषु तद्वां विधानान्न
विध्यर्थत्वानुपपत्तिः न च भावकर्म्मणोरित्यत्र तद
नुवृत्तावनुदात्तङित एवात्मने पदं प्राप्नोतीति वाच्यम्,
अनुदात्तङित आत्मनेपदं, भावकर्म्मणोः, ततः क-
र्त्तरि, अनुदात्तङित आत्मने पदं भवति कर्त्तरि'

अत्र भावकर्म्मणोरिति नानुवर्त्तते, ततः कर्म्मव्यती हारे कर्त्तरीत्येव, अनुदात्तङित इत्यपि नानुवर्त्तते, एवं योगविभागेन सकलेष्टसिद्धेरिति चेन्नासत्यस्मिन् सूत्रे भवदुक्तेन विप्रतिषेधेनानः कर्त्तरि कृदिति कर्त्तर्य्येव स्यान्न तु भावकर्म्मणोः, ततश्च भूयमानं गम्यमानमित्यादयः प्रयोगा नैव स्युः न च सत्यप्यस्मिन् लादेशाश्शत्रादयः सर्वे, लः कर्म्मणोरिति बलाद्भावकर्म्मणोः स्युरिति वाच्यं शेषात्कर्त्तरीति परस्मैपदविधानेन भावकर्म्मणोस्तेषां विधातुमशक्यत्वादिति भाष्यविदः पन्थाः, ॥ अत्र नैयायिकाः लकाराणां कृतावेव शक्तिर्लाघवान्न तु कर्त्तरि, कृत्याश्रयस्य कर्तृत्वेन तत्रानन्तायाः कृतेः शक्यतावच्छेदकत्वेन गौरवात्, कृतौ शक्त्यभ्युपगमे तत्र कृतित्वस्य शक्यतावच्छेदकत्वेन लाघवात्, तण्डुलं पचतीति वाक्यजन्यशाब्दबुद्धित्वावच्छिन्नं प्रति शाब्दिकनये आश्रयत्वविशिष्टावच्छिन्नवाचकताज्ञानाश्रयत्वत्वावच्छिन्नाश्रयत्वप्रकारकोपस्थितित्वेन कारणत्वेन गौरवात्, न्यायनये तिपदं कृतिविषयकबोधजनकत्वप्रकारकभगवदिच्छीयविषयतावदित्या

कारकशक्तिज्ञानजन्यकृतित्वप्रकारकोपस्थितित्वेन--
कारणत्वाभ्युपगमात्कृतिविषयकोपस्थितिशक्तिज्ञान
योः कार्य्यकारणभावेन लाघवात्, विभिन्नविषयकप्र
त्यक्षत्वावच्छिन्नं प्रति शाब्दसामग्र्याः प्रतिबन्धक
तया शाब्दिकनये तण्डुलं पचतीति वाक्यजन्यशा
ब्दसामग्रीघटकाश्रयत्वप्रकारकोपस्थितेराश्रयत्वप्रका
रतानिरूपितविशेष्यत्वावच्छिन्नाश्रयत्व प्रकारकोप-
स्थितित्वेन, एवं विशेष्यतानिरूपितप्रकारत्वावच्छि
न्नाश्रयत्वनिष्ठविशेष्यतानिरूपिताश्रयत्वप्रकारकोप-
स्थितित्वेन च प्रतिबन्धकत्वे विनिगमकाभावेन प्र
तिबन्धकताधिक्यात्, न्यायनये विभिन्नविषयकप्रत्य
क्षत्वावच्छिन्नं प्रति कृतित्वप्रकारकोपस्थितित्वेन प्र
तिबन्धकत्वाभ्युपगमेन लाघवाच्च, आश्रयत्वस्या
खण्डोपाधितया स्वरूपतो भानस्वीकारान्न शक्यता
वच्छेदकत्वे गौरवं न वा प्रतिबन्धकताधिक्यमिति
वक्तुमशक्यम्, आश्रयभेदेनाश्रयत्वस्य भिन्नत्वात्,
अन्यथा चैत्रनिष्ठाश्रयत्वस्य शक्यतावच्छेदकत्वे
मैत्रः पचतीति वाक्यस्या प्रामाण्यप्रसङ्गात् न च
सकलाश्रयनिष्ठाश्रयत्वमेकमेव स्वीक्रियत इति वा-

च्यं कालिकसम्बन्धेन काले पाकस्य सत्त्वेन कालं पचतीति प्रयोगापत्तेः, समवायसम्बन्धावच्छिन्न-त्वस्य निवेशेऽप्याश्रयत्वस्यैक्येन समवायसम्बन्धावच्छिन्नाश्रयताया भेदात्पाकनिरूपिताश्रयत्वस्यकाले दुर्वारत्वात्, न चैवं रथो गच्छतीत्यादावचेतने रथे कृतेर्बाधादाश्रयत्वादौ लक्षणायां लक्ष्यतावच्छेदकगौरवेण साम्यामिति वाच्यम् अतिरिक्तशक्तिकल्पनापेक्षया क्लृप्तायां शक्तिसम्बन्धरूपलक्षणायां लाघवात्, नापि लक्षणाश्रयणे युगपद्वृत्तिद्वयानभ्युपगमाद्वर्तमानत्वादीनां तत्रान्वयानुपपत्तिः सम्भवाति, शक्यतावच्छेदकलक्ष्यतावच्छेदकयोर्भेदात्, लट्त्वेन वर्तमानत्वे शक्तेर्लकारत्वेन लक्षणायाश्चाभ्युपगमात्, नापि तद्विषयकशाब्दबुद्धित्वावच्छिन्नं प्रति लक्षणाज्ञानजन्याश्रयत्वाद्युपस्थितेर्हेतुत्वकल्पने गौरवापत्तिः, तद्विषयकवृत्तिज्ञानजन्योपस्थितित्वेन हेतुतया लक्षणाज्ञानस्य पृथगहेतुत्वात्, न च लः कर्म्मणि चेति पाणिनिस्मृतेर्लालस्य कर्तृवाचकत्वमध्यवसीयत इति वाच्यं चादनुकृष्टस्य कर्त्तरीत्यस्य कर्तृत्वपरत्वे बाधकाभावात्, कर्तृत्वस्य कृ

तिरूपत्वात्, न च तिङ्समानाधिकरणे प्रथमेति वार्त्तिकात्तिङर्थाभिन्नार्थबोधकप्रातिपदिकात्प्रथमेत्यर्थावगमात्तिङर्थकृत्यभेदस्य चैत्रे बाधात्पचति चैत्र इत्यादिप्रयोगानुपपत्तिरिति वाच्यं समवायस्वरूपान्यतरसम्बन्धेन तिङर्थान्वितार्थबोधकप्रातिपदिकात्प्रथमेत्यर्थात्तिङर्थकृतेः समवायेन चैत्रे सत्त्वेनानुपपत्त्यभावात्, नापि पचन्तं चैत्रं पश्येत्यादौ सामानाधिकरण्यानुपपत्तिः सम्भवति यत्नस्याश्रयतासम्बन्धेन चैत्रेऽन्वयसम्भवात्, नामार्थयोरभेद एवेति नियमे तु कर्त्तर्य्येव शत्रादीनां शक्तेरभ्युपगमेनादोषात्, स्थान्यर्थेन निराकांक्षतया कर्त्तरि कृदित्यस्य तत्रानुपस्थितौ त्वाश्रये लक्षणाया अपि वक्तुं शक्यत्वात्, लक्षणया पाको देवदत्त इति प्रयोगापत्तिस्तु वक्तुमशक्या तादृशप्रयोगादर्शनेन तत्र लक्षणाया अनभ्युपगमात्, नापि पचति चैत्र इत्यत्रानभिहिते कर्त्तरि तृतीयापत्तिः, कर्तृगतसंख्याऽनभिधाने तस्या विधानात्, कर्म्मत्वाद्यनवरुद्धप्रथमान्तपदोपस्थाप्यस्य संख्याभिधानयोग्यत्वात्, कर्म्मत्वादीत्यस्येतरविशेषणत्वे तात्पर्य्याविषयत्वार्थकत्वेन चैत्र इव मैत्रो गच्छतीत्यत्रापि चैत्रपदात्तदप्रवृत्तेः,

धात्वर्थातिरिक्तार्थाविशेषणत्वार्थकत्वेन वोक्तस्थलेऽदोषात्, स्तोकं पचतीत्यादौ स्तोकादेस्तद्धारणाय प्रथमान्तपदोपस्थाप्यनिवेश इत्येवं रीति मनुसृत्य निर्वाहे वृथैव कर्त्तरिशक्तिरित्याहुः ॥

अत्र विचार्य्यते, आख्यातस्य कर्तृवाचकत्वाभावे पच्यते तण्डुलेनेत्यादौ कर्म्मवत्कर्म्मणेत्यतिदेशात्कर्म्माणि द्वितीयापत्तिः, मन्मते तु लिङ्याशिष्यङि- ति द्विलकारकाल इत्यस्यानुवृत्तेर्ल्लकारवाच्यस्यैव कर्त्तुः कर्म्मवत्त्वेन, भावे लकारे तेन कर्त्तुरनुपस्थिते रदोषात्, एवं भेत्तव्यं कुसूलेनेत्यत्रापि कर्म्मवत्कर्म्मणेति कर्म्मवत्त्वे भावे प्रत्ययानापत्तिः, मन्मते चोक्तरीत्या कर्म्मवत्त्वाभावात्, नापि लकारवाच्यकृत्याश्रयः कर्त्ता कर्म्मवदित्यर्थेन निर्वाहः तत्र लस्य विक्लित्त्याश्रयवाचकत्वेन कृतिवाचकत्वाभावात्, लकारार्थसंख्याश्रयः कर्त्ता कर्म्मवदित्यर्थेनापि न निर्वाहः पच्यमानस्तण्डुल इत्यादौ लकारेण संख्याया अनुपस्थितौ कर्म्मवत्त्वानापत्तेः, नापि लकारवाच्यकर्त्तृत्वाश्रयः कर्त्ता कर्म्मवदित्यर्थो वाचनिकार्थातिरिक्तार्थकल्पने गौरवात्, पूर्वपदे लक्षणाप्रसङ्गभियैव निषादस्थपतिं याजयेदित्यत्र कर्म्मधारय

भङ्गीचकार भगवान् जैमिनिः; एवं कृञो यत्नार्थकत्वे क्रियते घटः स्वयमेवेत्यादौ कर्म्मवद्भावानापत्तौ यगाद्यनापत्तेः, ज्ञानेच्छादिवद्यत्नस्य कर्तृस्थत्वात्, वीजादिनाऽङ्कुरः कृतो रथो गमनं करोतीत्यादावचेतनेऽपि कृञः प्रयोगाद्यत्नार्थकताया असिद्धेश्च, आश्रयत्वस्य नित्यत्वेनागौरवात्, उत्पादविनाशव्यवहारस्तु निरूपितत्वाद्युत्पत्त्यादिकमादायैव, वायुत्वरूपयोः समवायस्यैकत्वेऽपि रूपनिरूपितत्वाभावेन वायौ रूपवत्ताप्रतीत्यभाववत्, एवं सति गौरवविरहेण लस्य कर्तृवाचकत्वपरित्यागोऽपि बलादेवेत्यलम् ॥ मीमांसकास्तु लकाराणां कर्त्तरि शक्तौ नानृतं वदेदित्यादिविधिगता भावना श्रौतत्वात्प्रयोजनाकांक्षिणी प्रकरणगम्यक्रत्वर्थत्वबाधनेन पुरुषार्था भवेत्, ननु सत्यपि कर्त्तुरभिधाने भावनायाः प्राधान्यात्तां प्रत्युपादीयमानस्य कर्त्तुः श्रौतोऽपि सम्बन्धः प्रकरणानुगुणत्वादविरुद्धो नैव क्रत्वर्थतां बाधेत, विरोधिनौ हि तुल्यकक्षौ सम्बन्धौ परस्परं बाधेयातां, न गुणप्रधानभूताविति चेन्न साधकमपेक्षमाणया क्रियया गुणत्वेन गृहीतेऽपि कर्त्तरि तस्याः प्रयोजनाकांक्षावेलायां कर्त्तैव सन्निहितस्तां निर्वर्त्त

यितुं क्षमः सन्मुख्यः, कृदन्तवत्क्रमेण स्थितयोः प्रकृतिप्रत्यययोर्म्मध्ये प्रत्ययार्थस्यैव प्राधान्यावगमश्च, न च भावप्रधानमाख्यातमिति यास्कवचनादेव भावनाप्राधान्यमध्यवसीयत इति वाच्यं तद्वचनस्य मत्पक्षाभिप्रायकत्वात्, नापि प्रकृतिप्रत्ययार्थयोरितिवचनविरोधो भावनाप्रत्ययार्थवादिनो मे प्रत्ययार्थस्यैव प्राधान्यात्, तदुक्तं (यद्यप्यादौ गुणत्वेन कर्त्ता कर्म्मणि गम्यते । तथाप्यस्य प्रधानत्वं न पश्चात्प्रतिषिध्यते ॥ यद्वैतदविशेषेण स्थितं क्रमवशादुभौ प्रत्ययार्थं सह ब्रूतः प्रकृतिप्रत्ययाविति ॥ तेनाख्यातेऽपि कर्त्तैव प्रकृत्यर्थोपसर्ज्जनः । प्राधान्येनाभिधीयेत द्वाभ्यामपि कृदन्तवत् ॥ धात्वर्थस्य प्रधानत्वं न तावदिह जन्मनि । औत्सर्गिको न च न्यायो मत्पक्षे हि निवर्त्स्यतीति ॥) न च लः कर्त्तरीति व्याकरणस्मृतिबलादाख्यातवाच्य एव कर्त्ता भवेदिति वाच्यं वाच्यवाचकभावस्यान्यथाऽनुपपत्त्या व्यवहारगम्यत्वात्, अन्यार्थे प्रयुक्तानां शब्दानामन्यार्थे प्रयुञ्जाना आचार्य्या अपि प्रत्ययेयुः, शास्त्रैकदेशालोचनेन विरोधोद्भावनेऽपि शास्त्रसमुदायालोचनेऽविरोधात्, न हि सुरा न पात

ऽयत्यस्याप्येकदेशेन विहितं पानमकुर्वन् शास्त्रवि रुद्धं कुर्य्यात्, (माल्लः कर्म्मणि च द्वयेकयोरित्या- दिना तिपतस्झीत्यादेरेकवाक्यतया कर्त्तुरेकत्वे ए कवचनात्मको द्वित्वे द्विवचनात्मकश्च लादेश इत्य र्थेन सर्वत्र निर्वाहात्, तदुक्तं (सर्वाण्येव हि शास्त्रा णि स्वप्रदेशान्तरैः सह। एकवाक्यतया युक्तमुपदेशं प्रतन्वते ॥ अन्य एवैकदेशेन शास्त्रस्यार्थः प्रतीय ते । अन्यश्च परिपूर्णेन समस्ताङ्गोपसंहृताविति) कर्तर्य्येकत्वे चान्योन्यनिरपेक्षतिबादिविधाने तु द्वि बहुष्वपि कर्तृषु तिप्प्रसज्येत, तस्मादावश्यकी चैक वाक्यता, महाभाष्येऽपि यदैकत्वादयो विभक्त्यर्था स्तदाकर्म्मादयो विशेषणत्वेनेति द्वाभ्यामपि भाष्य कारवार्त्तिककाराभ्यां बहुवचनवार्त्तिकेऽनभिहितवा र्त्तिके च द्वावपि कर्म्मत्वाद्येकत्वादिवाच्यत्वपक्षौ दूरमनुसृत्यान्ते निर्द्दोषतयाऽवधारितम्, यदाकर्म्मा दयो विभक्त्यर्थास्तदैकत्वादयो विशेषणत्वेनेत्यस्य पूर्वपक्षाभिप्रायकत्वात्, यदाऽपि कर्म्मादयो विशेष्य भूतास्तदाऽप्येकत्वादय एव विशेषणतयावस्थिताः सन्तोऽभिधीयन्तेऽनभिहितानां विशेषणत्वानुपपत्ते रित्यर्थकरणात्, अर्थशब्दस्य प्रयोजनवाचितयोभयो र्वचनयोर्य्यथासम्भवं पूर्वस्य तिङ्विषयत्वादपरस्य स-

ऽविषयत्वाच्चाविरोधात्। ननु ध्येकयो॥(रत्या)दिशास्त्रा णां तिङादिविधायकशास्त्रेणेव सुब् देविधायकशा स्त्रेण सहैकवाक्यतया कर्म्मादिविशिष्टसंख्याभिधा नं भवेन्न कारकाभिधानमिति चेन्न एकस्यापि शास्त्रस्य प्रयोजनवशात्सम्बन्धिभेदेन भिन्नत्वात्ति ङ्क्षुविशेष्यत्वेन सुप्सु विशेषणत्वेन चान्वयसम्भवा त् न च केवलकारकपदप्रयोगाभावादवश्यं भाऽया ख्यातपदाभिहितभावनोपनीतानामेवकारकाणां ति ङ्क्ष्वेव संख्या सम्बन्धो भवेदिति वाच्यम् इतरेत राश्रयवारणाय क्रियान्वयमान्तरेणापि कारकस्य सं- ख्यासम्बन्धत्वाभ्युपगमात्, न च देवदत्तः पचती- त्यादौ कर्त्तुरनभिधानात्तृतीयाप्रवृत्तिरिति वाच्यं सा हि कर्तृप्रतिपत्त्यर्थं तद्गतसंख्याप्रतिपत्त्यर्थं वा विधीयते प्रकृते चाक्षेपात्कर्त्तुस्तिपैकत्वस्य च ला- भेन तद्बोधकतृतीयाया अप्रवृत्तेः, नापि सामानाधि करण्यानुपपत्तिः भावनया कर्त्तुराक्षेपादेकार्थबोधक त्वोपपत्तेः, गङ्गायां घोष इत्यादौ लक्षितस्य तीरस्य घोषेऽन्वयवदशाब्देनापि कर्त्रा शाब्दसंख्यान्वयस म्भवात्, न च लक्षणया सामानाधिकरण्यस्योपप त्तावपि मुख्यं सामानाधिकरण्यं नोपपद्येतेति वाच्यं

भवन्मतेऽपि तृतीयावन्निष्कृष्टशक्तिमात्ररूपकर्तृकार काभिधानाच्छक्तिमद्द्रव्यस्याकृत्यधिकरणेनानभिधा नाद्देवदत्तशब्देन च द्रव्यमात्राऽभिधानान्मुख्यसा नाधिकरण्यस्य वक्तुमशक्यत्वात्, नापि पचन्तं प· चमानं वा चैत्रं पश्येत्यादौ सामानाधिकरण्यानुप पत्तिः लः कर्म्मणि चेत्यस्य लटः शतृशानचावित्य नेनैकवाक्यतया कर्त्रादावेव शत्रादे र्विधानात्, क र्त्तरिशबित्यत्र भवन्मते कर्तृपदस्य तदर्थकपरत्वस्या वश्याभ्युपेयतया मन्मतेपि कर्तृगतैकत्वादिबोधके लक्षणया निर्वाहात्, युष्मद्युपपदे समानाधिकरण इत्यत्र तु समानाधिकरणपदबलात्तिङ्वाच्यकारक· वाचिनीत्यर्थवत्समवायस्वरूपान्यतरसम्बन्धेन तिङ र्थान्वितार्थबोधके युष्मद्युपपद इत्यर्थेन तिङ्वाच्य भावनाक्षिप्तकर्तृवाचिनीत्यर्थेन वाऽदोषात्, कर्म्मव त्कर्म्मणा तुल्यक्रिय इत्यस्य समवायसम्बन्धेन लका रार्थान्वितार्थः कर्त्ता, कर्म्मवदित्यर्थेन पच्यते तण्डुले नेत्यत्रापिनिर्वाहात् भावे प्रत्यये लकारेण भावनाया अनुपस्थितेः स्वयुक्ताख्यातार्थभावनाव्याधिकरणफ लवाचकत्वस्य सकर्म्मकत्वेन, तादृशभावनासमाना धिकरणफलवाचकत्वस्याकर्म्मकत्वेन सकर्म्मकाकर्म्म

कत्वव्यवहारस्याप्यनुच्छेदात्, ग्रामो गमनवानित्या दिप्रयोगस्तु पाकवाँस्तण्डुल इत्यादिवदिष्ट एवेत्याहुः अधिकमत्र जिज्ञासुभिरस्मत्कृतमीमांसादर्शनव्याख्यायांद्रष्टव्यमिति शुभ म्भूयात् ॥ ❀ ॥ ❀ ॥

आसीन्माण्डरवंशसम्भव सुधीवर्गाग्रणीः सद्गुण ग्रामो यज्ञपतिर्विदेहविषये विद्योल्लसत्कीर्त्तिमान् । तद्वंशोद्भवदेवनात्मज रुदीशर्म्मात्मजस्वच्छधी बाबूदत्तसुनः सुधीः प्रमुदितः श्रीमित्रनाथाभिधः ॥ १ ॥ स्वेदेशे जयलालशर्म्म विदुषोऽधीत्याखिलां कौमुदीं श्रीगङ्गाधरशास्त्रिणः कृतिवरात्पातञ्जलादीन्यपि । न्यायंसद्गतिविश्वनाथकृतिनो, वेदान्तसांख्यादिकान् श्रीमच्चित्रधराभिधाद्बुधवरात्सज्जैमिनीयश्रुतान् २ ॥ श्रीमत्खण्डबलान्ववायजलधौ कीर्त्तिप्रतापोल्लसद्भूपश्रील रमेश्वरेन्दुममलंसंसेवमानोमुदा । सोऽयं तद्वनितारमेश्वरलताविद्यालये यत्नतो मीमांसादिमहाप्रबन्धनिवहानध्यापयन्साम्प्रतम् ॥ ३ ॥ मीमांसातर्कतीर्थः श्रीरविनाथापराभिधः । भावकौतुकनामानं ग्रन्थं व्याकरणेऽकरोत् ॥ ४ ॥ चन्द्राग्नि वसुभूमाने शाकेऽयं भृगुवासरे । माघे शितोत्तृतीयायां ग्रन्थः सम्पूर्णतामगात् ॥ ५ ॥ ❀ ॥